Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# जैनागमन्यायसंग्रहः

जैनधर्मदिवाकर
जैनाचार्य पूज्य श्री आत्माराम जी महाराज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णमोऽत्थुणं समणस्सभगवओ महाव रस्स

॥ जैनशास्त्रमाला —षष्ठरत्नम् ॥

# जैनागमन्यायसंग्रहः

संकलनकर्त्ता

जैनधर्मदिवाकर, साहित्यरत्न, जैनागमरत्नाकर,

श्रीमज्जैनाचार्य पूज्य श्री आत्माराम जी

महाराज

प्रकाशक :—

जैन-शास्त्रमाला-कार्यालय

जैन उपाश्रय, लुधियाना

प्र. ५०० प्रथमवार

वीर सम्वत्, २४७८
विक्रम सं०, २००६

मूल्य लागतमात्र २) रु० ५०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तिस्थान—

जैन-शास्त्रमालाकार्यालय,

जैन उपाश्रय लुधियाना

**नम्र सूचन**

इस ग्रन्थ के अभ्यास का कार्य
पूर्ण होते ही नियत समयावधि में
शीघ्र वापस करने की कृपा करें.
जिससे अन्य वाचकगण इसका
उपयोग कर सकें.

मुद्रक—

दी सैंट्रिल अलैक्ट्रिक प्रैस गोकुल रोड लुधियाना में
मास्टर लब्भूराम धवन के प्रबन्ध में छपी।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्राक्कथन

पदार्थों के ज्ञान के लिए और उन का सम्यग्बोध करने के लिए आगमों में प्रमाण और नय ये दो मार्ग प्रतिपादन किए गए हैं। प्रमाण सर्वांशग्राही होता है। और नय, पदार्थ के देश धर्म को ग्रहण कर उसका वर्णन करता है वर्तमान युग में न्याय की दो शैलियां प्रचलित हैं, जैसे—प्राचीन न्याय, और नव्यन्याय। प्राचीन न्याय शब्दाडम्बर को छोड़ कर अर्थावबोधविशेष रहता है और नव्यन्याय में अर्थावबोध की अपेक्षा शब्दाडम्बर।

जैन, बौद्ध तथा वैदिक आचार्यों ने न्याय शास्त्र के बहुत से ग्रन्थ निर्माण किए हैं और उन पर टीका टिप्पण भी यथा बुद्धि किए हैं जो आज कल पाठशालाओं के पाठ्य क्रम में नियुक्त भी हैं। अस्तु, इस जटिल तथा दुरूह विषय के सम्बन्ध में मेरा य बहुत दिनों से यह विचार था कि जो विद्यार्थी न्यायकक्षा में न्याय अध्ययन कर रहे हैं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या कर चुके हैं उन को प्राचीन आगमों में वर्णन किए हुए प्रमाण और नय—वाद का ज्ञान प्राप्त होना आवश्यक है। एतदर्थ इस लघु पुस्तिका में अनुयोगद्वार सूत्र, नन्दीसूत्र, ठाणांग सूत्र,भगवतीसूत्र, प्रज्ञापन सूत्र, तथा उत्तराध्ययन सूत्र, आदि जैनागमों से प्रमाण और नय तथा आत्मवाद आदि विषय स्वाध्याय शील विद्वानों के अवलोकन के लिए संक्षिप्त रूप से संग्रह किए गए हैं। जिन को विशेषप्रमाण और नय-वाद आदि विषयों को देखने का अभिलाषा होवे जैनागमों का सप्रेम स्वाध्याय कर और यथोचित लाभ उठाएं।

इस पुस्तिका में प्राचीन टीकाओं के साथ साथ आगम पाठ का भी संग्रह किया गया है आशा है विद्वान् लोग इस पुस्तक को पढ़ कर मेरे परिश्रम को सफल करेंगे। अलंविद्वत्सु।

चैत्र शुक्ला प्रतिपदा
सं० २००६
जैन उपाश्रय
लुधियाना

आचार्य—
आत्माराम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# दो शब्द

जैन शास्त्र के प्रकाण्ड विद्वान् पूज्य आचार्य श्री आत्मा राम जी महाराज के विशेष सहवास से मुझे भी जैनागमों के देखने का सौभाग्य प्राप्त होता रहा है। पूज्य श्री जी की कर लेखनी से जैन जगत् तथा जैनेतर विद्वज्जन सुपरिचित ही है। मैंने आचार्य श्री जी द्वारा प्रकाशित अनेकों ग्रन्थ पढ़े, जो साधारण तथा असाधारण जनता के लिए उपयोगी सिद्ध हुए हैं। मेरी आरम्भ से ही पूज्य श्री जी से सानुरोध प्रार्थना रही है कि जैनागमों में इतस्ततः विखरे हुए न्याय-शास्त्र सम्बन्धित पाठों का एक पुस्तक के आकार में प्रकाशन होना अत्यावश्यक है।

हर्ष का विषय है कि पूज्य श्री जी ने मेरी इस प्रार्थना को साकार रूप देकर मुझ पर ही नहीं किन्तु न्याय-शास्त्र के जिज्ञासुओं पर महान् उपकार किया है।

प्रूफ आदि संशोधन कार्य—भार अपने ऊपर लेकर इस पुस्तक के मूर्त्तरूप देने में जैन मुनि रत्नचन्द्र जी महाराज तथा प्रकाण्ड पण्डित शान्त मुद्रा पं० श्री हेमचन्द्र जी महाराज के सुशिष्य मुनि श्री स्वरूप-चन्द्र जी महाराज और कान्ति मुनि जी ने अपने कर्तव्य का पालन किया है। इसके लिए इन तीनों मुनिजनों का विशेष धन्यवाद।

निवेदकः—

चैत्र शुक्ला प्रतिपदा
सं० २००१

भरण्डूलाल शास्त्री
जैन उपाश्रय
लधियाना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# धन्यवाद

जालन्धर (छावनी) निवासी श्रीमान् लाला तेलूराम जी जैन समाज के मान्य व्यक्तियों में से एक हैं आरम्भ से ही आप सामाजिक सत्कार्यों में अपने द्रविण का सदुपयोग करते आये हैं। आप के अन्तस्तल में धार्मिक भावना सदैव जागृत रही है और उन्हीं सद् भावनाओं से प्रेरित हो आप ने अनेक ग्रन्थ प्रकाशित किए हैं, प्रस्तुत पुस्तक का प्रकाशन भार भी गणावच्छेदक श्री १००८ श्री रघुवरदयाल जी महाराज की सत्प्रेरणा से आप ने अपने ऊपर लिया है। अतः मैं "जैनशास्त्रमालाकार्यालय" लुधियाना की ओर से सेठ तेलूराम जी जैन रईस जालन्धर छावनी का शतशः धन्यवाद करता हूं।

आशा है, अन्य धनी महानुभाव भी लाला जी का अनुकरण करते हुए अपने धन का सदुपयोग करेंगे।

नोट :—यद्यपि प्रस्तुत पुस्तक के प्रूफ, संशोधन आदि में अति सावधानी रखी गई है, फिर भी यदि दृष्टिदोष से कोई अशुद्धि रह गई हो, तो पाठक महानुभाव सुधार कर पढ़ें।

आपका—

मन्त्री, जैनशास्त्रमालाकार्यालय

लुधियाना।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# समर्पितम्

यह 'लघु निबन्ध' स्वर्गीय श्री श्री १००८ गणी श्री उदयचन्द्र जी महाराज के कर कमलों में समर्पण किया जाता है। आप की प्रथम ही यह उत्कृष्ट भावना थी कि जैनागमों में निर्दिष्ट प्रमाण और नय-वाद आदि का बोध न्याय शास्त्र के जिज्ञासुओं के लिए आवश्यक है।

अतः मैं उसी भावना से प्रभावित होकर यह शास्त्रीय निबन्ध आप श्री जी की सेवा में समर्पित कर के हर्षातिरेक का अनुभव कर रहा हूं।

भवदीयः—

आचार्य जैन मुनि, आत्माराम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णमोऽत्थुणं समणस्स भगवओ महावीरस्स

# जैनागमन्यायसंग्रहः

## अथ भावप्रमाणमभिधित्सुराह—

मूल—से किं तं भावप्पमाणे ?, २ तिविहे पण्णत्ते, तंजहा-गुणप्पमाणे नयप्पमाणे संखप्पमाणे ( सू० १४३ ) से किं तं गुणप्पमाणे ?, २ दुविहे पण्णत्ते, तंजहा—जीव गुणप्पमाणे अजीवगुणप्पमाणे अ ।

से किं तं अजीवगुणप्पमाणे ?, २ पंचविहे पण्णत्ते, तं जहा—वण्णगुणप्पमाणे गंधगुणप्पमाणे रसगुणप्पमाणे फासगुणप्पमाणे संठाणगुणप्पमाणे, से किं तं वण्ण—गुणप्पमाणे ?, २ पंचविहे पण्णत्ते, तं जहा—कालवण्ण-गुणप्पमाणे जाव सुक्किल्लवण्णगुणप्पमाणे, से तं वण्णगुणप्प-माणे । से किं तं गंधगुणप्पमाणे ?, २ दुविहे पण्णत्ते, तंजहा—सुरभिगंधगुणप्पमाणे दुरभिगंधगुणप्पमाणे, से तं गंधगुणप्प-माणे । से किं तं रसगुणप्पमाणे ?, २ पंचविहे पण्णत्ते, तंजहा-तित्तरसगुणप्पमाणे जाव महुररसगुणप्पमाणे, से तं रसगुणप्पमाणे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



से किं तं फासगुणप्पमाणे ?, २ अट्ठविहे पण्णत्ते, तंजहा—कक्खडफासगुणप्पमाणे जाव लुक्खफासगुणप्पमाणे से तं फासगुणप्पमाणे। से किं तं संठाणगुणप्पमाणे ?, २ पंच विहेपण्णत्ते, तंजहा—परिमंडलसंठाणगुणप्पमाणे वट्टसं० तंस० चउरंस० आययसंठाणगुणप्पमाणे, से तं संठाणगुणप्पमाणे, से तं अजीवगुणप्पमाणे।

टीका :—भवनंभावो—वस्तुनःपरिणामो ज्ञानादिर्वर्णादिश्च, प्रमितिः प्रमीयते अनने प्रमीयते स इति वा प्रमाणं, भाव एव प्रमाणं भाव प्रमाणं, भावसाधनपक्षे प्रमितिः—वस्तुपरिच्छेदस्तद्धेतुत्वाद् भावस्य प्रमाणताऽवसेया, तच्च भावप्रमाणंत्रिविधंप्रज्ञप्तं, तद्यथा-गुणप्रमाण, मित्यादि, गुणो—ज्ञानादिः स एव प्रमाणं गुणप्रमाणं, प्रमीयते च गुणैर्द्रव्यं, गुणाश्च गुणरूपतया प्रमीयन्तेऽतः प्रमाणता, तथानीतयो नया—अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छिन्नयः त एव प्रमाणं नयप्रमाणं, संख्यानं संख्या सैवप्रमाणं संख्याप्रमाणं, नयसंख्ये अपि गुणत्वं न व्यभिचरत, केवलं गुणप्रमाणात् पृथगभिधाने कारणमुपरिष्टाद्वक्ष्यते, तत्रगुणप्रमाणं द्विधा जीवगुणप्रमाणं च अजीवगुणप्रमाणं च तत्राल्प-वक्तव्यत्वादजीवगुणप्रमाणमेव तावदाह—'से किं तं अजीवगुणप्पमाणे, इत्यादि, एतत्सर्वमपि पाठसिद्धं', नवरं परिमण्डलसंस्थानं वलयादिवत्, वृत्तमयोगोलकवत्, त्र्यस्त्रं—त्रिकोणं, शृङ्गाटकफलवत्- चतुरस्त्रं—समचतुष्कोणम्, आयतं—दीर्घमिति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मूल**—से किं तं जीवगुणप्पमाणे?, २ तिविहे पएणत्ते, तंजहा-णाणगुणप्पमाणे दंसणगुणप्पमाणे चरित्तगुणप्पमाणे। से किं तं णाणगुणप्पमाणे?, २ चउव्विहे पएणत्ते, तंजहा—पच्चक्खे अणुमाणे ओवम्मे आगमे। से किं तं पच्चक्खे?, २ दुविहे पएणत्ते, तंजहा—इंदिअपच्चक्खे अ णोइंदिअपच्चक्खे अ। से किं तं इंदिअपच्चक्खे? पंचविहे पएणत्ते, तंजहा—सोइंदिअपच्चक्खे चक्खुरिंदियपच्चक्खे घाणिंदिअपच्चक्खे जिब्भिंदिअपच्चक्खे फासिंदिअपच्चक्खे, से तं इंदियपच्चक्खे। से किं तं णोइंदियपच्चक्खे?, २ तिविहे पएणत्ते, तंजहा-ओहिणाणपच्चक्खे मणपज्जवनाणपच्चक्खे केवलणाण-पच्चक्खे, से तं णोइंदियपच्चक्खे, से तं पच्चक्खे।

**टीका**:—जीवस्य गुणाः—ज्ञानादयस्तद्रूपंप्रमाणं जीवगुणप्रमाणं तच्च ज्ञानदर्शनचारित्रगुणभेदात्त्रिधा, तत्र ज्ञानरूपो यो गुणस्तद्रूपं प्रमाण चतुर्विधं, तद्यथा--प्रत्यक्ष-मनुमानमुपानमागमः, तत्र 'अशू व्याप्तौ' वित्यस्य धातोरश्नुते--ज्ञानात्मना अर्थान् व्याप्नोतीति अक्षो जीव; 'अश-भोजने' इत्यस्य वा अश्नाति–भुङ्क्ते पालयति वा सर्वार्थानित्यक्षो-जीव एव प्रतिगतम्-आश्रितमक्षंप्रत्यक्षमिति, अत्यादयः क्रान्ताद्यर्थे द्वितीयये (का० रू० ४३०) तिसमासः, जीवस्यार्थसाक्षात्कारित्वेन यद् ज्ञानंवर्तते तत्प्रत्यक्षमित्यर्थः, अन्ये त्वक्षमक्षं प्रतिवर्तत इत्यव्ययीभावसमासं विदधति, तच्च न युज्यते, अव्ययीभावस्य नपुंसकलिङ्गत्वात्, प्रत्यक्षशब्दस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिलिङ्गता न स्यात्, दृश्यते चेयं, प्रत्यक्षा बुद्धिः प्रत्यक्षो बोधः प्रत्यक्षं ज्ञानमिति दर्शनात्, ततो यथादर्शितस्तत्पुरुष एवायं, तच्च प्रत्यक्षं द्विविधं- इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च, अत्रेन्द्रियं-श्रोत्रादि तन्निमित्तं-सहकारिकारणं यस्योत्पित्सोस्तदलिङ्गिकं शब्दरूपरसगन्धस्पर्शविषयज्ञानमिन्द्रियप्रत्यक्षम्, इदंचेन्द्रलक्षणजीवात् परं व्यतिरिक्तनिमित्तमाश्रित्योत्पद्यते इति धूमादाग्निज्ञानमिव वस्तुतोऽर्थसाक्षात्कारत्वाभावात् परोक्षमेव, केवल लोकेऽस्य प्रत्यक्षतया रूढत्वात् संव्यवहारतोऽत्रापि-तथोच्यत इत्यलंविस्तरेण, तदाकाङ्क्षिणा तु नन्द्यध्ययनमन्वेषणीयम्। इन्द्रिय प्रत्यक्षं तु यन्न भवति तन्नोइन्द्रियप्रत्यक्षं, नो शब्दस्यसर्वनिषेधपरत्वात् यत्रेन्द्रियं सर्वथैव न प्रवर्तते किन्तु जीव एव साक्षादर्थं पश्यति तन्नोइन्द्रियप्रत्यक्षं- अवधिमनःपर्यायकेवलाख्यमिति भावार्थः।

**मूल** :—से किं तं अणुमाणे ? २ तिविहे पण्णत्ते, तंजहा- पुव्ववं सेसवं दिट्ठसाहम्मवं। से किं तं पुव्ववं ? २ माया पुत्तं जहा नट्ठं, जुवाणं पुणारागयं। काई पच्चभिजाणेज्जा, पुव्वलिङ्गेण केणई ॥ ११५ ॥ तंजहा—खत्तेण वा वण्णेण वा लंछणेण वा मसेण वा तिलएण वा, से तं पुव्ववं। से किं तं सेसवं ?, २ पंचविहंपण्णत्तं, तंजहा—कज्जेणं कारणेणं गुणेणं अवयवेणं आसएणं। से किं तं कज्जेणं ?, संखं सद्देणं भेरिं ताडिएणं वसभं ढक्किएणं मोरं किंकाइएणं हयं हेसिएणं गयं गुलगुलाइएणं रहं घणघणाइएणं, से तं कज्जेणं। से

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं तं कारणेणं ?, २ तंतवो पडस्स कारणं ण पडो तंतुकारणं वीरणा कडस्स कारणं ण कडो वीरणाकारणं मिप्पिंडो घडस्स कारणं ण घडो मिप्पिंडकारणं, से तं कारणेणं । से किं तं गुणेणं?, २ सुवएणं निकसेणं पुप्फं गंधेणं लवणं रसेणं मइरं आसायएणं वत्थं फासेणं, से तं गुणेणं। से किं तं अवयवेणं?, २ महिसं सिंगेणं कुकुडंसिहाएणं हत्थिं विसाणेणं वराहं दाढाए मोरं पिच्छेणं आसं खुरेणं वग्घंनहेणं चमरिं वालग्गेणं वाणरं लंगुलेण दुपयं मणुस्सादि चउपयं गवमादि बहुपयं गोमि आदि सीहं केसरेणं वसहं कुक्कुहेणं महिलं वलयवाहए, गाहा—परिअरबंधेण भडं जाणिज्जा महिलिअं निवसणेणं। सित्थेण दोणपागं कविं च एक्काए गाहाए ॥ ११६ ॥

से तं अवयवेणं । से किं तं आसएणं ?, २ अग्गिं धूमेणं सलिलं वलागेणं वुट्ठिं अब्भविकारेणं कुलपुत्तं सीलसमायारेणं [इङ्गिताकारितैर्ज्ञेयैः, क्रियाभिर्भाषितेन च । नेत्र वक्त्र विकारैश्च-गृह्यतेऽन्तर्गतंमनः ॥ १ ॥ ] से तं आसएणं । से तं सेसवं ।

टीका :-—अनु-लिङ्गग्रहणसम्बन्धस्मरणस्य पश्चान्मीयते-परिच्छिद्यते वस्त्वनेनेति अनुमानं, तच्चत्रिविधं पूर्ववत् शेषवत् दृष्टसाधर्म्यवच्चेति। से किं तं पुव्ववं' मित्यादि, विशिष्टं पूर्वोपलब्धं चिन्हमिह पूर्वमुच्यते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेव निमित्तरूपतया यस्यानुमानस्यास्ति तत्पूर्ववत्, तद्द्वारेण गमकमनुमानं पूर्ववदिति भावः । तथा चाह 'माता पुत्र' मित्यादिश्लोक; यथा माता स्वकीयं पुत्र बाल्यावस्थायां नष्टं युवानं सन्तं कालान्तरेण पुनः कथमप्यागतं काचित्तथाविधस्मृतिपाटववती, न सर्वाः, पूर्वदृष्टेन लिङ्गेन केनचित् क्षतादिना प्रत्यभिजानीयात्—मत्पुत्रोऽयमिति अनुमिनुयादित्यर्थः, केन पुनर्लिङ्गेनेत्याह—'क्षतेन वे' त्यादि, स्वदेहोद्भवमेव क्षतं, आगन्तुकस्तु श्वदंष्ट्रादिकृतो व्रणः, लाञ्छनमषतिलकास्तु प्रतीताः, तदयमत्र प्रयोगो--मत् पुत्रोऽयम्, अनन्यसाधारणक्षतादिलक्षणविशिष्टलिङ्गोपलब्धेरिति, साधर्म्यवैधर्म्यदृष्टान्तयोः सत्त्वेतराभावादयमहेतुरिति चेत्, नैवं, हेतोःपरमार्थैकलक्षणत्वात्, तद्वलेनैव गमकत्वोपलब्धेः, उक्तं च न्यायवादिना पुरुषचन्द्रेण—" अन्यथाऽनुपपन्नत्वमात्रं हेतोः स्वलक्षणम् । सत्वासत्वे हितद्धर्मौ, दृष्टान्तद्वयलक्षणे ॥ १ ॥ तद्धर्माविति—अन्यथाऽनुपन्नत्वधर्मौ, कथम्भूते सत्वासत्वे इत्याह—साधर्म्यवैधर्म्यरूपे दृष्टांतद्वये लक्ष्यते—निश्चीयते [ अथ यदि ] दृष्टांतद्वय लक्षणेन च धर्मिसत्तायां धर्माः सर्वेऽपि सर्वदा भवन्त्येव, पटादेः शुक्लत्वादिधर्मैर्व्य (व्य) भिचारात; ततो दृष्टांतयोः सत्वासत्वधर्मौ यद्यपि क्वचिद्धेतौ न दृश्येते तथापि धर्मिस्वरूपमन्यथानुपपन्नत्वं भविष्यतीति न कश्चिद्विरोध इति भावः । यत्रापि धूमादौ दृष्टांतयोः सत्वासत्वे हेतोर्दृश्येते तत्रापि साध्यान्यथानुपपन्नत्वस्यैव प्राधान्यात्तस्यैवैकस्य हेतुलक्षणता ऽवसेया, तथा चाह—"धूमादेर्यद्यपि स्यातां, सत्वासत्वे स्वलक्षणे । अन्यथानुपपन्नत्वप्राधान्याल्लक्षणैकता ॥१॥ किंच यदि दृष्टान्ते सत्वासत्वदर्शनाद्धेतुर्गमक इष्यते तदालोहलेख्यं वज्रं पार्थिवत्वात् काष्ठादिवदित्यादेरपि गमकत्वं स्यात्, अभ्यधायिच-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"दृष्टान्ते सदसत्वाभ्यां, हेतुःसम्यग् यदीष्यते । लोहलेख्यंभवेद्वज्रं, पार्थिवत्वाद् द्रुमादिवद्" ॥२॥ इति । यदिच—पक्षधर्मत्वसपक्षसत्वविपक्षासत्वलक्षणंहेतोस्त्रैरूप्यमभ्युपगम्यापियथोक्तदोषभयात् साध्येन सहान्यथानुपपन्नत्वमन्वेषणीयं तर्हि तदेवैकं लक्षणतयावक्तुमुचितं-किंरूपत्रेयणेति, आहच–"अन्यथानुपपन्नत्वं, यत्र तत्र त्रयेण किं ? । नान्यथानुपपन्नत्वं, यत्र तत्र त्रयेण किम् ? ॥१॥" इत्यादि, अत्रबहुवक्तव्यं तत्तु नोच्यते, ग्रन्थगहनताप्रसङ्गात , अन्यत्र यत्नेनोक्तत्वाच्चेति । आह–प्रयत्नक्षविषयत्वादेवात्रानुमानप्रवृत्तिरयुक्ता, नैवं, पुरुषपिण्डमात्रप्रत्यक्षतायामपिमत्पुत्रो न वेति सन्देहाद्युक्त एवानुमानोपन्यास इति कृतं प्रसङ्गेन । 'से किं तं सेसव' मित्यादि, पुरुषार्थोपयोगिनःपरिजिज्ञासितात्तुरगादेरथादन्यो हेषितादिरर्थः शेष इहोच्यते, सगमकत्वेन यस्यास्ति तच्छेषवदनुमानं, तच्च पंचविधं, तद्यथा,—कार्येणेत्यादि, तत्र कार्येणकारणानुमानं यथा—हयम्—अश्वं हेषितेन अनुमिनुते इत्यध्याहारः, हेषितस्य तत्कार्यत्वात्, तदाकर्ण्य हयोऽत्रेति या प्रतीतिरूत्पद्यते तदिह कार्येण—कार्यद्वारेणोत्पन्नं शेषवदनुमानमुच्यते इति भावः, कचित्तु प्रथमतः शंख शब्देनेत्यादि दृश्यते तत्रोक्तानुसारतः सर्वोदाहरणेषु भावना कार्या । 'से किं तं कारणेण' मित्यादि, इह कारणेनकार्यमनुमीयते, यथा विशिष्टमेघोन्नतिदर्शनात कश्चित् वृष्ट्यनुमानं करोति, यदाह—"रोलम्बगवलव्यालतमालमलिनत्विषः । वृष्टिं व्यभिचरन्तीह, नैव प्रायाः पयोमुचः ॥ १ ॥" इति, एवं चन्द्रोदयाज्जलधेर्वृद्धिरनुमीयते कुमुद विकाशश्च, मित्रोदयाज्जलरूहप्रबोधोघूकमदमोक्षश्च, तथाविधवर्षणात् सस्यनिष्पत्तिः—कृषिवलमनःप्रमोदश्चेत्यादि, तदेवं कारणमेवेहानुमापकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साध्यस्यनाकारणं, तत्र कार्यकारणभाव एव केषांचिद् विप्रतिपत्तिं पश्यँस्तमेव तावन्नियतं दर्शयन्नाह—तन्तवः पटस्य कारणं नतु पटस्तन्तूनां कारणम् पूर्वमनुपलब्धस्य तस्यैवतद्भावेउपलम्भाद्, इतरेषांतु पटाभावेऽप्युपलम्भाद् अत्राह— ननुयदा कश्चिन्निपुणः पटभावेन संयुक्तानपि तन्तून् क्रमेणवियोजयति तदा पटोऽपि तन्तूनां कारणं भवत्येव, नैवं,—सत्वेनोपयोगाभावात्, यदेवहि लब्धसत्ताकं—सत्स्वास्थांतभावेन कार्यमुपकुरुते तदेव तस्य कारण-त्वेनोपदिश्यते, यथा मृत्पिण्डोघटस्य, ये तु तन्तुवियोगतोऽभावीभवता पटेन तन्तवः समुत्प—द्यन्ते तेषां कथं पटः कारणं निर्दिश्यते,नहिज्वराभावेन भवत आरोगिता-सुखस्य ज्वरः कारणमिति शंक्यते वक्तुं, यद्येवं पटेऽप्युपद्यमाने तन्तवोऽभावी भवन्तीति तेऽपि तत्कारण न स्युरिति चेत्, नैवं, तन्तु-परिणामरुप एवहि पटो यदि च तन्तवः सर्वथाऽभावी भवेयुस्तदा मृद्भावे घटस्येव पटस्य सर्वथैवोपलब्धिर्न स्यात्, तस्मात् पटकालेऽपि तन्तवः सन्तीति सत्येनोपयोगात्ते पटस्य कारणमुच्यन्ते, पटवियोजनकाले त्वेकैकतंत्ववस्थायां पटो नोपलभ्यते अतस्तत्र सत्वेनोपयोगाभावान्नासौ-तेषां कारणं, एवं वीरणकटादिष्वपि भावना कार्या, तदेवं यद्यस्य कार्यस्य कारणत्वेन निश्चितं तत्तस्य यथा सम्भव गमकत्वेन वक्तव्यतमिति । 'से किं तं गुणेणं' मित्यादि, निकषः—कषणपट्टगताकषितसुवर्णरेखा तेन सुवर्णमनुमीयते, यथा पञ्चदशादिवर्णकोपेतमिदं सुवर्णं, तथाविधनिकषो-पलम्भात्, पूर्वोपलब्धोभयसम्मतसुवर्णवत्, एवं शतपत्रिकादि पुष्पमत्र, तथा विधगन्धोपलम्भात्, पूर्वोपलब्धवस्तुवत्, एवं लवणमदिरावस्त्रादयो-ऽनेकभेदसम्भवतोऽनियतस्वरूपा अपि प्रतिनियत तथाविध रसास्वादस्पर्श-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिगुणोपलब्धेः प्रतिनियतस्वरूपाः साधयितव्याः । ' से किं तं अवयवेणं' मित्यादि, अवयवदर्शनेनावयवी अनुमीयते, यथा महिषः, अत्र तदविनाभूतशृङ्गोपलब्धेः, पूर्वोपलब्धोभयसम्मतप्रदेशवत्, अयंचप्रयोगो-वृत्तिवरण्डकाद्यन्तरितत्वादप्रत्यक्ष एवावयविनि द्रष्टव्यः; तत्प्रत्यक्षतायाम-ध्यक्षत एव तत् सिद्धेरनुमानवैयर्थ्यप्रसङ्गादिति एवं शेषोदाहरणान्यपि भावनीयानि, नवरं द्विपदंमनुष्यादीत्यादि, मनुष्योऽयंतदविना भूतपद द्वयोपलंभात्, पूर्वदृष्टमनुष्यवत् एवं चतुष्पदबहुपदेष्वपि, ' गोम्ही' कर्णशृगाली, 'परियरवंधेणभड' मित्यादि, गाथा पूर्वं व्याख्यातैव, तदनुसारेणभावर्थोऽप्यूह्य इति, । 'से किं तं आसएणं' मित्यादि, आश्रयतीत्याश्रयो-धूमवलाकादिः, तत्र धूमादग्न्यनुमानं वलाकादेस्तु जला-द्यनुमानंप्रतीतमेव, आकारेङ्गितादिभिश्चपूर्वव्याख्यातस्वरूपैर्देवदत्ताद्या-श्रितैस्तदन्तर्गतमनोऽनुमानंसुप्रसिद्धमेव, अत्राह—ननु-धूमस्याग्निकार्य त्वात्पूर्वोक्तकार्यानुमानएव गतत्वात् किमिहोपन्यासः ?, सत्यं, किन्त्वग्न्या-श्रयत्वेनापि लोके तस्यरूढत्वादत्राप्युपन्यासः कृत इत्यदोषः, तदेतत् शेषवदनुमानम् ।

**मूलः**—से किं तं दिट्ठ साहम्मवं ?, २ दुविहं पएणत्तं, तं जहा सामन्नदिट्ठं च विसेसदिट्ठं च । से किं तं सामएण-दिट्ठं ?, २ जहा एगो पुरिसो तहा बहवे पुरिसा जहा बहवे पुरिसा तहा एगो पुरिसो जहा एगो करिसावणो तहा बहवे करिसावणा, जहा बहवे करिसावणा-तहा एगो करिसावणो, से तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सामण्णदिट्ठं । से किं तं विसेसदिट्ठं ?, २ से जहाणामए केई पुरिसे कंचि पुरिसं बहूणं पुरिसाणंमज्झे पुव्वदिट्ठं पच्चभिजाणेज्जा-अयं से पुरिसे बहूणं करिसावणाणं मज्झे पुव्वदिट्ठं करिसावणं पच्चभिजाणिज्जा अयं से करिसावणे । तस्स समासओ तिविहं गहणं भवइ, तं जहा—अतीयकालगहणं पडुप्पण्णकालगहणं अणागय कालगहणं । से किं तं अतीय कालगहणं ?, २ उत्तणाणि वणाणि निप्फण्ण सस्सं वा मेडणिं पुण्णाणि अ कुण्डसरणई दीहिआतडागाईपासित्ता तेणं साहिज्जइ जहा—सुवुट्ठी आसी, से तं अतीय कालगहणं । से किं तं पडुपण्णकालगहणं ?, २ साहुं गोअरग्गयं विच्छड्डिअपउरभत्तपाणं पासित्ता तेणं साहिज्जइ जहा सुभिक्खे वट्टई, से तं पडुप्पण्ण काल गहणं । से किं तं अणागयकाल गहणं ?, २ अब्भस्स निम्मलत्तं कसिणा य गिरी सविज्जुआ मेहा । थणियं वा उब्भामो संज्झा रत्ता पणिट्ठा (द्धा) य ॥ ११७ ॥ वारुणं वा महिंदं वा अण्णयरं वा पसत्थं उप्पायं पासित्ता तेणं साहिज्जइ जहा—सुवुट्ठी भविस्सइ, से तं—अणागयकालगहणं । एएसिं चेव विवज्जासे तिविहं—गहणं भवइ, तं जहा—अतीयकाल गहणं पडुप्पण्ण कालगहणं अणागयकाल गहणं । से किं तं अतीयकालगहणं ?, नित्तिणाइं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वणाइं अनिप्फरणसस्सं वा मेइणीं सुक्काणि अ कुंडसरण–ईदीहिअतडागाइं पासित्ता तेणं साहिज्जइ जहा–कुवुट्ठी आसी, से तं अतीयकालगहणं। से किं तं पडुप्पण्ण कालगहणं ?, २ साहुँ गोअरग्गगयं भिक्खं अलभमाणं पासित्ता तेणं साहिज्जइ जहा–दुब्भिक्खेवट्टइ, से तं पडुप्पण्ण काल गहणं। से किं तं अणागयकालगहणं ?, धूमायंतिदिसाओ सं (?) विअमेइणी अपडिवद्धा। वाया नेरइआ खलु कुवुट्ठीमेवंनिवेयंति ॥ ११८ ॥ अग्गेयं वा वायव्वं वा अण्णयरं वा अपसत्थं–उप्पायं पासित्ता तेणं साहिज्जइ जहा–कुवुट्ठीभविस्सइ, से तं अणागयकाल गहणं, से तं विसेसदिट्ठं, सेतं दिट्ठसाहम्मवं, से तं अणुमाणे।

टीका :—दृष्टेन पूर्वोपलब्धेनार्थेन सह साधर्म्यं दृष्टसाधर्म्यं, तद् गमकत्वेन विद्यते यत्र तद् दृष्टसाधर्म्यवत्, पूर्वदृष्टश्चार्थः कश्चित् सामान्यतः कश्चित्तु विशेषतो दृष्टःस्यात्, अतस्तद्भेदादिदं द्विविधं, सामान्यतो दृष्टार्थयोगात् सामान्यदृष्टं, विशेषतो दृष्टार्थयोगात् विशेषदृष्टं तत्र सामान्यदृष्टं यथा एकः पुरुषस्तथा वहवः पुरुषा इत्यादि, इदमुक्तं भवति–नालिकरेद्वीपादायातः कश्चित् तत्प्रथमतया सामान्यतः एकं कञ्चन पुरुषं दृष्ट्वा अनुमानं करोति यथा अयमेकः परिदृश्यमानः पुरुष एतदाकारविशिष्टस्तथा वहवोऽत्रापरिदृश्यमाना अपि पुरुषा एतदाकार–सम्पन्ना एव, पुरुषत्वाविशेषाद्, अन्याकारत्वे पुरुषत्वहानिप्रसङ्गात्, गवादिवत्, बहुषु तु पुरुषेषु तत्प्रथमतो वीक्षितेष्वेवमनुमिनोति यथाऽमी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिदृश्यमाना पुरुषा एतदाकारवन्तः तथाऽपरोऽप्येकः कश्चित् पुरुषः एतदाकारवानेव, पुरुषत्वात् , अपराकारत्वेतद्धानिप्रसङ्गात् , अश्वादिव-दिति, एवंकार्षापणादिष्वपिवाच्यं, विशेषतो दृष्टमाह—' से जहानामए' इत्यादि, अत्र पुरुषाः सामान्येन प्रतीता एव, केवलं यदा कश्चित् कचित्-कश्चित् पुरुषविशेषं दृष्ट्वा तद्दर्शनाहितसंस्कारोऽसंजाततत्प्रमोषः समयान्तरे वहुपुरुषसमाजमध्ये तमेवपुरुषविशेषमासीनमुपलभ्यानुमानयति—यः पूर्वमयोपलब्धः स एवायं पुरुषः, तथैव प्रत्यभिज्ञायमानत्वात् , उभयाभिमत पुरुषवदिति, एतत्तदा विशेषदृष्टमनुमानमुच्यते, पुरुषविशेष-विषयत्वाद्, एवं कार्षापणादिष्वपि वाच्यं । तदेवमनुमानस्य त्रैविध्यमुप-दर्श्यसाम्प्रतं तस्यैव कालत्रयविषयतां दर्शयन्नाह—' तस्स समासओ तिविहं गहणं' मित्यादि, तस्येतिसामान्येनानुवर्तमानमनुमानमात्रं सम्बध्यते, तस्यानुमानस्य त्रिविधं ग्रहणं भवति, तद्यथा—अतीतकालविषयं ग्रहणं—ग्राह्यस्य वस्तुनः परिच्छेदोऽतीतकालग्रहणं, प्रत्युत्पन्नो—वर्तमान कालस्तद्विषयं ग्रहणंप्रत्युत्पन्नकालग्रहणं,अनागतो—भविष्यत्कालस्तद्विषयंग्रहणमनागतकालग्रहणम् , कालत्रय वर्तिनोऽपि विषयस्यानुमानात् , परिच्छेदो भवतीत्यर्थः, तत्र 'उत्तिणाइं' ति उद्गतानि तृणानि येषु वनेषु तानि तथा, अयमत्र प्रयोगः—सुवृष्टि-रिहासीद् , उत्तृणवननिष्पन्नसस्य पृथ्वीतलजलपरिपूर्णकुण्डादिजलाशय प्रभृतितत्कार्यदर्शनात् अभिमतदेशवदित्यतीतस्य वृष्टिलक्षण विषयस्य-परिच्छेदः, साधुं च 'गोचराग्रगतं' भिक्षाप्रविष्टं विशेषेण छर्दितानि—गृहस्थैर्दत्तानि प्रचुरभक्तपानानि यस्य स तथा तं तादृशं दृष्ट्वा कश्चित् साधयति—सुभिक्षमिह वर्तते, साधूनां तद्धेतुकप्रचुरभक्तपानलाभदर्शनात् ,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वदृष्टप्रदेशवदिति । 'अब्भस्स निम्मलत्तं' गाहा सुगमा, नवरं स्तनितं— मेघगर्जितं 'वाउब्भामो' त्ति तथाविधो वृष्टयव्यभिचारी प्रदक्षिणं 'दक्षु भ्रमन् प्रशस्तो वातः 'वारुणं' ति आर्द्रामूलादिनक्षत्रप्रभवं माहेन्द्ररोहिणीज्येष्ठादिनक्षत्रसम्भवं अन्यतरमुत्पातम् उल्कापातदिग्दाहादिकं प्रशस्तं वृष्टयव्यभिचारिणम् दृष्ट्वाऽनुमीयते, यथा—सुवृष्टिरत्रभविष्यति, तदव्यभिचारिणामभ्रनिर्मलत्वादीनां समुदितानामन्यतरस्य वा दर्शनात् , यथाऽन्यदेति, विशिष्टा ह्यभ्रनिर्मलत्वादयो वृष्टिं न व्याभिचरन्त्यतः प्रतिपत्त्रैव तत्र निपुणेन भाव्यमिति, 'एएसिंचेव विवज्जासे' इत्यादि, एतेषामेवोक्तगवनादीनामतीतवृष्टयादिसाधकत्वेनोपन्यस्तानां हेतूनां व्यत्यासे—व्यत्यये साध्यस्यापि व्यत्ययः साधयितव्योः यथा कुवृष्टिरिहासीन्निस्तृणवनादिदर्शनादित्यादिव्यत्ययः सूत्रसिद्धो नवरमनागतकालग्रहणे माहेन्द्रवारुणपरिहारेणाग्नेयवायव्योत्पाता उपन्यस्ताः तेषां वृष्टिविघातकत्वादितरेषां सुवृष्टिहेतुत्वादिति । 'से तं विसेसदिट्ठं, से तं दिट्ठसाहम्मव' मित्येतन्निगमनद्वयं दृष्टसाधर्म्यलक्षणानुमानगतभेदत्र (द्व) यस्य समर्थनानन्तरं युज्यते, यदि तु सर्ववाचनास्वत्रैव स्थाने दृश्यते, तदादृष्टसाधर्म्यवतोऽपि सभदेस्यानुमानविशेषत्वात् , कालत्रयविषयता योजनीयैवातस्तामप्यभिधाय ततो निगमनद्वयमिदमकारीति प्रतिपत्तव्यम् तदेतदनुमानयिति ।

अथोपमानमभिधित्सुराह—

**मूलः—से किं तं ओवम्मे ? २ दुविहे पण्णत्ते तं जहा साहम्मोवणीए अ वेहम्मोवणीए अ । से किं तं साहम्मोवणीए ?,**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२ तिविहे पण्णत्ते, तं जहा—किंचिसाहम्मोवणीए पायसाहम्मोवणीए सव्वसाहम्मोवणीयए । से किं तं किंचिसाहम्मोवणीए ?, २ जहामंदरो तहा सरिसवो जहा सरिसवो तहा मंदरो जहा समुद्दो तहा गोप्पयं जहा गोप्पयं तहा समुद्दो जहा आइच्चो तहा खज्जोतो जहा खज्जोतो तहा आइच्चो, जहा चन्दो तहा कुमुदो जहा कुमुदो तहा चंदो, से तं किंचिसाहम्मो० । से कि तं पायसाहम्मोवणीए ?, २ जहा गो तहा गवओ जहा गवओ तहा गो, से तं पायसाहम्मो० । से किं तं सव्वसाहम्मोवणीए ? २ सव्वसाहम्मे ओवम्मे नत्थि, तहावि तेणेव तस्स ओवम्मं कीरइ जहा अरिहंतेहिं अरिहंतसरिसं कयं चक्कवट्टिणा चक्कवट्टिसरिसं कयं, बलदेवेण बलदेवसरिसं कयं, वासुदेवेणा वासुदेवसरिसं कयं साहुणा साहुसरिसं कयं से तं सव्वसाहम्मे, से तं साहम्मोवणीए । से किं तं वेहम्मोवणीए ?, २ तिविहे पण्णत्ते, तं जहा—किंचिवेहम्मे पायवेहम्मे सव्ववेहम्मे । से किं तं किंचिवेहम्मे ? २ जहा सामलेरो न तहा बाहुलेरो, जहा बाहुलेरो न तहा सामलेरो, से तं किंचि वेहम्मे । से किं तं पाय वहम्मे ? जहा वायसो न तहा पायसो, जहा पायसो न तहा वायसो, से तं पायवेहम्मे । से किं तं सव्ववेहम्मे ?,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२ सव्ववेहम्मे ओवम्मे नत्थि, तहावि तेणेव तस्स ओवम्मं कीरइ, जहा णीएणं णीअसरिसं कयं दासेण दाससरिसं कयं काकेण काकसरिसं कयं सारेण साणसरिसं कयं पाणेण पाणसरिसं कयं, से तं सव्ववेहम्मे। से तं वेहम्मोवणीए। से तं ओवम्मे।

टीका :—उपमीयते—सदृशतया वस्तु गृह्यते अनयेत्युपमा सैवो पम्यं, तच्च द्विविधं—साधर्म्येणोपनीतमुपनयो यत्र तत् साधर्म्यो-पनीतं वैधर्म्येणोपनीतम्—उपनयो यत्र तद्वैधर्म्यम्योपनीतम् तत्र साध—र्म्योपनीतं त्रिविधं—किञ्चित् साधर्म्यादिभेदात्, किंचित् साधर्म्यंच मंदर सर्षपादीनां, तत्र मंदर सर्षपयोर्द्वयोरपि मूर्तत्वं सादृश्यं, समुद्र गोष्पदयोः सोदकत्वमात्रम्, आदित्यखद्योतयोराकाशगमनोद्योतकत्वरूपं, चन्द्रकुमुदयोः शुक्लत्वमिति। 'से किं तं पायसाहम्मे' इत्यादि, खुरककुदविषाणलाङ्गु—लादेर्द्वयोरपि समानत्वात्, नवरं सकम्वलोगोवृत्तकण्ठस्तुगवय इति प्रायः साधर्म्यता। सर्व साधर्म्यन्तु क्षेत्रकालादिभिर्भेदात् न कस्यापि केनचित् सार्द्धं संभवति, सम्भवेत्वेकता प्रसङ्गः तर्हि—उपमानस्य तृतोय—भेदोपन्यासोऽनर्थक एवेत्यशङ्कयाह—तथापि तस्य विवक्षितस्यार्हदादे—स्तेनैवअर्हदादिना औपम्यं क्रियते, तद्यथा—'अर्हता अर्हत्सदृशंकृतं' तत् किमपि सर्वोत्तमं तीर्थप्रवर्तनादि कार्यमर्हता कृतं यदर्हन्नेव करोति नापरः कश्चिदिति भावः, एवं च स एव तेनोपमीयते, लोकेऽपिहिकेनचिदत्यद्—भुते कार्ये कृते वक्तारो दृश्यन्ते—तत् किमपीदं भवद्भिः कृतं यद्भवन्त एव कुर्वन्ति नान्यः कश्चिदिति, एवं चक्रवर्तिवासुदेवादिष्वपि वाच्यम्' से किं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं वेहम्मोवणीए' इत्यादि, यथेति—यादृशः शवलायाः गोरपत्यं शाबलेयो न तादृशो वहुलाया अपत्यं बाहुलेयो, यथाचायं न तथेतरः, अत्रचशेष—धर्मैस्तुल्यत्वाद्भिन्ननिमित्तजन्मादिमात्रतस्तु—वैलक्षण्यात् किंचिद् वैधर्म्यं भावनीयम्, 'से किं तं पायवेहम्मे' इत्यादि, अत्र वायसपायसयोः सचेतन-त्वाचेतनत्वादिभिर्वहुभिर्धर्मैर्विसंवादात् अभिधानगतवर्णद्वयेन सत्वादि मात्रतश्च साम्यात्प्रायो वैधर्म्यता भावनीया. सर्ववैधर्म्यन्तु न कस्यचित् केनापि संभ्वति, सत्त्वप्रमेयत्वादिभिः सर्वभावानां समानत्वात्. तैरप्य—समानत्वेऽसत्वप्रसङ्गात्, तथापि तृतीयभेदोपन्यास वैयर्थमाशंक्याह—तथापि तस्य तैनैवोपम्यंक्रियते यथा नीचेन नीचसदृशं कृतं गुरुघातादि-इत्यादि. आह—नीचेन नीचसदृशं कृतमित्यादि ब्रुवता साधर्म्यमेवोक्तं स्यान्न बैधर्म्यं, सत्यं, किन्तुनीचोऽपिप्रायो नैवं विधं महा पापमाचरति किंपुनरनीच;? ततः सकल जगद्विलक्षण प्रवृत्तत्वविवक्षया वैधर्म्यमिह भावनीयम्, एवं दासाद्युदाहरणेष्वपिवाच्यम् । 'से तं सव्ववेहम्मे' इत्यादि निगमनत्रयम् ।

**मूल:**—से किं तं आगमे ?, २ दुविहे पण्णत्ते, तं जहा-लोइए अ लाउत्तरिए अ । से किं तं लोइए ?, २ जण्णं इमं अण्णाणिएहिं मिच्छादिट्ठिएहिं सच्छंदवुद्धिमइविगप्पियं, तंजहा—भारहं रामायणं जाव चत्तारि वेआ संगोवंगा, से तं लोइए आगमे । से किं लोउत्तरिए ?, २ जण्णं इमं अरिहंतेहिं भगवंतेहिं उप्पण्णणाणदंसणधरेहिंतीयपच्चुप्पण्णमणागयजा-णएहिं तिलुक्कवहिमहिअपूइएहिं सव्वए हिं सव्वदरसीहिं पणीअं दुवालसंगंगणिपिडगं, तंजहा—आयारो जाव दिट्ठि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णाओ । अहवा आगमे तिविहे पएणत्ते, तंजहा—सुत्तागमे अत्थागमे तदुभयागमे । अहवा—आगमे तिविहे पएणत्ते, तंजहा—अत्तागमे अणंतरागमे परंपरागमे, तित्थगराणं अत्थस्स अत्तागमे गणहराणं सुत्तस्स अत्तागमे अत्थस्स अणंतरागमे गणहरसीसाणं सुत्तस्स अणंतरागमे अत्थस्स परंपरागमे, तेण परं सुत्तस्सवि अत्थस्सवि णो अत्तागमे णो अणंतरागमे परंपरागमे, से तं लोगुत्तरिए, से तं आगमे, से तं णाणगुणप्पमाणे ॥

टीका:—गुरुपारम्पर्येणागच्छतीत्यागमः, आ-समन्तात् गम्यन्ते -ज्ञायन्ते जीवादयः पदार्था अनेनेति वा आगमः, अयं च द्विधा प्रज्ञप्तः, तद्यथा—'लोइए' इत्यादि, इदं चेहैव पूर्वं भावश्रुतं विचारयता व्याख्यातं, यावत् से तं लोइए, से किं तं लोगुत्तरिए आगमेत्ति; 'अहवा आगमे तिविहे' इत्यादि, तत्र सूत्रमेव सूत्रागमः, तदभिधेयश्चार्थ एवार्थागमः, सूत्रार्थोभयरुपस्तु तदुभयागमः, अथवा अन्येन प्रकारेणागमस्त्रिविधः प्रज्ञप्तः तद्यथा—आत्मागम इत्यादि, तत्र गुरूपदेशमन्तरेणात्मन एव आगम आत्मागमो, यथा—तीर्थङ्कराणामर्थस्यात्मागमः, स्वयमेवकेवलो ( लेनो ) पलब्धेः, गणधराणां तु सूत्रस्यात्मागमः, स्वयमेव ग्रथितत्वाद् , अर्थस्यानन्तरागमः, अनन्तरमेव तीर्थकरादागतत्वाद् , उक्तं च—"अत्थंभासइ अरहा सुत्तं गंथंति गणहरा निउणं" मित्यादि, गणधरशिष्याणां जम्बूस्वामिप्रभृतीनां सूत्रस्यानन्तरागमः, अव्यवधानेन गणधरादेवश्रुतेः, अर्थस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परम्परागमः गणधरेणैव व्यवधानात्, तत ऊर्ध्वं प्रभवादीनां सूत्रस्यार्थस्य च नात्मागमो नानन्तरागमः, तल्लक्षणायोगात्, अपितु परम्परागम एव, अनेन चागमस्य तीर्थकरादिप्रभवत्वभणनेनैकान्तापौरुषेयत्वं निवारयति, पौरुषताल्वादिव्यापारमन्तरेण नभसीव विशिष्टशब्दानुपलब्धेः, ताल्वादिभिरभिव्यज्यत एव शब्दो नतु क्रियते इति चेत्, ननु यद्येवं तर्हि सर्वत्रचसामपौरुषेयत्वप्रसङ्गः, तेषां भाषापुद्गलनिष्पन्नत्वाद्, भाषापुद्गलानां च लोके सर्वदैवावस्थानतोऽपूर्वक्रियमाणताऽयोगेन ताल्वादिभिरभिव्यक्तिमात्रस्यैव निर्वर्तनात्, नच वक्तव्यं—वचनस्य पौद्गलिकत्वमसिद्धम्, महाध्वनिपटलपूरितश्रवण बाधिर्यं कुड्यस्खलनाद्यन्यथानुपपत्तेः, तस्मान्नैकान्तेनापौरुषेयमागमवचः, ताल्वादिव्यापाराभिव्यंग्यत्वात्, देवदत्तादिवाक्यवत्, इत्याद्यत्र बहुवक्तव्यं तत्तु नोच्यते स्थानान्तरनिर्णीतत्वादिति । 'से तं लोगुत्तरिए' इत्यादि निगमनत्रयम् ।। उक्तं ज्ञानगुणप्रमाणमथ दर्शगुणप्रमाणमाह—

**मूलः**—से किं तं दंसणगुणप्पमाणे?, २ चउव्विहे पण्णत्ते, तंजहा—चक्खुदंसणगुणप्पमाणे अचक्खुदंसणगुणप्पमाणे ओहिदंसणगुणप्पमाणे केवलदंसणगुणप्पमाणे चक्खुदंसणं चक्खुदंसणिस्स घडपडकडरहाइएसु दव्वेसु अचक्खुदंसण अचक्खुदंसणिस्स आयभावे ओहिदंसणं ओहिदंसणिस्स सव्वरुविदव्वेसु न पुण सव्वपज्जवेसु केवलदंसणं केवलदंसणिस्स सव्वदव्वेसु अ सव्वपज्जवेसु अ, से तं दंसणगुणप्पमाणे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका:—दर्शनावरणकर्म क्षयोपशमादिजं सामान्यमात्रग्रहणं दर्शनमिति, उक्तं च—'जं सामन्नगहणं भावाणं नेय कट्टुमागारं। अविसेसिऊण अत्थे दंसणमिइ वुच्चए समए ॥१॥ तदेवात्मनो गुणः स एव प्रमाणं दर्शनगुणप्रमाणम्, इदं च चक्षुर्दर्शनादिभेदाच्चतुर्विधम्, तत्र भावचक्षुरिन्द्रियावरणक्षयोपशमाद् द्रव्येन्द्रियानुपघाताच्च चक्षुर्दर्शनिनः—चक्षुदर्शनलब्धिमतो जीवस्य घटादिषु द्रव्येषु चक्षुषो दर्शनं चक्षुर्दर्शनम्, भवतीति क्रियाध्याहारः, सामान्यविषयत्वेऽपि चास्य यद् घटादिविशेषाभिधानं तत्सामान्यविशेषयोः कथञ्चिद्भेदादेकान्तेन विशेषेभ्यो व्यतिरिक्तस्य सामान्यस्याग्रहणख्यापनार्थम्, उक्तं च—"निर्विशेषं विशेषाणां ग्रहोदर्शनमुच्यते" इत्यादि, चक्षुवर्जशेषेन्द्रिय चतुष्टयं मनश्चचक्षुरुच्यते, तस्य दर्शनमचक्षुर्दर्शनं, तदपि भावाचक्षुरिन्द्रियावरणक्षयोपशमात् द्रव्येन्द्रियानुपघाताच्च अचक्षुर्दर्शनिनः—अचक्षुर्दर्शनलब्धिमतो जीवस्यात्मभावे भवति, आत्मनि—जीवे भावः—संश्लिष्टतया सम्बन्धो, विषयस्य घटादेरिति गम्यते, तस्मिन् सति इदं प्रादुर्भवतीत्यर्थः-इदमुक्तं भवति—चक्षुरप्राप्यकारि ततो दुरस्थमपि स्वविषयं परिच्छिनत्तीत्यस्यार्थस्य ख्यापनार्थं घटादिषु चक्षुर्दर्शनं भवतीति पूर्व विषयस्य भेदेनाभिधानं कृतं, श्रोत्रादीनि तु प्राप्यकारीणि ततो द्रव्येन्द्रिय संश्लेष द्वारेण जीवेन सह सम्बद्धमेव विषयं परिच्छिन्दन्तीत्येतद्दर्शनार्थमात्मभावे भवतीत्येवमिह विषयस्याभेदेन प्रतिपादनमकारीति, उक्तं च—"पुट्ठं सुणेइ सद्दं रुवं पुण पासई अपुट्ठं तु" इत्यादि। अवधेर्दर्शनमवधिदर्शनम्, अवधिदर्शनिनः— अवधिदर्शनावरणक्षयोपशमसमुद्भूतावधिदर्शनलब्धिमतो जीवस्य सर्वेष्वपि रुपिद्रव्येषु भवति, न पुनः सर्वपर्यायेषु, यतोऽ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वधेरुत्कृष्टतोऽप्येकवस्तुगताः संख्येया असंख्येया वा पर्याया विषयत्वेनोक्ताः, जघन्यतस्तु द्वौ पर्यायौ द्विगुणितौ. रुपरसगन्धस्पर्शलक्षणाश्चत्वारः पर्याया इत्यर्थः, उक्तं च "दव्वओ असंखेज्जे संखेज्जे आवि पज्जवे लहइ। दो पज्जवे दुगुणिए लहइ य एगाउ दव्वाओ ॥१॥ अत्राह—ननु पर्याया विशेषा उच्यन्ते, नच दर्शनं विशेषविषयं भवितुमर्हति, ज्ञानस्यैव तद्विषयत्वात्, कथमिहावधिदर्शनविषयत्वेन पर्याया निर्दिष्टाः, साधूक्तं, केवलं पर्यायैरपि घटशरावोदञ्चनादिभिर्मृदादिसामान्यमेव तथा तथा विशिष्यन्ते न पुनस्ते तत एकान्तेन व्यतिरिच्यन्ते, अतो मुख्यतः सामान्यं गुणीभूतास्तु विशेषा अप्यस्य विषयी भवन्तीति, ख्यापनार्थोऽत्र तदुपन्यासः केवलं—सकलदृश्यविषयत्वेन परिपूर्णं दर्शनं केवलदर्शनिनः-तदावरणक्षयाविर्भूततल्लब्धिमतो जीवस्य सर्वद्रव्येषु मूर्तामूर्तेषु सर्वपर्यायेषु च भवतीति। मनः पर्यायज्ञानं तु तथाविधक्षयोपशमपाटवात् सर्वदाविशेषा नेव गृह्णदुत्पद्यते न सामान्यं, अतस्तद्दर्शनं नोक्तमिति, तदेतद्दर्शनगुणप्रमाणम् ॥

**मूलः—से किं तं चरित्तगुणप्पमाणे ?, २ पंचविहे पण्णत्ते, तंजहा—सामाइअचरित्तगुणप्पमाणे छेओवट्ठावणचरित्तगुणप्पमाणे परिहारविसुद्धिअचरित्तगुणप्पमाणे सुहुमसंपराय चरित्तगुणप्पमाणे अहक्खायचरित्तगुणप्पमाणे। सामाइअचरित्तगुणप्पमाणे दुविहेपण्णत्ते, तंजहा—इत्तरिए अ आवकहिए अ। छेओवट्ठावणचरित्तगुणप्पमाणे दुविहे पण्णत्ते, तंजहा—**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साइआरे अ निरइआरे अ। परिहारविसुद्धि चरित्तगुणप्पमाणे दुविहे पण्णत्ते, तंजहा निव्विसमाण य निव्विट्ठकाइए अ। सुहुमसंपरायगुणप्पमाणे दुविहे पण्णत्ते, तंजहा—(संकिलिस्समाणए य विसुज्झमाणए य, अहक्खायचरित्तगुणप्पमाणे दुविहे पन्नत्ते, तंजहा—) पडिवाई अ अपडिवाई अ। (अहवा) अहक्खायचरित्तगुणप्पमाणे, दुविहे पण्णत्ते, तंजहा—छउमत्थिए अ केवलिए य। से तं चरित्तगुणप्पमाणे, से तं जीवगुणप्पमाणे, से तं गुणप्पमाणे (सू० १४४)

टीका :—चरन्त्यनिन्दितमनेनेति चरित्रं तदेव चारित्रं, चारित्रमेवगुणः २ स एव प्रमाणं २ सावद्ययोगविरतिरुपं. तच्च पंचविधम्, सामायिकादि, पंचविधमप्येतद्विशेषतः सामायिकमेव, छेदादि विशेषैस्तु विशेष्यमाणं पञ्चधा भिद्यते, तत्राद्यं विशेषाभावात् सामान्यसंज्ञायामेवावतिष्ठते सामायिकमिति, सामायिकं पूर्वोक्तशब्दार्थं तच्चेत्वरं यावत्कथितं च तत्रेत्वरं भाविव्ययदेशान्तरत्वात् स्वल्पकालं, तच्चाद्य चरमतीर्थंकरकालयोरेव यावद्द्यापि महाव्रतानि नारोप्यन्ते तावच्छिष्यस्य संभवति, आत्मनः कथां यावदास्ते तद् यावत् कथं-यावज्जीवमित्यर्थः यावत्कथमेव यावत्कथिकम् , एतच्च भरतैरावतेष्वाद्य चरमवर्जमध्यमतीर्थंकरसाधूनां महाविदेहतीर्थंकरयतीनां च संभवति, पूर्वपर्य्यायस्य छेदेनोपस्थापनं महाव्रतेषु यत्र तच्छेदोपस्थापनं, भरतैरावतप्रथमपश्चिमतीर्थंकरतीर्थ एव, नान्यत्रप तच्च सातिचारं निरतिचारं च तत्रेत्वरसामायिकस्य शैक्षकस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदारोप्यते तीर्थान्तर वा सङ्क्रामतः साधोर्यथा पार्श्वनाथतीर्थान्महावीर-तीर्थं संक्रामतस्तन्निरतिचारं, मूलगुणघातिनस्तु यत् पुनर्व्रतारोपणं तत्सातिचारं । परिहारः-तपोविशेषस्तेन विशुद्धं, अथवा परिहारः अनेषणीयादेः परित्यागोविशेषेणशुद्धो यत्र तत्परिहारविशुद्ध' तदेव परिहार-शुद्धिकम्, तदपि द्विविधं–निर्विश्यमानकं निर्विष्टकायिकं च तत्र निर्विश्यमानकम्-आसेव्यमानम् , अथवा तदनुष्ठातारः साधवो निर्विश्यमानकाः तत्सहयोगात्तदपि निर्विश्यमानकं, निर्विष्ट-आसेवितः प्रस्तुत तपो विशेषः कायो येषां ते निर्विष्टकायाः, त एव निर्विष्टकायिकाः साधवः, तदाश्रयत्वाद् प्रस्तुतचारित्रमपि निर्विष्टकायिकं, इदमत्र हृदयम्-तीर्थकर-चरणमूले येन तीर्थकरसपीपे अदः प्रतिपन्नपूर्वं तदन्तिके वा नवको गणः परिहारविशुद्धिचारित्रं प्रतिपद्यन्ते, नान्यस्य समीपे, तत्रैकः कल्प-स्थितो यदन्तिके सर्वा सामाचारो क्रियते, चत्वारस्तु साधवो वक्ष्यमाणं तपः कुर्वन्ति, ते च परिहारिका इत्युच्यन्ते, अन्ये तु चत्वारो वैयावृत्य कर्तृत्वं प्रतिपद्यन्ते, तेचानुपरिहारिका इति व्यपदिश्यन्ते, तत्र परिहार-काणां तपः प्रोच्यते-ग्रीष्मे जघन्यतश्चतुर्थं मध्यम पदे षष्ठं उत्कृष्टतस्त्वष्टमं शिशिरे जघन्यमध्यमोत्कृष्टपदेषु यथा संख्यंषष्ठमष्टमदशमं च, वर्षासु जघ-न्यादिपदत्रये पि यथाक्रममष्टमं दशमं द्वादशं च, शेषास्तु कल्पस्थितानु-परिहारिकाः पंचापि प्रायो नित्यभक्ता नोपवासं कुर्वन्ति, भक्तं च पञ्चानामप्याचामलमेव, नान्यत्; ततः परिहारिकाः षण्मासान्यावद्यथोक्तं तपः कृत्वा अनुपहारिकतां प्रतिपद्यन्ते, अनुपरिहारिकास्तु परिहारिकतां, तैरपि षण्मासान्यावद्यदा तपः कृतं भवति तदा कृततपसामष्टानां मध्यादेकः कल्पस्थितो व्यवस्थाप्यते, अग्रेतनश्चासौ षड्मासान्यावद्यथोक्तं तपः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करोति, शेषास्तु सप्तानुचरतामाश्रयन्ति, एवं चाष्टादशभिर्मासैरयं कल्पः समाप्यते तत्समाप्तौ च भूयस्तमेव कल्पं जिनकल्पं प्रति पद्येरन् गच्छं वा प्रत्यागच्छेयुरिति त्रयीगतिः, अपरं चैतच्चारित्रं छेदोपस्थापनचरणवतामेव भवति, नान्येषामित्यलमतिप्रसंगेन, तदेवमिह यो यस्तपः कृत्वा अनुपरिहारिकतां कल्पस्थिततां वाऽङ्गी करोति तत्सम्बन्धी परिहारविशुद्धिकं निर्विष्टकायिकमुच्यते, ये तु तपः कुर्वन्ति तत्सम्बन्धि निर्विश्यमानकमिति स्थितम् । संपरैति-पर्यटति संसारमनेनेति सम्परायः क्रोधादिकषायः, लोभांशमात्रावशेषतया सूक्ष्मः सम्परायो यत्र तत्सूक्ष्मसम्परायम् इदमपि संक्लिश्यमान विशुध्यमानकभेदात् द्विधैव, तत्र श्रेणीमारोहतो विशुध्यमानकमुच्यते, ततः प्रच्यवमानस्य संक्लिश्यमानकमिति, 'अहक्खायं' ति अथ शब्दोऽत्रयाथातथ्ये आङभिविधौ आ-समन्ताद्याथातथ्येन ख्यातमथाख्यातं कषायोदयाभावतो निरतिचारत्वात पारमार्थिकरूपेण ख्यातमथाख्यातमित्यर्थः, एतदपि प्रतिपात्यप्रतिपाति भेदात् द्वेधा, तत्रोपशान्तमोहस्य प्रतिपाति क्षीणमोहस्यत्वप्रतिपाति; अथवा केवलिनश्छद्मस्थस्यचोपशान्तमोहक्षीणमोहस्य तद् भवत्यतः स्वामी भेदात् द्वैविध्यमिति । तदेतच्चारित्रगुणप्रमाणम् , तदेतज्जीवगुणप्रमाणं, तदेतद्गुणप्रमाणमिति ॥१४४॥ तदेवं जीवाजीवभेदभिन्नं गुणप्रमाणं प्रतिपाद्य क्रमप्राप्तं नयप्रमाणं प्रतिपादयन्नाह

**मूलः—से किं तं नयप्पमाणे ?, २ तिविहे पण्णत्ते, तंजहा—पत्थगदिट्ठंतेणं वसहिदिट्ठंतेणं पएसदिट्ठंतेणं । से किं तं पत्थगदिट्ठंतेणं ?, २ से जहानामए केई**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरिसे परसुं गहायअडवीसमहुत्तो गच्छेज्जा, तं पासित्ता केई वएज्जा—कहिंभवं गच्छसि ?, अविसुद्धोनेगमो भणइ-पत्थगस्स गच्छामि, तंच केई छिदमाणं पासित्ता वएज्जा-किंभवं छिदसि ?, विसुद्धोनेगमो भणइ—पत्थयं छिंदामि, तंच केई तच्छमाणं पासित्ता वएज्जा—किंभवं तच्छसि ?, विसुद्धतराओ णेगमोभणइ पत्थयं तच्छामि, तंच केई उक्कीरमाणं पासित्ता वएज्जा—किंभवं उक्कीरसि ?, विसुद्धतराओ णेगमो भणइ पत्थयं उक्कीरामि, तंच केई (वि) लिहमाणं पासित्ता वएज्जा—किं भवं (वि) लिहसि ?, विसुद्धतराओणेगमो भणइ पत्थयं (वि) लिहामि। एवं विसुद्धतरस्स णेगमस्स नामाउडिओ पत्थओ, एवमेव ववहारस्सवि, संगहस्स चियमियमेज्ज समारूढो पत्थओ, उज्जुसुयस्स-पत्थओऽविपत्थओमेज्जंपि पत्थओ तिण्हं सद्दनयाणं पत्थयस्स अत्थाहिगारजाणओ जस्स वा वसेणं पत्थओ निप्फज्जइ, से तं पत्थयदिट्ठंतेणं ॥

टीका :—अनन्तधर्मणो वस्तुनः एकांशेन नयनं नयः स एव प्रमाणं नयप्रमाणं, त्रिविधं प्रज्ञप्तमिति, यद्यपि नैगम संग्रहादि भेदतो बहवो नयास्तथापि प्रस्थकादि दृष्टान्तत्रयेण सर्वेषामिह निरुपयितु मिष्टत्वात्त्रैविध्यमुच्यते, तथाचाह—तद्यथा—प्रस्थकदृष्टान्तेनेत्यादि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रस्थकादिदृष्टान्तत्रयेण हेतुभूतेन त्रिविधं नयप्रमाणं भवतीत्यर्थः, तत्र प्रस्थक दृष्टान्तं दर्शयति,—तद्यथानामकः कश्चित्पुरुषः परशुं—कुठारं गृहीत्वा अटवीमुखो गच्छेदित्यादि, इदमुक्तं भवति--प्रस्थको—मागधदेशप्रसिद्धो धान्यमानविशेषस्तद्धेतुभूतकाष्ठकर्तनाय कुठारव्यग्रहस्तं तत्रादि पुरुषमटवीं-गच्छन्तं दृष्ट्वा कश्चिदन्यो वदेत्—क भवान् गच्छति ?, तत्राविशुद्ध नैगमो भणति—अविशुद्धनैगमनयमतानुसारी सन्नसौ प्रत्युत्तरयतीत्यर्थः, किमित्याह प्रस्थकस्य गच्छामि, इदमुक्तं भवति—नैके गमा - वस्तुपरिछेदा यस्य अपि तु बहवः स निरुक्तवशात् ककारलोपतो नैगम उच्यते, अतो यद्यप्यत्र प्रस्थककारणभूतकाष्ठनिमित्तमेवगमनं, नतु प्रस्थकनिमित्तं, तथाऽप्यनेकप्रकारवस्त्वभ्युपगम परत्वात् कारणे कार्योपचारात् तथाव्यवहार दर्शनादेवमप्यभिधत्तेऽसौ—प्रस्थकस्य गच्छामीति, तंच कश्चित् छिन्दन्तं, वृक्षमिति गम्यते, पश्येद् , दृष्ट्वा च वदेत्—किं भवान् छिनत्ति ?, ततः प्राक्तनात् किंचिद्विशुद्धनैगमनयमतानुसारी सन्नसौ—भणति—प्रस्थकं छिनद्मि, अत्रापि कारणे कार्योपचारात्तथाव्यवहृति दर्शनादेव काष्ठेऽपि छिद्यमाने प्रस्थकं छिनद्मीत्युत्तरं, केवलं काष्ठस्यप्रस्थकं प्रति कारणता-भावस्यात्र किंचिदासन्नत्वाद्विशुद्धत्वं, प्राक् पुनरतिव्यवहितत्वात् मलीम-सत्वम् , एवं पूर्वपूर्वापेक्षया यथोत्तरस्य विशुद्धता भावनीया, नवरं तक्ष्णुवन्तं तनूकुर्वन्तं उत्किरंतं वेधनकेन मध्याद् विकिरन्तं विलिखन्तं—लेखन्या मृष्टं कुर्वाणं, एवमनेनप्रकारेण तावन्नेयं यावद्विशुद्धतरनैगमस्य 'नामाउडिर्आत्त आकुट्टितनामा' प्रस्थकोऽयमित्येवनामाङ्कितो निष्पन्नः प्रस्थक इति, । एवमेव व्यवहारस्यापीति, लोकव्यवहारप्राधान्येनायं व्यव-हारनयः, लोके च पूर्वोक्तावस्थासु सर्वत्र प्रस्थकव्यवहारो दृश्यतेऽतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यवहारनयोऽप्येवमेवप्रतिपद्यते इति भावः । 'संगहस्से' त्यादि, सामान्यरुपतया सर्वं वस्तु संगृह्णाति—क्रोडीकरोतीति संग्रहस्तस्य मतेन चितादिविशेषणैर्विशिष्ट एव प्रस्थो भवति, नान्यः, तत्र चितो—धान्येन-व्याप्तः, सच देशतोऽपि भवत्यत आह 'मितः' पूरितः, अनेनैव प्रकारेण मेयं समारुढं यत्र स आहितादेराकृतिगणत्वान्मेयसमारुढः, अयमत्र भावार्थः—प्राक्तननयद्वयस्याविशुद्धत्वात् प्रस्थककारणमपि प्रस्थक उक्तः अनिष्पन्नः प्रस्थकोऽपि स्वकार्याकरणकालेऽपि प्रस्थक इष्टः, अस्य तु ततोविशुद्धत्वाद्धान्यमानलक्षणं स्वार्थं कुर्वन्नेव प्रस्थकः, तस्य तदर्थत्वात्, तदभावे च प्रस्थकव्यपदेशोऽतिप्रसङ्गादिति यथोक्त एव प्रस्थकः, सोऽपि प्रस्थक सामान्याव्यतिरेकात् व्यतिरेके चाप्रस्थकत्व प्रसंगात् सर्व एक एव प्रस्थक इति प्रस्तुतनयो मन्यते, सामान्यवादित्वादिति; । ''उज्जुसुयस्से' त्यादि. ऋजुसूत्रः—पूर्वोक्तशब्दार्थः तस्य निष्पन्नस्वरुपोऽर्थक्रियाहेतुः प्रस्थकोऽपि प्रस्थकः, तत्परिछिन्नं धान्यादिकमपि वस्तु प्रस्थकः, उभयत्र प्रस्थकोऽयमिति व्यवहारदर्शनात्, तथाप्रतीते, अपरं चासौ पूर्वस्माद्विशुद्धत्वाद्वर्तमाने एव मानमेये प्रस्थकत्वेन प्रतिपद्यते, नातीतानागतकाले, तयोर्विनष्टानुत्पन्नत्वेनासत्त्वादिति । 'तिण्हंसद्दनयाण' मित्यादि, शब्दप्रधाना नयाः शब्दनयाः—शब्दसमभिरुढैवंभूताः, शब्देऽन्यथा स्थितेऽर्थमन्यथानेच्छन्त्यमी, किन्तु ?, यथैव शब्दो व्यवस्थितस्तथैव शब्देनार्थं गमयन्तीत्यतः शब्दनया उच्यन्ते, अद्यास्तु यथाकथञ्चिच्छब्दाः प्रवर्तन्तामर्था एव प्रधानमित्यभ्युपगमपरत्वादर्थनयाः प्रकीर्त्यन्ते, अतः—एषां त्रयाणां शब्दनयानां, 'प्रस्थकार्थाधिकारज्ञः' प्रस्थकस्वरुपपरिज्ञानोपयुक्तः प्रस्थकः, भावप्रधाना ह्येते नयाइत्यतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावप्रस्थकमेवेच्छन्ति, भावश्च प्रस्थकोपयोगोऽतः स प्रस्थकः, तदुपयोगवानपि च ततोऽव्यतिरेकात् प्रस्थकः, योहि यत्रोपयुक्तः सोऽमीषां मते स एवभवति, उपयोगलक्षणो जीवः उपयोगश्च तु प्रस्थकादिविषयतया परीणतः किमन्यज्जीवस्य रुपान्तरमस्ति ?, यत्र व्यपदेशान्तरं स्यादिति भावः, 'जस्सवावसेणो' त्यादि, यस्य वा प्रस्थककर्तृगतस्योपयोगस्य वशेन प्रस्थको निष्पद्यते तत्रोपयोगे वर्तमान कर्ता प्रस्थको, नहि प्रस्थकेऽनुपयुक्तः प्रस्थकं निर्वर्तयितुं कर्ता समर्थः, ततस्तदुपयोगानन्यत्वात् स एव प्रस्थकः, इमां च तेऽत्र युक्तिमभिदधति—सर्ववस्तु स्वात्मन्येव वर्तते, नत्वात्मव्यतिरिक्ते आधारे, वक्ष्यमाण युक्त्या एतन्मतेनान्यस्यान्यत्र वृत्त्ययोगात्, प्रस्थकश्च निश्चयात्मकं मानमुच्यते, निश्चयश्च ज्ञानं, तत्कथं जडात्मनि काष्ठभाजनेवृत्तिमनुभविष्यति ?, चेतनाचेतनयोः सामानाधिकरण्याभावात् , तस्मात् प्रस्थकोपयुक्तः एव प्रस्थकः । 'से त' मित्यादि निगमनम् ॥

**मूल.**—से किं तं वसहिदिट्ठंतेणं ?, २ से जहानामए केई पुरिसे कंचि पुरिसं वएज्जा—कहिं भवं वससि ?, तं अविसुद्धो णेगमो भणइ—लोगे वसामि, लोगे तिविहे पण्णत्ते, तंजहा-उड्ढलोए अहोलोए तिरिअलोए, तेसु सव्वेसु भवं वससि ?, विसुद्धो णेगमो भणइ—तिरिअलोए वसामि, तिरीअलोए जंबुद्दीवाइआ सयंभूरमणपज्जवसाणा असंखिज्जा दीवसमुद्दा पण्णत्ता, तेसु सव्वेसु भवं वससि ?, विसुद्धतराओणेगमो भणइ-जंबुद्दीवे वसामि, जंबुद्दीवे दस खेत्ता, पण्णत्ता, तंजहा—भरहे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एरवए हेमवएं एरराणवए हरिवस्से रम्मगवस्से देवकुरू उत्तरकुरू पुव्वविदेहे अवरविदेहे, तेसु सव्वेसु भवं वससि ?, विसुद्धतराओ णेगमो भणइ–भरहे वासे वसामि, भरहे वासे दुविहे पराणत्ते तंजहा-दाहिणड्ढभरहे उत्तरड्ढभरहे अ, तेसु सव्वेसु (दोसु) भवं वससि? विसुद्धतराओ णेगमो भणइ–दाहिणड्ढभरहे वसामि, दाहिणड्ढ-भरहे अणेगाइं गामागरणगरखेडेकव्बडमडंवदोणमुहपट्टणासम-संवाहसरिणवेसाइं, तेसु सव्वेसु भवं वससि ?, विसुद्धतराओ णेगमो भणइ–पाडलिपुत्ते वसामि, पाडलिपुत्ते अणेगाइं गिहाइं तेसु सव्वेसु भवं वससि ?, विसु० णेग० भणइ–देवदत्तस्स घरे वसामि, देवदत्तस्सघरे अणेगा कोट्ठगा, तेसु सव्वेसु भवं वससि ?, विसु० णे० भणइ–गब्भ घरे वसामि, एवंविसुद्धस्स णेगमस्स वसमाणो, एवमेव ववहारस्सवि, संगहस्स संथारसमारूढो वसइ, उज्जुसुअस्स जेसु आगासपएसेसु ओगाढो तेसु वसइ, तिण्हंसद्दनयाणं आयभावे वसइ। से तं वसहिदिट्ठंतेणं।

टीकाः—वसतिः निवासस्तेन दृष्टान्तेन नयविचार उच्यते, तद्यथा नामकः कश्चित्पुरुषः पाटलिपुत्रादौ वसन्तं कञ्चित्पुरुषं वदेत् क भवान् वसति ? तत्राविशुद्धनैगमो भणति-अविशुद्धनैगमनयमतानुसारी सन्नसौ प्रत्युत्तरं प्रयच्छति—लोके वसामि, तन्निवासक्षेत्रस्यापि चतुर्दशरज्ज्वात्मकलोकादनर्थान्तरत्वाद् इत्थमपि च व्यवहारदर्शनात्, विशु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धनैगमस्त्वतिव्याप्तिपरत्वादिदमसङ्गतं मन्यते, ततस्तिर्यल्लोके वसामीति संक्षिप्योत्तरं ददाति; विशुद्धतरस्त्विदमप्यतिव्याप्ति निष्ठं मन्यते, ततो जम्बूद्वीपेवसामीति संक्षिप्ततरमाह, एवंभारतवर्षदक्षिणार्द्धभरतपाटलिपुत्रदेवदत्तगृहगर्भगृहेष्वपि भावनीयम्, एवं 'विसुद्धस्सणेगमस्स वसमाणो वसइ' एवमुत्तरोत्तरभेदापेक्षया विशुद्धतरनैगमस्य वसन्नेव वसति, नान्यथा, इदमुक्तं भवति–यत्र गृहादौ सर्वदा निवासित्वेनासौ विवक्षितः तत्र तिष्ठन्नेव एष तत्र वसतीति व्यपदिश्यते, यदि पुनः कारणवशतोऽन्यत्र रथ्यादौ वर्तते तदा तत्र विवक्षिते गृहादौ वसतीति न प्रोच्यते, अतिप्रसङ्गादिति भावः, 'एवमेवे' त्यादि, लोकव्यवहारनिष्ठो हि व्यवहारनयो, लोके च नैगमोक्तप्रकारः सर्वेऽपि दृष्यन्ते इति भावः, अथ चरमनैगमोक्तप्रकारो लोके नैष्यते, कारणतो ग्रामादौ वर्तमानेऽपि देवदत्ते पाटलिपुत्रे एष वसतीति व्यपदेशदर्शनादिति चेत्, नैतदेवं, प्रोषिते देवदत्ते स इह वसति नवेति केनचित्पृष्टे प्रोषितोऽसौ नेह वसतीत्यस्यापि लोकव्यवहारस्य दर्शनादिति । 'संगहस्से' त्यदि, प्राक्तनात् विशुद्धत्वात् संग्रहनयस्य गृहादौ तिष्ठन्नपि संस्तारकारूढ एव शयनक्रियावान् वसतीत्युच्यते, इदमुक्तं भवति-संस्तारकेऽवस्थानादन्यत्रनिवासार्थ एव न घटते, चलनादिक्रियावत्त्वात्, मार्गादिप्रवृत्तवत् संस्तारके च वसतो गृहादौ वसतीति व्यपदेशायोग एव, अतिप्रसङ्गात्, तस्मात् क्वासौ वसतीति निवासजिज्ञासायां संस्तारके–शय्यामात्रस्वरूपे वसतीत्ये तदेवास्य मतेनोच्यते, नान्यदिति भावः, स च नानादेशादिगतोऽप्येक एव संग्रहस्य सामान्यवादित्वादिति । ऋजुसूत्रस्य तु पूर्वस्माद्विशुद्धत्वाद् येष्वाकाशप्रदेशेष्ववगाढस्तेष्वेव वसतीत्युच्यते. न संस्तारके, सर्वस्यापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्तुवृत्या नभस्येवावगाहात्, येषु प्रदेशेषु संस्तारको वर्तते संस्तारके णावाक्रान्ता वर्तन्ते, ततो येष्वेव प्रदेशेषु स्वयमवगाढस्तेष्वेव वसतीत्युच्यते, स च वर्तमानकाल एवास्ति, अतीतानागतयोर्विनष्टानुत्पन्नत्वेनैतन्मतेऽसत्वादिति ।। त्रयाणां शब्दनयानामात्मभावे-स्वस्वरूपे सर्वोऽपि वसति अन्यस्यान्यत्रवृत्ययोगात्, तथाहि अन्योऽन्यत्र वर्तमानः किं सर्वात्मना वर्तते देशात्मना वा ?, यद्याद्यः पक्षस्तर्हि तस्याधारव्यतिरेकिणास्वकीयरूपेणाप्रतिभासनप्रसङ्गो, यथाहि संस्तारकाद्याधारस्य स्वरूपं सर्वात्मना तत्र वृत्तं न तद् व्यतिरेकेणोपलभ्यते एवं देवदत्तादिरपि सर्वात्मना तत्राधीयमानस्तद् व्यतिरेकेण नोपलभ्यते, अथ द्वितीयो विकल्पः स्वीक्रियते, तर्हि तत्रापि देशे अनेन वर्त्तितव्यं, ततः पुनरपि विकल्पद्वयं-किं सर्वात्मनावर्त्तते देशात्मनावेति ? सर्वात्मपक्षे देशिनो देशरूपताऽऽपत्ति, देशात्मपक्षे तु पुनस्तत्रापिदेशे देशिना वर्त्तितव्यं, ततः पुनरपि तदेव विकल्पद्वयं, तदेवदूषणमित्यनवस्था, तस्मात्सर्वोऽपि स्वस्वभाव एव निवसति, तत्परित्यागेनान्यत्र निवासे तस्य निःस्वभावता प्रसंगादित्यलं बहुभाषितया । 'से त' मित्यदि निगमनम्

**मूलः—से किं तं पएसदिट्ठंतेणं ?, २ णेगमो भणइ—छण्हं पएसो, तंजहा—धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंधपएसो देसपएसो, एवं वयंतं णेगमं संगहो भणइ—जं भणसि—छण्हंपएसो तं न भवइ, कम्हा ?, जम्हा जो देसपएसो सो तस्सेव दव्वस्स, जहा को दिट्ठंतो ?, दासेण मे खरो कीओ दासोऽवि मे खरोऽवि मे, तं मा भणाहि—छण्हं**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पएसो, भणाहि पंचण्हं पएसो, तंजहा-धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंधपएसो, एवं वयंतं संगहं ववहारो भणइ-जं भणसि-पंचण्हं पएसो, तं न भवइ, कम्हा ?, जइ जहा पंचण्हं गोट्ठिआणं पुरिसाणं केइ दव्व जाए सामण्णे भवइ तंजहा-हिरण्णे वा सुवण्णे वा धणे वा धण्णे वा तं न ते जुत्तं वत्तं जहा पंचण्हं पएसो, तं मा भणिहि-पंचण्हं पएसो, भणाहि-पंचविहो पएसो, तंजहा-धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंधपएसो, एवं वयंतं ववहारं उज्जुसुओ भणइ-जं भणसि-पंचविहोपएसो, तं न भवइ, कम्हा ?, जइ ते पंचविहो पएसो एवं ते एक्केक्को पएसो पंचविहो एवं ते पणवीसतिविहो पएसो भवइ-तं मा भणाहि-पंचविहो पएसो, भणाहि-भइयव्वो पएसो-सिअ धम्मपएसो सिअ अधम्मपएसो सिअ आगासपएसो सिअ जीवपएसो सिअ खंधपएसो, एवं वयंतं उज्जुसुयं संपइ सद्दनओ भणइ-जं भणसि भइयव्वो पएसो, तं न भणइ, कम्हा ?, जइ भइअव्वो पएसो, एवं ते धम्मपएसोऽवि सिअ धम्मपएसो सिअ अधम्मपएसो सिअ आगासपएसो सिअ जीवपएसो सिअ खंधपएसो, अधम्मपएसोऽवि सिअ धम्मपएसो जाव खंधपएसो, जीवपएसोऽवि सिअ धम्मपएसो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाव सिअ खंधपएसो, एवं ते अणवत्था भविस्सइ, तं मा भणाहि-भइयव्वो पएसो, भणाहि धम्मे पएसे से पएसे धम्मे, अहम्मे पएसे से पएसे अहम्मे, आगासे पएसे से पएसे आगासे, जीवे पएसे से पएसे नो जीवे, खंधे पएसे से पएसे नोखंधे, एवं वयंतं सद्दनयं समभिरूढोभणइ-जं भणसि-धम्मे पएसे से पएसे धम्मे जाव जीवे पएसे से पएसे नोजीवे खंधे पएसे से पएसे नोखंधे, तं न भवइ, कम्हा ?, इत्थं खलु दो समासा भवंति, तंजहा—तप्पुरिसे अ कम्मधारए अ, तं ण णज्जइ कयरेणं समासेणं भणसि ?, किं तप्पुरिसेणं किं कम्मधारएणं ?, जइ तप्पुरिसेणं भणसि तो मा एवं भणाहि, अह कम्मधारएणं भणसि तो विसेसओ भणाहि, धम्मे अ से पएसे अ से पएसे धम्मे अहम्मे अ से पएसे अ से पएसे अहम्मे, आगासे अ से पएसे अ से पएसे आगासे जीवे अ से पएसे अ से पएसे नोजीवे, खंधे अ से पएसे अ से पएसे नोखंधे, एवं वयंतं समभिरूढं संपइ एवंभूओभणइ-जं जं भणसि तं तं सव्वं कसिणं पडिपुण्णं निरवसेसं एगगहणगहियं देसेऽवि मे अवत्थू पएसेऽवि मे अवत्थू से तं पएसदिट्ठंतेणं। से तं नयप्पमाणे (सू० १४५)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका:—प्रकृष्टोदेशःप्रदेशो-निर्विभागो भाग इत्यर्थ, स एव दृष्टान्त स्तेन नय मतानि चिन्त्यन्ते--तत्र नैगमो भणति-षण्णां प्रदेशः तद्यथा-'धम्मपएसे' इत्यादि, धर्मशब्देन धर्मास्तिकायो गृह्यते, तस्य प्रदेशो धर्म-प्रदेशः, एवमधर्माकाशजीवास्तिकायेष्वपियोज्यं, स्कन्धः—पुद्गलद्रव्यनिचय स्तस्य प्रदेशः स्कन्धप्रदेशः; देशः—एषामेव पंचानां धर्मास्तिकायादिद्रव्याणां प्रदेशद्वयादिनिवृत्तोऽवयवस्तस्य प्रदेशो देशप्रदेश, अयं च प्रदेश सामान्या व्यभिचारात् षण्णां प्रदेश इत्युक्तं, विशेषविवक्षायां तु षट् प्रदेशाः। एवं वदन्तं नैगमं ततो निपुणतरः संग्रहो भणति—यद् भणसि षण्णां प्रदेश इति, तन्न भवति-तन्न युज्यते, कस्मात्?, यस्मात् यो देश प्रदेश इति षष्ठ स्थाने भवता प्रतिपादितं, तदसङ्गतमेव, यतोधर्मास्ति कायादिद्रव्यस्य सम्बन्धी यो देशस्तस्य यः प्रदेशः स वस्तुवृत्या तस्यैव द्रव्यस्य यत्सम्बन्धी देशो विवक्ष्यते, द्रव्याव्यतिरिक्तस्यदेशस्य यः प्रदेशः स द्रव्यस्यैव भवति, यथा कोऽत्र दृष्टांत इत्याह—'दासेणे' त्यादि' लोकेऽप्येवं व्यवहृतिर्दृश्यते, यथा कश्चिदाह—मदीय दासेन खरः क्रीतः, तत्र दासोऽपि मदीयः, खरोऽपि मदीयः, दासस्य मदीयत्वात् तत्क्रीतः खरोऽपि मदीय इत्यर्थः, एवमिहापि देशस्य द्रव्यसम्बन्धित्वात्तत्प्रदेशोऽपि द्रव्यसम्बन्ध्येवेति भावः, तस्मान्मा भण —षण्णां प्रदेशः, अपित्वेव भण-पञ्चानां प्रदेश इति, त्वदुक्त-षष्ठप्रदेशस्यैवाघटनादित्यर्थः. तदेव दर्शयति-तद्यथा—धर्मप्रदेश इत्यादि, एतानि च पंच द्रव्याणि तत्प्रदेशाश्चेत्येवमप्य-विशुद्धसंग्रह एव मन्यते, अवान्तर द्रव्ये समान्याद्यभ्युपगमात, विशुद्धस्तु द्रव्यबाहुल्यं प्रदेशकल्पनां च नेच्छत्येव, सर्वस्यैव वस्तुसामान्य क्रोडी-कृतत्वेनैकत्वादित्यलं प्रसंगेन। प्रकृतमुच्यते-एवं वदन्तं संग्रहं ततोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निपुणो व्यवहारो भणति,-यद् भणसि पञ्चानां प्रदेश इति, तन्न भवति युज्येते, कस्मात् ? यदि यथा पञ्चानां गोष्ठिकानां किञ्चद् द्रव्यं सामान्यं-एकं भवति, तद्यथा-हिरण्यंवेत्यादि, एवं यदि प्रदेशोऽपि स्यात्ततो युज्यते वक्तुं-पञ्चानां प्रदेश इति इदमुक्तं भवति-यथा केषाञ्चित् पंचानां पुरुषाणां साधारणं किञ्चद्धिरण्यादि भवति, एवं पञ्चानामपि धर्मास्तिकायादिद्रव्याणां यद्येकः कश्चित्साधारणः प्रदेशः स्यात्तदेयं वाचो युक्ति घटते, नचैतदस्ति प्रतिद्रव्यं प्रदेश भेदात, तस्मान्मा भण-पंचानां प्रदेशः, अपि तु भण- पंचविधः-पंचप्रकारः प्रदेशः, द्रव्यलक्षणस्याश्रयस्य पंचविधत्वादिति भावः, तदेवाह-धर्मप्रदेश इत्यादि, एवं वदन्तं व्यवहारमृजुसूत्रो भणति-यद् भणसि पंचविधः प्रदेशः तन्न भवति, कस्मात् ? यस्माद्यदि ते पंचविधः प्रदेश एवमेकैको धर्मास्तिकायादिप्रदेशः पंचविधः प्राप्तः, शब्दादत्र वस्तु व्यवस्था, शब्दाच्चैवमेव प्रतीतिभर्वेति एवं च सति पंचविंशतिविधः प्रदेशः— प्राप्नोति, तस्मान्मा भण पंचविधः प्रदेशः, किन्त्वेवं भण-भाज्यः प्रदेशः, स्याद्धमस्येत्यादि, इदमुक्तं भवति-भाज्यो— विकल्पनीयो विभजनीयः प्रदेशः, कियद्भिविभागैः ? स्याद्धर्मप्रदेश इत्यादि पंचभिः, ततश्च पंचभेद एव प्रदेशः सिध्यति, स च यथा स्वमात्मीयात्मीय एवास्ति न परकीयः, तस्यार्थक्रियाऽसाधकत्वात् प्रस्तुत नयमतेनासत्त्वादिति । एवं भणन्तमृजुसूत्रं साम्प्रतं शब्दनयो भणति-यद्भणसि-भाज्य प्रदेशः, तन्न भवति, कुतो ?, यतो यदि भाज्यः प्रदेशः, एवं ते धर्मास्तिकाय प्रदेशोऽपि कदाचिद् धर्मास्तिकायादिप्रदेशः स्याद्, अधर्मातिकायप्रदेशोऽपि कदाचिद् धर्मास्तिकायादि प्रदेशः स्याद्, इत्थमपिभजनाया अनिवारित्वात्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा एकोऽपि देवदत्तः कदाचिद्राज्ञोभृत्य कदाचिदमात्यादेरिति, एवमाकाशास्तिकायादिप्रदेशोऽपिवाच्यं, तदेवं नैयत्याभावात्तवाप्यनवस्था प्रसज्येतेति, तन्मैवं भण–भाज्यः प्रदेशः, अपितु इत्थं भण-'धम्मे पएसे' [ से पएसे धम्मे ]' इत्यादि, इदमुक्तं भवति धर्मे प्रदेश इति-धर्मात्मकःप्रदेश इत्यर्थः अत्राह – नन्वयं प्रदेशः सकलधर्मास्तिकायादिव्यतिरिक्तः सन् धर्मात्मक इत्युच्यते, आहोस्वित्तदेकदेशाव्येतिरिक्त सन् यथा सकलजीवास्तिकायैकदेशैकजीवद्रव्याव्यतिरिक्तः सँस्तत्प्रदेशो जीवात्मक इति व्यपदिश्यत इत्याह 'से पएसे धम्मेऽ' त्ति स प्रदेशो धर्मः-सकलधर्मास्तिकायादव्यतिरिक्त-इत्यर्थः, जीवास्तिकाये हि परस्परं भिन्नान्येवानन्तानि जीवद्रव्याणि भवन्ति, अतो य एकजीवद्रव्यस्य प्रदेशः स निःशेष जीवास्तिकायैकदेशवृत्तिरेव सन् जीवात्मक इत्युच्यते, अत्र तु धर्मास्तिकाय एकमेव द्रव्यं ततः सकलधर्मास्तिकायाव्यतिरिक्त एवं सँस्तत्प्रदेशो धर्मात्मक इत्युच्यत इति भावः, । अधर्माकाशास्तिकाययोरप्येकैकद्रव्यत्वादेवमेव भावनीयम् । जीवास्तिकाय तु 'जीवेपएसे से पएसे नोजीवे, त्ति, जीवः प्रदेश इति जीवास्तिकायात्मकः प्रदेशः इत्यर्थः सच प्रदेशो नोजीवः, नोशब्दस्येह देशवचनत्वात् सकलजीवास्तिकायैकदेशवृत्तिरित्यर्थः यो ह्येकजीवद्रव्यात्मकः प्रदेशः स कथमनन्तजीवद्रव्यात्मके समस्त जीवास्तिकाये वर्तेत इति भावः, एवं स्कन्धात्मकः प्रदेशो नो स्कन्धः, स्कन्धद्रव्याणामनन्तत्वादेक देशवर्तिरित्यर्थः, । एवं वदन्तं शब्दनयं नानार्थसमभिरोहणात् समभिरूढः स प्राह–यद्भणसि–धर्मे प्रदेशः सप्रदेशो धर्म इत्यादि, तन्न भवति-न युज्यते कस्मादित्याह–इह खलु द्वौ समासौ भवतः, तद्यथा–तत्पुरुषः कर्मधारयश्च, इदमुक्तं भवति,– धम्मे पएसे से पएसे धम्मे इत्युक्ते समासद्वयारम्भकवाक्यद्वयमत्र सम्भाव्यते, तथाहि-यदि धर्मे शब्दात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तमीयं तदा सप्तमीतत्पुरुषस्यारम्भकमिदं वाक्यं, यथा वने हस्तीत्यादि, अथ प्रथमा तदा कर्मधारयस्य, यथा नीलमुत्पलमित्यादि, ननु यदि वाक्यद्वयमत्र सम्भाव्यते तर्हि कथं द्वौ समासौ भवत इत्युक्तम् ?, उच्यते, समासारम्भक-वाक्ययोः समासोपचारात्, अथवा अलुक्समासविवक्षया समासावप्येतौ भवतो, यथा कण्ठेकाल इत्यादीत्यदोषः, यदि नाम द्वौ समासावत्र भवतस्ततः किमित्याह तन्न ज्ञायते कतरेण समासेन भणसि ?, किं तत्पुरुषेण कर्मधार-येण वा ? यदि तत्पुरुषेण भणसि, तन्मैवं भण, दोषसम्भवादितिशेषः स चायं दोषो–धर्मे प्रदेश इति भेदापत्तिः, यथा कुण्डेबदराणीति, न च प्रदेशप्रदेशिनौ भेदेनोपलभ्येते, अथ अभेदेऽपि सप्तमीदृश्यते यथा घटेरूपमित्यादि, यद्येवमुभयत्रदर्शनात् संशयलक्षणो दोषः स्यात्, अथ कर्म धारयेण भणसि ? ततो विशेषेण भण, धम्मे अ से पएसे य से' त्ति, धर्मश्च स प्रदेशश्च स इति समानाधिकरणः कर्मधारयः, एवं च सप्त म्याशङ्काभावतो न तत्पुरुषसम्भव इति भावः । आह—नन्वयं प्रदेशः समस्तादपि धर्मास्तिकायादव्यतिरिक्तः सन् समानाधिकरणतयानिर्दि-श्यते ? उत तदेकदेशवृत्तिः सन् यथा जीवास्तिकायैकदेशवृत्तिर्जीवप्रदेश-इत्याशंक्याह—'से पएसे धम्मे'त्ति, स च प्रदेशः सकलधर्मास्तिका-यादव्यतिरिक्तो न पुनस्तदेकदेशवृत्तिरित्यर्थः, शेषभावना पूर्ववत्, से 'पएसे नोजीवे से पएसे नोखन्धे' इत्यत्रापि पूर्ववदेवार्थकथनम् । एवं वदन्तं समभिरूढं साम्प्रतमेवंभूतो भणति-यद्यद्धर्मास्तिकायादिकं वस्तु भणसि तत्तत् सर्वं समस्तं कृत्स्नं देशप्रदेशकल्पनारहितं प्रतिपूर्णम्-आत्म-स्वरूपेणाविकलं निरवशेषं-तदेवैकत्वान्निरवयवमेकग्रहणगृहीतम् एकाभिधाना भिधेयं नानाभिधानाभिधेयं, तानि ह्येकस्मिन्नर्थेऽसौ नेच्छति, अभिधानभे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दे वस्तुभेदाभ्युपगमोत् , तदेवंभूतं तद्धर्मास्तिकायादिकंवस्तु भण, नतु प्रदेशादिरूपतया, यतो देशप्रदेशौ ममावस्तुभूतौ, अखण्डस्यैववस्तुनः-सत्त्वेनोपयोगात्, तथाहि-प्रदेशप्रदेशिनोर्भेदो वा स्यादभेदो वा ? यदि प्रथमः पक्षस्तर्हि भेदेनोपलब्धिप्रसंगो, न च तथोपलब्धिरस्ति, अथा–भेदस्तर्हि धर्मप्रदेशशब्दयो पर्यायतैव प्राप्ता, एकार्थविषयत्वात्, न च पर्यायशब्दयोर्युगपदुच्चारणं युज्यते, एकेनैव तदर्थप्रतिपादने द्वितीयस्य वैयर्थ्यात्, तस्मादेकाभिधानभिधेयं परिपूर्णमेकमेववस्त्विति, तदेवमेतेनिज-निजार्थसत्यताप्रतिपादनपरा विप्रतिपद्यन्ते नयाः, एते च परस्पर निरपेक्षा दुर्नयाः, सौगतादिसमयवत्, परस्परसापेक्षास्तु सुनयाः, तैश्चपरस्पर सापेक्षैः समुदितैरेव सम्पूर्णं जिनमतं भवति, नैकैकावस्थायाम्, उक्तं च स्तुतिकारेण–"उदधाविवसर्वसिन्धवः, समुदीर्णास्त्वयि नाथ । दृष्टयः न च तासु, भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्विवोदधिः ॥ १ ॥ एते च नया ज्ञानरूपास्ततो जीवगुणत्वेन यद्यपि गुणप्रमाणेऽन्तर्भवन्ति तथापि प्रत्यक्षादि प्रमाणेभ्यो नयरूपतामात्रेण पृथक् प्रसिद्धत्वाद्बहुविचार विषयत्वाज्जिनागमे प्रतिस्थानमुपयोगित्वाच्च जीवगुणप्रमाणात् पृथगुक्ताः, तदेतत् प्रदेशदृष्टांतेनेति निगमनम् । प्रस्थकादिदृष्टांतत्रयेण च नयप्रमाणं प्रतिपाद्योपसंहरति—तदेतन्नयप्रमाणमिति । अनेन च दृष्टांतत्रयेण दिग्मात्रदर्शनमेव कृतं, यावता यत्किमपि जीवादि वस्त्वास्ति तत्र सर्वत्र नय-विचारः प्रवर्तते, इत्यलं बहुजल्पितेनेति ॥ १४५ ॥

## अनुयोगद्वारसूत्र—मलधारीयावृत्तिः, प्रमाणद्वारम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथ नयद्वारमभिधित्सुराह--

**मूलः**——से किं तं णए ? सत्त मूलणया पण्णत्ता, ।। तंजहा— णेगमे संगहे ववहारे उज्जुसुए सद्दे समभिरूढे एवंभूए, तत्थ—णेगेहिं माणेहिं मिणइति णेगमस्स य निरुत्ती । सेसाणंपि नयाणं लक्खणमिणमो सुणह वोच्छं ।। १३६ संगहिअपिंडिअत्थं संगहवयणंसमासओ विंति । वच्चइ विणिच्छिअत्थं ववहारो सव्व दव्वेसु ।। १३७ ।। पच्चु-प्पन्नग्गाही उज्जुसुओ णयविही मुणेअव्वो । इच्छइ विसेसियतरं पच्चुप्पण्णं णओ सद्दो ।। १३८ ।। वत्थूओ संकमणं होइ अवत्थू नए समभिरूढे । वंजण अत्थ तदुभयं एवंभूओ विसेसेइ ।। १३९ ।।

**टीका :**— अथ कोऽयं पूर्वोक्त शब्दार्थो नयः ? तत्रोत्तरभेदापेक्षया सप्तैव मूलभूता नयाः मूल नयाः, तद् यथा नैगम इत्यादि तत्र नगमं व्याचिख्यासुराह—णेगेहिमित्यादि गाथा, व्याख्या—न एकं नैकं प्रभूतानीत्यर्थः नैकैर्मानैः-महासत्तासामान्यविशेषादिज्ञानैर्मिमीते—मिनोति वा वस्तूनि परिच्छिनत्तीति नैगमः इतीयं नैगमस्य निरुक्तिः-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्युत्पत्तिः, अथवा निगमाः—लोके वसामि तिर्यग्लोके वसामीत्यादयः पूर्वोक्ता एव बहवः परिच्छेदास्तेषु भवो नैगमः, शेषाणामपि नयानां संग्राहादीनां लक्षणमिदं शृणुत वक्ष्येऽहमिति गाथार्थः ॥ यथा प्रतिज्ञातमेवाह "संगहिअ" गाहा, व्यख्या-सम्यग् गृहीत-उपात्तः संगृहीतः पिण्डित एकजातिमापन्नोऽर्थो विषयो यस्य संग्रहवचनस्य तत् संग्रहीतपिण्डितार्थं संग्रहस्यवचनं संग्रहवचनं 'समासतः, संक्षेपतो ब्रुवतो तीर्थकरगणधाराः, अयंहि सामान्येमेवेच्छति न विशेषान्, ततोऽस्य वचनं संगृहीतसामान्यार्थमेव भवति, अत एव सङ्गृह्णातिसामान्यरूपतया सर्वं वस्तु क्रोडीकरोतीति संग्रहोऽयमुच्यते, युक्तिश्चात्र लेशतः प्रागुदर्शितैव, "वच्चई" त्यादि, निराधिक्ये चयनं चयः पिण्डीभवनं अधिकश्चयो निश्चयः-सामान्यं विगतो निश्चयो विनिश्चयो–सामान्याभावः तदर्थं-तन्निमित्तं व्रजति-प्रवर्तते, सामान्याभावायैव सर्वदा यतते व्यवहारो नय इत्यर्थः, क ! 'सर्वं द्रव्येषु' द्रव्य विषये, लोके हि घट स्तम्भाभोरुहादयो विशेषा एव प्रायो जलाहरणादि क्रियासूपयुज्यमाना दृश्यन्ते न पुनस्तदतिरिक्तं सामान्यम्, अतो लोकव्यवहारानङ्गत्वात् सामान्यमसौ नेच्छती ति भावः, अत एव लोकव्यवहार प्रधानोनयो व्यवहारनयोऽसावुच्यते, युक्तिश्चात्रापिलेशतः प्रागुक्तैव, अथवा विशेषेण निश्चयो विनिश्चः–आगोपालाद्यंगना (द्य) वबोधो न कतिपय विद्वत्सम्बद्धः तदर्थं व्रजति व्यवहारनयः सर्वं द्रव्येषु इदमुक्तं भवति यद्यपि निश्चयेन घटादिवस्तूनि सर्वाण्यपि प्रत्येकं पचवर्णानि द्विगंधानि पंचरसान्यष्टस्पर्शानि तथाऽपि गोपालाङ्गनादीनां यत्रैव क्वचिदे कस्मिन् स्थले कालनीलवर्णादौ विनिश्चयो भवति तमेवासौ सत्त्वेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपद्यते न शेषान्, लोकव्यवहारपरत्वादेवेति गाथार्थः ॥ 'पच्चुप्पन्नं-गाही' साम्प्रतमुत्पन्नं प्रत्युत्पन्नमुच्यते वर्तमानकालभावीत्यर्थः, तद् ग्रहीतुं शीलमस्येति प्रत्युत्पन्नग्राही ऋजुसूत्रो नयविधिर्मुणितव्यः, तत्रातीतानागतयाभ्युपगमकुटिलतापरिहारेण ऋजु-अकुटिलं वर्तमान काल भावि वस्तु सूत्रयतीति ऋजुसूत्रः, अतीतनागतयो विनाशानुत्पत्तिभ्यामसत्वात्, असदभ्युपगमश्च कुटिल इति भावः, अथवा ऋजु—अवक्रं श्रुतमस्येति ऋजुश्रुतः' शेषज्ञानैर्मुख्यतया तथाविधपरोपकारासाधनात् श्रुतज्ञानमेवैक मिच्छतीत्यर्थः, उक्तंच-सुयनाणे अ निउत्तं केवलेतयाणंतरं । अप्पणो य परेसिं च, जम्हा तं परिभावगं ॥ छाया ॥ श्रुतज्ञाने च नियुक्तं (नियोक्तुं योग्यं) केवलेतदनन्तरम् । आत्मनश्च परेषाञ्च यस्मात्तत् परिभावकम् ॥१॥" त्ति, अयञ्च नयो वर्तमानमपीच्छन् स्वकीयमेवेच्छति. परकीयस्य स्वाभिमत कार्य्यसाधकत्वेन वस्तुतोऽसत्वादिति, अपरञ्च-भिन्न लिंगैर्भिन्नवचनैश्च शब्दैरेकमपि वस्त्वभिधीयते इति प्रतिजानीते-- यथा तटः तटी तटमित्यादि, तथा गुरुर्गुवः इत्यादि, तथा इंद्रा-देर्नामस्थापनादिभेदान् प्रतिपद्यते, वक्ष्यमाणनयस्त्वतिविशुद्धत्वात् लिंगवचनभेदात् वस्तुभेदं प्रतिपत्स्यते, नामस्थापनाद्रव्याणि च नाभ्युप-गमिष्यतीति भावः, इत्युक्त ऋजुसूत्रः ॥ अथ शब्द उच्यते-तत्र "शप आक्रोशे" शप्यते अभिधीयते वस्त्वनेनेति शब्दः, तमेव गुणीभूतार्थं मुख्यतया यो मन्यते स नयोऽप्युपचाराच्छब्दः, अयञ्च प्रत्युत्पन्नं वर्तमानं तदपि ऋजुसूत्राभ्युपगमापेक्षया विशेषिततरमिच्छति, तथाहि तट-स्तटी तटमित्यादि शब्दानां भिन्नान्येवाभिधेयानि, भिन्नलिंगवृत्तित्वात्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रीपुरुषनपुंस्क शब्दवदित्यसौप्रतिपद्यते, तथा गुरुर्गुरवः इत्यत्राप्याभिधेयभेद एव, भिन्नवचनवृत्तित्वात्पुरुषः पुरुषा इत्यादिवदिति, नामस्थापनाद्रव्यरूपाश्च नेन्द्राः, तत् कार्य्याकरणात खपुष्पवदिति प्राक्तनाद्विशुद्धत्वाद्विशेषिततरोऽस्याभ्युपगमः, समानलिंगवचनानां तु बहूनामपि शब्दानामेकमभिधेयमसौ मन्यते, यथेन्द्रः शक्रः पुरन्दर इत्यादि इति गाथार्थः ॥ "वत्थूओ" इत्यादि, वस्तुनः— इंद्रादेः सङ्क्रमणमन्यत्र शक्रादाविति दृश्यं, भवति अवस्तु अभवतीत्यर्थः, कस्याह नये—समभिरूढे, समभिरूढनयमतेनेत्यर्थः, तत्र वाचकभेदेनापरापरान् वाच्यविशेषान् समभिरोहति समभिगच्छति प्रतिपद्यत इति समभिरूढः, अयमत्रभावर्थः—इंद्रशक्रपुरन्दरादिशब्दान् अनन्तरं शब्दनयेन एकाभिधेयत्वेनेष्टानसौ विशुद्धतरत्वात्, प्रत्येकं भिन्नाभिधेयान् प्रतिपद्यते, भिन्नप्रवृत्तिनिमित्तत्वात् सुरमनुजादि शब्दवत्, तथाहि—इन्दतीति इन्द्रः शक्नोतीति शक्रः पुरं दारयतीति पुरंदरः, इह परमैश्वर्य्यादीनि भिन्नान्येवात्र प्रवृत्तिनिमित्तानि, एवमप्येकार्थत्वे अतिप्रसंगो, घटपटादिशब्दानामप्येकार्थताऽऽपत्तेः, एवं च सति यदा इन्द्रशब्दः शक्रशब्देन सहैकार्थ उच्यते तदा वस्तुनः परमैश्वर्य्यस्य शकनलक्षणे वस्त्वन्तरे संक्रमणं कृतं भवति, तयोरेकत्वमापादितं भवतीत्यर्थः, तच्चासम्भवित्वादवस्तु, नहि य एव परमैश्वर्य्यपर्यायः स एव शकनपर्यायो भवितुमर्हति, सर्वपर्यायसाङ्कर्यापत्तिताऽतिप्रसंगादित्यलं विस्तरेण, उक्तः समभिरूढः । 'वंजण अत्थे' त्यादि, यत् क्रियाविशिष्टं शब्देनोच्यते तामेवक्रियां कुर्वद् वस्त्वेवंभूतमुच्यते, एवं यः शब्देनोच्यते चेष्टाक्रियादिकः—प्रकारस्तमेवंभूतं प्राप्तमितिकृत्वा, ततश्चैवंभूतवस्तुप्रति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादको नयोऽप्युपचारादेवंभूतः, अथवा एवं—यः शब्देनोच्यते चेष्टाक्रियादिकः प्रकारस्तद्विशिष्टस्यैव वस्तुनोऽभ्युपगमात्तमेवंभूत—प्राप्त एवंभूत इत्युपचारमन्तरेणापि व्याख्यायते, स एवं भूतोनयः किमित्याह व्यज्यतेऽर्थोऽनेनेति व्यञ्जनं शब्दः अर्थस्तु तदभिधेयवस्तुरूपः व्यञ्जनश्चार्थश्च व्यञ्जनार्थौ तौ च तौ तदुभयं चेति समासः व्यञ्जनार्थशब्दयोर्व्यस्तनिर्देशः प्राकृतत्वात्, तद्व्यञ्जनार्थतदुभयं विषयति-नैयत्येन स्थापयति, इदमत्र हृदयम्—शब्दमर्थेनार्थं च शब्देन विशेषयति, यथा "घट चेष्टायां" घटते योषिन्मस्तकाद्यारूढश्चेष्टते इति घट इति, अत्र तदेवासौ घटो यदा योषिन्मस्तकाद्यारूढतया जलाहरणचेष्टावान् नान्यदा, घटध्वनिरपि चेष्टां कुर्वत एव तस्य वाचकोनान्यादेत्येवं चेष्टावस्थातोऽन्यत्र घटस्य घटत्वं घट शब्देन निवर्त्यते, घटध्वनेरपि तदवस्थातोऽन्यत्र घटेन स्ववाचकत्वं निवर्त्त्यते इति भावः इति गाथार्थः॥ उक्ता मूल नयाः एषाञ्चोत्तरोत्तरभेदप्रभेदा आवश्यकादिभ्योऽवसेयाः एते च सावधारणाः सन्तो दुर्नयाः, अवधारणविरहितास्तु सुनयाः, सर्वैश्च सुनयैर्मीलितैः स्याद्वाद इत्यलं बहुभाषितया॥ अत्राह कश्चित्—ननूक्ता एते नयाः, केवलं प्रस्तुते किमेतैः प्रयोजनमिति नावगच्छामः, उच्यते, उपक्रमेणोपक्रान्तस्य निक्षेपेण च यथासम्भवं निक्षिप्तस्यानुगमेनानुगतस्य च प्रक्रान्तसामायिकाध्ययनस्य विचारणाऽमीषां प्रयोजनम्। पुनरप्याह नन्वेषा नयैर्विचारणा किं प्रतिसूत्रमभिप्रेता सर्वाध्ययनस्य वा? यद्याद्यः पक्षः स न युक्तः, प्रतिसूत्रं नयविचारस्य "न नया समोयरंति इह" मित्यनेन निषिद्धत्वात्, अथापरः पक्षः सोऽपि न युक्तः, समस्ताध्ययन विषयस्यनयविचारस्य प्रागुपोद्घातनिर्युक्तौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"नए समोयारणागुमए" इत्यत्रोपन्यस्तत्वात्, न च सूत्रव्यतिरिक्त मध्ययनमस्ति यन्नयैर्विचार्य्येत, अत्रोच्यते, यस्तावत्प्रतिसूत्रं नय-विचारनिषेधः प्रेर्यते तत्राविप्रतिपत्तिरेव, किं च—आसज्ज उ सोयारं नए विसारओ वया ।। छाया—आसाद्य तु श्रोतारं नयान् नय विशारदो ब्रूयात् इति, इत्यनेनापवादिकः सोऽनुज्ञात एव, यदप्युच्यते-समस्ता-ध्ययनविषस्य नयविचारस्य प्रागुपोद्घाते" त्यादि, तत् समयानभि-ज्ञस्यैव वचनं, यस्मादिदमेव चतुर्थानुयोगद्वारं नयवक्तव्यताया मूल-स्थानम्, अत्र सिद्धानामेव तेषां तत्रोपन्यासः; यदप्युक्तं" नच सूत्र व्यतिरिक्तमध्ययन" मित्यादि, तदप्यसारंसमुदाय समुदायिनोः कार्यादिभेदतः कथञ्चिद्भेदसिद्धेः, तथाहि—प्रत्येकावस्थायामनु-पलब्धमप्युद्वहन सामर्थ्यलक्षणं कार्य्यं शिविकावाहकपुरुषसमुदाये उपलभ्यते, एवञ्च प्रत्येकसमुदितावस्थयोः कार्य्यभेदः शिविकावाह नादिषु सामर्थ्यासामर्थ्य लक्षणो विरुद्धधर्माध्यासश्च दृश्यते, यदि चाय मपि न भेदकस्तर्हि सर्वं विश्वमेकं स्यात् ततश्च सहोत्पत्त्यादि प्रसङ्गः, तस्मात् कार्य्यभेदाद् विरुद्धधर्माध्यासाच्च समुदाय समुदायिनोर्भेदः प्रतिपत्तव्यः, एवं संख्या संज्ञादिभ्योऽपि तद्भेदो भावनोयः, तस्मात् कश्चित् कचित् सूत्र विषयः समस्ताध्ययन विषश्च नय विचारो न दुष्यति, भवत्वेवं तथा ऽप्यध्ययनं नयैर्विचार्य्यमाणं किं सर्वैरेव विचार्यते ? आहोस्विद् कियद्भिरेव ? यदि सर्वैरिति पक्षः स न युक्तः, तेषाम संख्येयत्वेन तैर्विचारस्य कर्त्तुमशक्यत्वात्, तथाहि-यावन्तो वचन मार्गा स्तावन्त एव नयाः, यथोक्तम्—जावइया वयणप्पहा तावइया चेव होंति नयवाया ।। जावइया नयवाया तावइया चेव परसमया ।। १ ।। छाया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावन्तो वचनपथास्तावन्तश्चैव भवन्ति नयवादाः । यावन्तो नय वादा स्तावन्तश्चैव पर समयाः ॥ १ ॥ नच निजनिजाभिप्राय विरचितानां वचनमार्गाणां संख्या समस्ति, प्रतिप्राणि प्रायोः भिन्नत्वादभिप्रायाणां, नापि कियद्भिरिति वक्तु शक्यम् , अनवस्था प्रसङ्गात् ; संख्यातीतेषु हि तेषु यावदेभिर्विचारणा क्रियते तावदेभिरपि किं नेत्यनवस्थाप्रेरणायां न नैयत्यावस्थापकं हेतु मुत्प श्यामः, अथापि स्यादसंख्येयत्वेऽप्येषां सकलनयसंग्राहिभिर्नयैर्विचारो विधीयते, ननु तेषामपि संग्राहिनयानामनेकविधत्वात् पुनरनवस्थैव, तथाहि-पुर्वविद्भिः सकलनयसंग्राहीणि सप्तनयशतान्युक्तानि, यत् प्रतिपादकं सप्तशतारं नय चक्राध्ययनमासीद् , उक्तञ्च, एक्केको य सयविहो सत्त नय सया हवंति एवमेवेत्यादि, छाया—एकैकश्च शतविधः सप्तशतानि नया भवन्ति, एवमेव, सप्तानां च नयशतानां संग्राहकाः पुनरपि विध्यादयो द्वादशनयाः यत् प्ररूपकमिदानीमपि द्वादशारं नयचक्रमस्ति, एतत् संग्राहिणोऽपि सप्तनैगमादि नया,: तत् संग्राहिणौ पुनरपिद्रव्यपर्यायास्तिकौ नयौ ज्ञानक्रियानयौ वा निश्चय व्यवहारौ वा शब्दार्थनयौवेत्यादि, इति संग्राहक नयानामप्यनेकविधत्वाद् सैवा-नवस्था, अहो अति निपुणमुक्तं, किन्तु प्रक्रान्ताध्ययने सामायिकं विचार्यते, तच्चमुक्तिफलं ततो यदेवास्य मुक्तिप्राप्तिनिबंधनंरूपं तदेव विचारणीयं, तच्चज्ञानक्रियात्मकमेव, ततो ज्ञानक्रियानयाभ्यामे वास्य विचारो युक्ततरो नान्यैः ॥ तत्र ज्ञाननयो ज्ञानमेव मुक्तिप्रापक तया प्रतिजानीते, ततस्तन्मताविष्करणार्थमाह—

**मूलः—णायंमि गिण्हिअव्वे अगिण्हिअवंमि चेव**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अत्थमि। जइअव्वमेव इइ जो उवएसो सो नओ नाम ॥१४०॥ सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामित्ता। तं सव्व नयविसुद्धं जं चरण गुणट्ठिओ साहु ॥१४१॥ से तं नए। अणुओगद्दारा सम्मता ( सू० १५२ )**

**टीका:**—"ज्ञाते" सम्यग्-अवगते । गिण्हियव्वे" ग्रहीतव्ये उपादेय इत्यर्थः "अग्रहीतव्ये" अनुपादेये, सच हेय उपेक्षणीयश्च द्वयोरप्यग्रहणाविशेषात्, च शब्द उक्त समुच्चये, अथवा अग्रहीतव्य शब्देन हेय एवैको गृह्यते उपेक्षणीयं त्वनुक्तमप्ययमेव चकार: समुच्चिनोति, एओ गाथालंकारमात्रे, " अत्थंमित्ति " अर्थे " ऐहिकामुष्मिके, तत्र ऐहिको ग्रहीत्तव्य: स्रक्- चन्दनाङ्गनादि: अग्रहीतव्योऽहिविषकण्टकादिरुपेक्षणीयस्तृणादि:, आमुष्मिको ग्रहीतव्य:-सम्यग्दर्शनचारित्रादि: अग्रहीतव्यो मिथ्यात्वादिरुपेक्षणीयस्तुस्वर्गविभूत्यादि, एवंभूतेऽर्थे यतितव्यमेवेति, अत्रैव कारोऽवधारणे, तस्य च व्यवहित: प्रयोग: तद् यथा ज्ञात एवेति, तदयमर्थो- ग्राह्याग्राह्योपेक्षणीयेऽर्थे ज्ञात एव तत् प्राप्तपरिहारोपेक्षार्थिना यतितव्यं, प्रवृत्यादि लक्षण: प्रयत्न: कार्य्य इति, "इति" एवंभूत: सर्वव्यवहाराणां ज्ञान निबन्धनत्व प्रतिपादनपरो य उपदेश: स किमित्याह-" नय " इति प्रस्तावाज् ज्ञाननयो "नामेति। शिष्यामंत्रणे इत्यक्षरघटना ॥ भावार्थस्त्वयम्—इह ज्ञाननयोज्ञानप्राधान्यख्यापनार्थं प्रतिपादयति-नन्वैहिकामुष्मिकफलार्थिना तावत्सम्यग्विज्ञात एवार्थे प्रवर्तितव्यम्, अन्यथा प्रवृत्तौ फलविसंवाददर्शनाद् आगमेऽपि च प्रोक्तं-पढमं नाणं तओदए"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यादि, जंअन्नाणी कम्मं खवेई, त्यादि, तथा अपरमप्युक्तम् । पावाओ विणियत्ती पवत्तणा तह य कुसल पक्खंमि । विणयस्स य पडिवत्ती तिन्निवि नाणेसमप्पंति ॥ १ ॥ छाया ॥ पापाद्विनिवृत्तिः प्रवर्तना तथा च कुशलपक्षे । विनयस्य च प्रतिपत्तिस्त्रीण्यपि ज्ञानात् समाप्यन्ते ॥१॥ तथान्यैरप्युक्तं-"विज्ञप्तिः फलदा पुंसा न क्रिया फलदा मता । मिथ्या ज्ञानात्प्रवृत्तस्य फलासंवाददर्शनात् ॥ १ ॥ इति, इतश्च ज्ञानस्यैव प्राधान्यं. यतस्तीर्थंकरगणधरैरगीतार्थानां केवलानां विहारोऽपि निषिद्धः, तथा च तद् वचनम् —' गीयत्थो य विहारो बीओ गीयत्थमीसिओ भणिओ । इत्तो तइयविहारो नाणुन्नाओ जिणवरेहिं ॥ छाया —गीतार्थश्च विहारो द्वितीयो गीतार्थमिश्रितो भणितः । एताभ्यां तृतीयो विहारो नानुज्ञातो जिनवरैः ॥१॥ न यस्मादन्धेनान्धः समाकृष्यमाणः सम्यक् पंथानं प्रतिपद्यत इतिभावः, एवं तावत् क्षायोपशमिकं ज्ञानमधिकृत्योक्तं, क्षायिकमप्यङ्गी कृत्य विशिष्टफलसाधकत्वं तस्यैव विज्ञेयं, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षां प्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न तावदपवर्गप्राप्तिः संजायते यावदखिल जीवादि वस्तुस्तोमसाक्षत्करणदक्षं केवलज्ञानं नोत्पन्नं, तस्माज्ज्ञानमेव पुरूषार्थसिद्धेर्निबन्धनं, प्रयोगश्चात्र यद् येन विना न भवति तत्तन्निबन्धनमेव, यथा बीजाद्यविनाभावी तीन्नबन्धन एवाङ्कुरो, ज्ञानाविनाभाविनी च सकलपुरुषार्थसिद्धिरिति, ततश्चायं नयश्चतुर्विधे सामायिके सम्यक्त्वसामायिकश्रुतसामायिके एवाभ्युपगच्छति, ज्ञानात्मकत्वेन प्रधानमुक्तिकारणत्वात , देशविरतिसर्वविरति सामायिके तु नेच्छति, ज्ञान कार्यत्वने गौणत्वात् तयोरिति गाथार्थः ॥ विचारितं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञाननयमतेन सामायिकम्, अथ क्रियानयमतेन तद् विचार्यते-तत्रासौ क्रियैव सकलपुरुषार्थसिद्धेः प्रधानं कारणमिति मन्यमानो ज्ञाननय मतव्याख्यातामेवमेवगाथामाह—"नायम्मी" त्यादि, इयं च क्रियानय मतेनेत्थंव्याख्यायते—इह ज्ञाते ग्रहीतव्ये अग्रहीतव्ये चैवार्थे सर्वामपि पुरुषार्थसिद्धिमभिलषता यतितव्यमेवप्रवृत्यादिलक्षणा क्रियैव कर्तव्येति, एवमत्र व्याख्याने एवकारः स्वस्थान एव योज्यते, एवंचसति ज्ञातेऽप्यर्थे क्रियैव साध्या, ततो ज्ञानं क्रियोपकरणत्वाद्गौणमित्यतः सकलस्यापि पुरुषार्थस्य क्रियैव प्रधानं कारणमित्येवं य उपदेशः स नयः प्रस्तावात् क्रियानयः, शेषंपूर्ववत्। अयमपि स्वपक्षसिद्धये युक्तीरुद्भावयति—ननु क्रियैव प्रधानं पुरुषार्थसिद्धिकारणं, यत आगमेऽपि तीर्थकरगणधरै क्रिया विकलानां ज्ञानं निष्फलमेव उक्तं, सुबहुंपि सुयमहीयं किं काही चरण विमुक्कस्स। अन्धस्स जह पलित्ता दीवसयसहस्स कोडीयि ॥ १ ॥ छाया—सुबह्वपि श्रुतमधीतं किं करिष्यति चरण विप्रमुक्तस्य। अंधस्य यथा प्रदीप्ता दीपशत सहस्रकोट्यपि॥ नाणं सविसयनिययं न नाण मित्तेण कज्ज निप्फत्ती, मग्गण्णू दिट्ठंतो होइ सचिट्ठो अचिट्ठो य ॥ ।२। छाया—ज्ञानं स्वविषय नियतं न ज्ञानमात्रेण कार्यनिष्पत्तिः। मार्गज्ञो दृष्टान्तोभवति सचेष्टोऽचेष्टश्च ॥ २॥ जाणंतोऽविय तरिउं काइयजोगं न जुंजई जो। सो वुज्झइ सोएणं एवं नाणी चरणहीणो ॥ ३॥ छाया--जानन्नपि तरीतुं कायिकयोगं न युनक्ति यस्तु। स उह्यते स्रोतसा एवं ज्ञानी चरणहीनः॥ ३॥ जहा खरो चंदण भारवाहो" इत्यादि, छाया--यथा खरश्चन्दन भारवाही" इत्यादि, तथा अन्यैरप्युक्तम्—"क्रियैव फलदापुंसां न ज्ञानं फलदं मतम्। यतः स्त्रीभक्ष्य भोगज्ञो न ज्ञानात्सुखितोभवेद् ॥१॥ इति एवं तावत् क्षायोपशमिकीं चरणक्रियामङ्गीकृत्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राधान्यमुक्तम् । अथ क्षायिकीमप्याश्रित्य तस्या एव प्राधान्यमवसेयम् । यस्मादर्हतोऽपि भगवतः समुत्पन्न केवलज्ञानस्यापि न तावत् मुक्त्यावाप्तिः संपद्यते यावदखिलकर्मेन्धानानल ज्वाला कलापरूपायां शैलेश्यवस्थायां सर्वसंवररूपां चारित्र क्रियां न प्राप्नोति तस्मात् क्रियैव प्राधाना सर्व पुरुषार्थ सिद्धि कारणं: प्रयोगश्चात्र यद्यत्समनान्तरभावि तत्तत् कारणं यथा अन्त्यावस्था प्राप्त पृथिव्यादिसामग्रयनन्तरभावी तत् कारणोऽङ्कुरः क्रियानन्तरभाविनी च सकलपुरुषार्थसिद्धिरिति, ततश्चैष चतुर्विधेसामायिके देशविरति सर्व विरतिसामायिके एव मन्यते, क्रियारूपत्वेन प्रधानमुक्तिकारणत्वात् सम्यक्त्व श्रुतसामायिके तु तदुपकारित्वमात्रतो गौणत्वान्नेच्छति इति गाथार्थ ॥ ननु पक्षद्वयेऽपि युक्तिदर्शनात् किमिह तत्त्वमिति न जानीम इति शिष्यजनसम्मोहमाशंक्यज्ञानक्रियानयमतप्रदर्शनानन्तरं स्थित पक्षं दर्शयन्नाह—

"सव्वेसिंपिगाहा, नःकेवलमनन्तरोक्त नयद्वयस्य' किं तर्हि ? सर्वेषामपि' स्वतंत्रसामान्यविशेषवादीनां नामस्थापनादिवादीनां वा नयानां "वक्तव्यतां" परस्परविरोधिनी प्रोक्तिं "निशम्य" श्रुत्वा तदिह "सर्वनयविशुद्धं" सर्वनयसम्मतं तत्त्वरूपतया ग्राह्यं, यत् किमत्याह– यच्चरण गुणस्थितः साधुः' चरणं चारित्रक्रिया गुणोऽत्रज्ञानं तयोस्तिष्ठतोति चरणगुणस्थः, ज्ञानक्रियाभ्यां द्वाभ्यामपि युक्त एव साधुः मुक्तिसाधको न पुनरेकेन केनचिदितिभावः, तथाहि-यत्तावज्ज्ञानवादिनाप्रोक्तं-यद्येन विना न भवति तत्तन्निबन्धमेवेत्यादि, तत्र तदविनाभावित्त्वलक्षणो हेतुरसिद्ध एव, ज्ञानमात्राविनाभाविन्याः पुरुषार्थसिद्धेः काप्यदर्शनात् न हि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दाह पाकादर्थिनां दहन परिज्ञानमात्रादेव तत् सिद्धिर्भवति, किन्तु तदा-नयनसंधुक्षणज्वालादिक्रियानुष्ठानादपि, न च तीर्थकरोऽपि केवलज्ञान मात्रान्मुक्तिं साधयति, किन्तु यथाख्यात चारित्रक्रियातोऽपि, तस्मात् सर्वत्र ज्ञानक्रियाविनाभाविन्येव पुरुषार्थसिद्धिः, ततस्तदविनाभावित्वलक्षणो हेतुर्यथा पुरुषार्थसिद्धेर्ज्ञाननिबन्धनत्वं साधयति तथा क्रियानिबन्धनत्वमपि, तामप्यन्तरेण तदसिद्धेरित्यनैकान्तिकोऽप्यसाविति, एवं क्रिया वादिनापि यद्यत्समनन्तरभावि तत्तत् कारणमित्यादि प्रयोगे यस्तदनन्तरभावित्त्वलक्षणो हेतुरुक्तः सोऽप्यसिद्धो नैकान्तिकश्च तथाहि-स्त्री भक्ष्य भोगादिक्रिया कालेऽपि ज्ञानमस्ति तदन्तेरणतत्र प्रवृत्तरेवायोगात्, एवं शैलेश्यवस्थायां सर्व संवर रूप क्रिया कालेऽपि केवलज्ञानमस्ति, तदन्तरेण तस्या एवाप्राप्तेः, तस्मात् केवल क्रियानन्तर भावित्वेन पुरुषार्थस्य काप्यसिद्धेर सिद्धो हेतुः, यथा च तदनन्तरभावित्वलक्षणो हेतुः क्रियाकारणत्वं मुक्तयादि पुरुषार्थस्य साधयति तथा ज्ञानकारणत्वमपि, तदप्यन्तरेण तस्य कदाचिदप्यभावातदित्यनैकान्तिकताऽप्यस्येति, तस्मात् ज्ञान क्रियोभय-साध्यैव मुक्तयादि सिद्धिः, उक्तञ्च-हयं नाणं कियाहीणं हया अन्नाणओ किया। पासंतो पंगुलोदड्ढो धावमाणो य अंधओ ॥१॥ छाया—हतं ज्ञानं क्रिया हीनं हता अज्ञानतः क्रियापश्यन् पंगुर्दग्धो धावंश्चान्धः ॥ संयोग सिद्धी अ फलं वयंति नहु एग चक्केण रहो पयाइ । अंधो य पंगू य वणे समेच्चा, ते संपउत्ता नयरं पविट्ठा ॥ २ ॥ छाया—संयोग सिद्ध्याफल फलं वदंति नैवैक चक्रेण रथः प्रयाति, अन्धश्च पंगुश्च वने समेत्य तौ सम्प्रयुक्तौ नगरं प्रविष्टौ ॥ २ ॥ इत्यादि, अत्राह नन्वेवं ज्ञान क्रिययोर्मुक्त्यवाधिका शक्तिः प्रत्येकमसती समुदायेऽपिकथंस्यात् ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नहि यद्येषु प्रत्येकं नास्ति तत्तेषुसमुदितेष्वपि भवति, यथा प्रत्येक मसत् समुदितेष्वपि सिकताकणेषु तैलं, प्रत्येकमसती च ज्ञानक्रिययोर्मु-क्त्यवापिका शक्तिः, उक्तञ्च — पत्तेयमभावाओ। निव्वाणं समुदियासुवि न जुत्तं। नाण किरियासु वोत्तुं सिकता समुदाय तेल्लं व ॥१॥ छाया— प्रत्येकमभावान्निर्वाणं समुदितयोरपि न युक्तम्। ज्ञान क्रिययोर्वक्तुं सिकता समुदाय तैलमिव ॥ १ ॥ उच्यते, स्यादेतत्, यदि सर्वथा प्रत्येकं तयोर्मुक्त्यनुपकारिताऽभिधीयेत यदा तु तयोः प्रत्यकं देशोपकारिता समुदाये तु संपूर्ण हेतुता तदा न कश्चिद्दोषः, आह च वीसुं न सव्वहच्चिय सिकता तेल्लं व साहणाभावो। देसोवगारिया जा सा समवायं मि संपुण्णा ॥ छाया —विष्वक् न सर्वथैव सिकता तैलवत् साध-नाभावः। देशोपकारिता या सा समवाये सम्पूर्णा ॥१॥ अतः स्थित-मिदं-ज्ञान क्रिये समुदिते एव मुक्ति कारणं न प्रत्येकमिति तत्त्वम्। तथा च पूज्याः—नाणाहीणं सव्वं नाण नओ भणइ किं च किरियाए?। किरियाए चरण नओ तदुभयगाहो य सम्मत्तं ॥१॥ ज्ञानाधीनं सर्वं ज्ञाननय भणति किं च क्रियया। क्रियया (अधीनं) चरण न यस्तदुभय ग्राहश्च सम्यक्त्वम्। १ ।। तस्माद् भाव साधुः सर्वैरपि नयैरिष्यत एव, स च ज्ञान क्रिया युक्त एवेत्यतो व्यवस्थितमिदं—तत्सर्वनयविशुद्धं यच्चरण गुण व्यवस्थितः साधुरिति ॥ तदेवं समर्थितं नय द्वारं तत्समर्थने च समर्थितानि चत्वार्यप्युपक्रमादीनि द्वाराणि, तत् समर्थने च चानुयोग द्वारशास्त्रं समाप्तम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथश्रुतनिश्रितम्

मूलः— से किं तं सुअनिस्सिअं ? २ चउव्विहं पण्णत्तं, तंजहा उग्गह १ ईहा २ अवाओ ३ धारणा ४ ( सू० २७ )

टीका :—"से किं त" मित्यादि, अथ किं तच्छ्रुतनिश्रितं मतिज्ञानम् ? गुरुराह—श्रुतनिश्रतं मतिज्ञानं चतुर्विधं प्रज्ञप्तं, तद्यथा अवग्रह ईहा अपायो धारणा च, तत्र अवग्रहणमवग्रहः अनिर्देश्यसामान्य मात्ररूपार्थग्रहणमित्यर्थः, यदाह चूर्णिकृत् " सामन्नस्सरूवादि विसेसण रहियस्स अनिद्देसस्स अवग्गहणमवग्गह" इति । तथा ईहनमीहा, सद्भूतार्थ पर्यालोचनरूपा चेष्टा इत्यर्थः, किमुक्तं भवति—अवग्रहादुत्तर कालमवायात्पूर्वं सद्भूतार्थ विशेषोपादानाभिमुखोऽसद्भूतार्थ विशेष परित्यागाभिमुखः प्रायोऽत्र मधुरत्वादयः शंखादि शब्दधर्म्मा दृश्यन्ते न खरकर्कश निष्ठुरतादय शार्ङ्गादि शब्दधर्म्मा इत्येवंरूपो मतिविशेष ईहा,- आहच भाष्यकृत्- " भूयाभूय विसेसादाणच्चायाभिमुहमीहा" तथा तस्यैवा व ग्रहीतस्येहितस्यार्थस्य निर्णयरूपोऽध्यवसायोऽवायः शांख एवायं शाङ्ग एवा ( व वा ) यमित्यादि रूपोऽवधारणात्मक प्रत्ययोऽवाय इत्यर्थः तस्यैवार्थस्य निर्णीतस्य धरणं धारणा, साच त्रिधा—अविच्युतिर्वासना स्मृतिश्च, तत्र तदुपयोगादविच्यवनमविच्युतिः साचान्तमुहूर्त्तप्रमाणा,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तयाऽऽहितो यः संस्कारः स वासना, सा च संख्येयमसंख्येयं वा कालं यावद् भवति, ततः कालान्तरे कुतश्चित्तादृशार्थदर्शनादि कारणात् संस्कारस्य प्रबोधे यज् ज्ञानमुदयते-तदेवेदं यत् मया प्राग् उपलब्धमित्यादि रूपं सा स्मृतिः, उक्तञ्च तदनंतरं तदत्थाविच्चवणं जो उ वासणा जोगो । कालंतरेण जं पुण अनुसरणं धारणा सा उ ॥ १ ॥ छाया—तदनन्तरं तदर्थे विच्यवनं यस्तु वासना योगः । कालान्तरे यत् पुनरनुस्मरणं धारणा सा तु ॥ १ ॥ एताश्चाविच्युतिवासनास्मृतयो धारणालक्षण सामान्यान्यर्थयोगाद् धारणा शब्द वाच्याः ॥

**मूलः—से किं तं उग्गहे ? उग्गहे दुविहे पण्णत्ते, तंजहा-अत्थुग्गहे अ वंजणुग्गहे अ (सू० २८ )**

**टीका** :—"से किं त" मित्यादि; अथ कोऽयमवग्रहः ? सूरिराह अवग्रहो द्विविधा प्रज्ञप्तः तद्यथा—अर्थावग्रहश्च व्यञ्जनावग्रहश्च, तत्र अर्थ्यते इत्यर्थः अर्थस्यावग्रहणं अर्थावग्रहः—सकल रूपादिविशेष निरपेक्षा निर्देश्यसामान्यमात्र रूपार्थ ग्रहणमेकसामायिकमित्यर्थः, तथा व्यज्यते अनेनार्थोऽप्रदीपेनेव घट इति व्यञ्जनं, तच्चोपकरणेन्द्रियस्य श्रोत्रादेः शब्दादिपरिणत द्रव्याणां च परस्परं सम्बन्धः, सम्बन्धे हि सति सोऽर्थ शब्दादि रूपः श्रोत्रादीन्द्रियेण व्यञ्जयितुं शक्यते, नान्यथा, ततः सम्बन्धो व्यञ्जनं, तथाचाह भाष्यकृत्—"वंजिज्जइ जेणऽथो घडोव्व दीवेण वंजणं तं च । उवगरणिंदि य सद्दाइ परिणयदव्व संबंधो ॥ १ ॥ छाया—व्यज्यते येनार्थो घट इव दीपेन व्यञ्जनं तच्च । उपकरणेन्द्रिय शब्दादिपरिणतद्रव्यसम्बधः ॥ १ ॥ व्यञ्जनेन—सम्बन्धेनावग्रहणं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्बध्यमानस्य शब्दादि रूपस्यार्थस्याव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, अथवा व्यज्यंते इति व्यञ्जनानि, 'कृद्बहुल' मिति वचनात् 'कर्मण्यनट्' व्यञ्जनानां शब्दादिरूपतयापरिणतानां द्रव्याणामुपकरणेन्द्रियसम्प्राप्तानामवग्रहः- अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, व्यज्यतेऽनेनार्थः प्रदीपेनेव घटः इति व्यञ्जनं-उपकरणेन्द्रियं तेन स्वसम्बद्धस्यार्थस्य—शब्दादेरवग्रहणम्—अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, इयमत्र भावना—उपकरणेन्द्रियशब्दादिपरिणतद्रव्यसम्बन्धे प्रथम समयादारभ्यार्थावग्रहात् प्राक् या सुप्तमत्तमूर्च्छितादिपुरुषाणामिव शब्दादिद्रव्यसम्बन्धमात्र विषया काचिदव्यक्ता ज्ञानमात्रा सा व्यञ्जनावग्रहः, स चान्तमुहूर्त्तप्रमाणः। अत्राह —ननु व्यञ्जनावग्रहवेलायां न किमपि संवेदनं संवेद्यते, तत् कथमसौ ज्ञानरुपो गीयते ? उच्यते, अव्यक्तत्वान्न संवेद्यते, ततो न कश्चिद्दोषः, तथाहि—यदि प्रथमसमयेऽपि शब्दादिपरिणतद्रव्यैरुपकरणेन्द्रियस्य सम्पृक्तौ काचिदपि न ज्ञानमात्रा भवेत्, ततो द्वितीयेऽपि समये न भवेत्, विशेषाभावात्, एवं यावच्चरमसमयेऽपि, अथ च चरमसमये ज्ञानमर्थावग्रहरूपं जायमानमुपलभ्यते, ततः प्रागपि क्वापि कियती ज्ञान मात्रा द्रष्टव्या, अथ मन्येथाः —माभूत् प्रथमसमयादिषु शब्दादिपरिणत द्रव्य सम्बन्धेऽपि काचिदपि ज्ञानमात्रा, शब्दादिपरिणतद्रव्याणां तेषु समयेषु स्तोकत्वात, चरमसमये तु भविष्यति, शब्दादिरूपपरिणतद्रव्य समूहस्य तदानीं भूयसो भावात्, तदयुक्तं, यतो यदि प्रथमसमयादिषु शब्दादिद्रव्याणां स्तोकत्वात् सम्पृक्तावव्यक्ताऽपि काचिदपि ज्ञानमात्रा न समुल्लसेत्, तर्हि प्रभूतसमुदायसम्पर्केऽपि न भवेत्, न खलु सिकता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कणेषु प्रत्येकमसति तैललेशे समुदायेऽपितैलं समुद्भवदुपलभ्यते, अस्ति च चरमसमये प्रभूतशब्दादिद्रव्यसम्पृक्तौ ज्ञानं ततः प्राक्तनेष्वपि समयेषु स्तोकस्तोकतरैरपि शब्दादिपरिणतद्रव्यैः सम्बन्धे काचिदव्यक्ता ज्ञानमात्राऽभ्युपगंतव्या, अन्यथा चरमसमयेऽपि ज्ञानानुपपत्तेः तथा चोक्तं—"जं सव्वहा न वीसुं सव्वेसुवि तं न रेणुतेलंव । पत्तेयमणिच्छंतो कहमिच्छसि समुदये नाणं ॥१॥ छाया – यत् सर्वथा न विष्वक् सर्वेष्वपि तत् न रेणुतैलवत् । प्रत्येकमनिच्छन् कथमिच्छसि समुदाये ज्ञानम् ॥ १ ॥ ततः स्थितमेतत्-व्यञ्जनावग्रहो ज्ञानरूपः केवलं तेषु ज्ञानमव्यक्तमेव बोद्धव्यं । च शब्दौ स्वगतानेकभेदसूचकौ । ते च स्वगता अनेक भेदो अग्रे स्वयमेव सूत्रकृता वर्णयिष्यन्ते, आह—प्रथमं व्यञ्जनावग्रहो भवति ततोऽर्थावग्रहः, ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः ?, उच्यते, स्पष्टतयोपलभ्यमानत्वात्, तथाहि—अर्थावग्रहः स्पष्टरूपतयासर्वैरपि जन्तुभिः संवेद्यते, शीघ्रतरगमनादौ सकृत् सत्वरमुपलम्भे मया किञ्चिद् दृष्टं परं न परिभावितं सम्यगिति, व्यवहारदर्शनात् , अपि च-अर्थावग्रहः सर्वेन्द्रियमनोभावी व्यञ्जनावग्रहस्तु नेति प्रथममर्थावग्रहः उक्तः ॥ सम्प्रतितु व्यञ्जनावग्रहाद् ऊर्ध्वमर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रह स्वरूपं प्रतिपिपादयिषुः शिष्य प्रश्नं कारयति—

**मूल :—** "से किं तं वंजणुग्गहे ? वंजणुग्गहे चउविहे पण्णत्ते, तंजहा सोइंदिअ वंजणुग्गहे घाणिंदिय वंजणुग्गहे जिब्भिंदिय वंजणुग्गहे फासिंदिअ वंजणुग्गहे । से तं वंजणु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्गहे ( सू २६ )

टीका :—'से किं त' मित्यादि, अथ कोऽयं व्यञ्जनावग्रह: ? आचार्य आह- व्यनञ्जावग्रहश्चतुर्विध: प्रज्ञप्त:, तद्यथा- "श्रोत्रेन्द्रय-व्यञ्जनावग्रह" इत्यादि, अत्राह-सत्सु पञ्चस्विन्द्रियेषु षष्ठे च मनसि कस्मादयं चतुर्विधो व्यावर्ण्यते ?, उच्यते, इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिद्रव्याणाञ्च परस्परं सम्बन्ध उच्यते, सम्बन्धश्चतुर्णामेव श्रोत्रेन्द्रियादीनां, न नयनमनसो: तयोरप्राप्यकारित्वात्, आह-कथमप्राप्यकारित्वं तयोरवसीयते ? उच्यते विषयकृतानुग्रहोपघाताभावात्, तथाहि—यदि प्राप्तमर्थं चक्षुर्मनो वा गृह्णीयात् तर्हि यथा स्पर्शनेन्द्रियं स्रक्चन्दनादिकं अङ्गारादिकं च प्राप्तमर्थं परिच्छिन्दन्तत्कृतानुग्रहोपघातभाग् भवति तथा चक्षुर्मनसी अपि भवेतां विशेषाभावात् न च भवत: तस्मादप्राप्यकारिणी ते, ननु दृश्यते एव चक्षुषोऽपि विषयकृतानुग्रहोपघातौ, तथाहि—घनपटलविनिर्मुक्ते नभसि सवतो निविडजरटिमोपेतं-कर प्रसरमभिसर्पयन्तमंशुमालिनमनवरतमवलोकमानस्य भवति चक्षुसो विघात:, शशाङ्ककरकदम्बकं यदिवा तरङ्गमालोपशोभितं जलं तरुमण्डलञ्च शाद्वलं निरंतरं निरीक्षमाणस्य चानुग्रह:, तदेतदपरिभावितभाषितं, यतो न ब्रूम: सर्वथा विषयकृतानुपग्रहोपघातौ न भवत:, किन्त्वेतावदेव वदामो—यदा विषयं विषतया चक्षुरवलम्बते तदा तत्कृतावनुग्रहोपघातौ तस्य न भवत इति तदप्राप्यकारि, शेषकालं तु प्राप्तेनोपघातकेनोपघातो भविष्यति अनुग्राहकेण चानुग्रह:, तत्रांशुमालिनो रश्मय: सर्वत्रापि प्रसरमुपदधाना यदांऽशुमालिन: सम्मुखमीक्षते तदा ते चक्षुर्देशमपि प्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्नुवन्ति ततश्चक्षुःसम्प्राप्तास्ते स्पर्शनेन्द्रियमिव चक्षुरुपघ्नन्ति, शीतांशुरश्मयश्च स्वभावत एव शीतलत्वादनुग्राहकाः, ततस्ते चक्षुःसम्प्राप्ताः सन्तस्ते स्पर्शनेन्द्रियमिव चक्षुरनुगृह्णन्ति, तरंग मालासंकुलजलावलोकने च जलकणसंपृक्तसमीरावयवसंस्पर्शतोऽनुग्रहो भवति, शाड्वलतरुमण्डलावलोकनेऽपि शाड्वलतरुच्छाया सम्पर्कशीती भूतसमीरणसंस्पर्शात्, शेषकालं तु जलवालोकनेऽनुग्रहाभिमान उपघाताभावादवसेयः, भवति चोपघाताभावेऽनुग्रहाभिमानो यथाऽति सूक्ष्माक्षरनिरीक्षणाद्विनिवृत्य यथासुखं नीलीरक्तवस्त्राद्यावलोकने, इत्थं चैतदङ्गीकर्त्तव्यं अन्यथा समाने संपर्के यथा सूर्यमीक्षमाणस्य सूर्येणोपघातो भवति तथा हुतवहजलशूलाद्यालोकने दाहक्लेदपाटनादयोऽपि कस्मान्न भवन्तीति ? । अपि च यदि चक्षुः प्राप्यकारि तर्हि स्वदेशगतरजोमलाञ्जनशिलाकादिकं किं न पश्यति ?, तस्मात्प्राप्यकार्येवचक्षु । ननुयदि चक्षुरप्राप्यकारितर्हि मनोवत् कस्मादविशेषेण सर्वानपि दूर व्यवहितादीनर्थान् न गृह्णाति ? यदि हि प्राप्तेपरिच्छिन्द्यात्तर्हि यदेवानावृत्तमदूरदेशं वा तदेव गृह्णीयात् नावृत्तं दूरदेशं वा, तत्र चक्षुरश्मीनां गमनासंभवः सम्पर्काभावात्, ततो युज्यते चक्षुषो ग्रहणाग्रहणे, नान्यथा, तथाचोक्तं—प्राप्याकारिचक्षुः उपलब्ध्यनुपलब्ध्योरनावरणेतरानपेक्षणात् अदूरेतरापेक्षणाच्च" यदि हि चक्षुरप्राप्यकारिभवेत्तदाऽऽवरणाभावादनुपलब्धिः अन्यथोपलब्धिरिति न स्यात्, नहि तदावरणमुपघातकरणसमर्थं, प्राप्यकारित्वे तु मूर्त्तद्रव्य प्रतिघाताद् उपपत्तिमान् व्याघातोऽनिदूरे च गमनाभावादिति, प्रयोगश्चात्र—न चक्षुषोविषयपरिमाणं, अप्राप्यकारित्वात् मनोवत् तदेतदयुक्ततरम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टान्तस्य साध्यविकलत्वात्, न खलु मनोऽप्यशेषान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिष्वर्थेषु मोहदर्शनात्, तस्माद् यथा मनोऽप्राप्यकार्यपि स्वावरणक्षयोपशमसापेक्षत्वात् नियतविषयं तथा चक्षुरपि स्वावरणक्षयोपशमसापेक्षत्वदप्राप्यकार्यपि योग्यदेशावस्थितनियतविषयमिति न व्यवहितानामुपलम्भप्रसङ्गो नापि दूरदेशस्थितानामिति । अपिच दृष्टमप्राप्यकारित्वेऽपि तथास्वभावविशेषाद्योग्यदेशापेक्षणं, यथाऽयस्कान्तस्य न खल्वयस्कान्तोऽयसोऽप्राप्यकारेणे प्रवर्तमानः सर्वस्याप्ययसो जगद्वर्तिन आकर्षको भवति, किन्तु प्रतिनियतस्यैव, (यत्तु) शंकरस्वामी प्राह–"अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्तच्छायाणुभिः सह समाकृष्यमाण वस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते" इति तदेतदुन्मत्तप्रलपितुं, तद्ग्राहकप्रमाणाभावात्, नहि तत्र छायाणुसम्भवग्राहकं प्रमाणमस्ति, न चाप्रमाणकं प्रतिपत्तुं शक्नुमः, अथास्ति ग्राहकं प्रमाणमनुमानं, इह यदाकर्षणं तत् संसर्गपूर्वकं, यथाऽयो गोलकस्य सन्दंशेन, आकर्षणं चायसोऽयस्कान्तेन, तत्र साक्षादयस्कान्ते संसर्गः प्रत्यक्षबाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य इति, तदपि बालिशजल्पितं, हेतोरनैकान्तिकत्वात्, मंत्रेण व्यभिचारात्, तथाहि—मंत्रः स्मर्यमाणोऽपि विवक्षितं वस्त्वाकर्षति, न च तत्र कोऽपि संसर्गः इति, अपिच—यथा छायाणवः प्राप्तमयः समाकर्षन्ति तथा काष्ठादिकमपि प्राप्तं कस्मान्नाकर्षन्ति?, शक्तिप्रतिनियमादिति चेत् ननु स शक्तिप्रति नियमोऽप्राप्तावपि तुल्य एवेति व्यर्थं छायाणुपरिकल्पनं । अन्यस्त्वाह—अस्ति चक्षुषः प्राप्यकारित्वे व्यवहितार्थानुपलब्धिरनुमानं प्रमाणं, तदयुक्तं, अत्रापि हेतोरनैकान्तिकत्वात्, काचाभ्रपटलस्फटिकैरन्तरितस्याप्युपलब्धेः, अथेदमा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्षीथाः—नायना रश्मयो निर्गत्य तमर्थं गृह्णन्ति, नायनाश्च रश्मयस्तैजसत्वान्न तेजोद्रव्यैः प्रतिस्खल्यन्ते, ततो न कश्चिद्दोषः, तदपि न मनोरमं महाज्वालादौ स्खलनोपलब्धेः, तस्मादप्राप्यकारि चक्षुरिति स्थितं ।। एवं मनसोऽप्राप्यकारित्वं भावनीयं, तत्रापि विषय कृतानुग्रहोपघाताभावाद्, अन्यथा तोयादिचिन्तायामनुग्रहोऽग्निशस्त्रादिचिन्तायांचोपघातो भवेत् , ननु दृश्यते मनसोऽपि हर्षादिभिरनुग्रहः, शरीरोपचयदर्शनात्, तथाहि—हर्षप्रकर्षवशान्मनसोऽपि पुष्टता भवति, तद्वशाच्च स्वशरीरस्योपचयः, तथोपघातोऽपि शोकादिभिर्दृश्यते, शरीरदौर्बल्योरःक्षतादिदर्शनात् , अतिशोककरणतोहि मनसो विघातः सम्भवति ततस्तद् वशाच्छरीर दौर्बल्यमतिचिन्तावशाच्च हृद्रोग इति, तदेतदतीवासम्बद्धं यत इह मनसोऽप्राप्यकारित्वं साध्यमानं वर्तते, विषयकृतानुग्रहोपघाताभावात्, न चेह विषयकृतानुग्रहोपघातौ त्वयामनसोदर्श्येते तत् कथं व्यभिचारः ?, मनस्तु स्वयं पुद्गलमयत्वाच्छरीरस्यानुग्रहोपघातौ करिष्यति, यथेष्टानिष्टरूप आहारः, तथाहि-इष्टरूप आहारः परिभुज्यमानः शरीरस्यपोषमाधत्ते, अनिष्टरूपस्तूपसंघातं ( स्तूपघातं ), तथा मनोऽप्यनिष्टपुद्गलोपचितमति शोकादिचिन्तानिबन्धनं शरीरस्य हानिमादधाति, इष्टपुद्गलोपचित्तं च हर्षादिकारणं पुष्टिं, उक्तञ्च—" इट्टानिट्टाहारऽब्भवहारे होंति पुट्ठिहाणिओ । जहतहमणसो ताओ पुग्गलगुणउत्ति को दोसो ? ।। १ ।। छाया—इष्टानिष्टाहाराभ्यवहारे भवतः पुष्टिहानी । यथा तथा मनसस्ते पुद्गलगुणत्वादिति को दोषः ? ।। १ ।। तस्मान्मनोऽपि विषयकृतानुग्रहोपघाताभावादप्राप्यकारीति स्थितं, " इह सुगतमतानुसारिणः श्रोत्रमप्यप्राप्यकारि प्रपद्यन्ते, तथा च तद्ग्रंथः— "चक्षुःश्रोत्रंमनोऽप्राप्यकारी " ति तदयुक्तं, इहा प्राप्यकारि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्प्रतिपत्तुं शक्यते यस्य विषयकृतानुग्रहोपघाताभावो, यथा चक्षुर्मनसोः, श्रोत्रस्य च शब्दकृत उपघातो दृश्यते, सद्योजात बालकस्य समीपे महा-- प्रयत्नताडितझल्लरीझात्कारश्रवणतो यद्वा विद्युत् प्रपाते तत् प्रत्यासन्नदेशवर्तिनां निर्घोषश्रवणतो बधिरीभावदर्शनात्, शब्दपरमाणवो हि उत्पत्तिदेशादारभ्य सर्वतो जलतरङ्गन्यायेन प्रसरमभिगृह्णानाः श्रोत्रेन्द्रियदेशमागच्छन्ति, ततः सम्भवत्युपघातः, ननु यदि श्रोत्रेन्द्रियं देशं प्राप्तमेव शब्दं गृह्णाति नाप्राप्तं तर्हि यथा गन्धादौ गृह्यमाणे न तत्र दूरासन्नादितया भेदप्रतीतिरेवं शब्देऽपि न स्यात्, प्राप्तो हि विषयः परिच्छिद्यमानः सर्वोऽपि सन्निहित एव, तत कथं तत्र दूरासन्नादिभेदप्रतीतिर्भवितुमर्हति ?, अथ च प्रतीयते शब्दो दूरासन्नादितया, तथा च लोके वक्तारः श्रूयन्ते,—कस्यापि दूरे शब्द इति, अन्यच्च-यदि प्राप्तः शब्दो गृह्यते श्रोत्रेन्द्रियेण तर्हि चाण्डालोक्तोऽपि शब्दः श्रोत्रियेण श्रोत्रेन्द्रियसंस्पृष्टो गृह्यते इति श्रोत्रेन्द्रियस्य चाण्डालस्पर्शदोषप्रसंगः, तन्न श्रेयः श्रोत्रेन्द्रियस्य प्राप्यकारित्वं, तदेतदतिमहामोहस्य मलीमसभाषितं त (य) तो यद्यपि शब्द प्राप्यो गृह्यते श्रोत्रेन्द्रियेण तथापि यत उत्थितः शब्दस्तस्य दूरासन्नत्वे शब्देऽपि स्वभाववैचित्र्यसंभवाद्दूरासन्नादिभेदप्रतीतिर्भवति, तथाहि—दूरादागतः शब्दः क्षीणशक्तिकत्वात्खिन्न उपलक्ष्यते अस्पष्टरूपो वा, ततो लोको वदति-दूरे शब्दः श्रूयते, अस्य च वाक्यस्यायं भावार्थो—दूरादागतः शब्दः श्रूयते इति, स्यादेतत्-एवमति प्रसंगःप्राप्नोति, तथाहि—एतदीप वक्तुं शक्यते—दूरे रूपमुपलभ्यते, किमुक्तं भवति ?—दूरागतं रूपमुपलभ्यते इति, ततश्चक्षुरपि प्राप्यकरि प्राप्नोति, नचेष्यते, तस्मान्नैतत् समीचीनमिति, तदयुक्तं, यत इह चक्षुषो रूपकृतावनुग्रहोपघातौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नोपलभ्येते, श्रोत्रेन्द्रियस्य तु शब्दकृत उपघातोऽस्ति, एतच्चप्रागेवोक्तं, ततो नातिप्रसंगापानमुपपत्तिमत्, अन्यच्च—प्रत्यासन्नोऽपि जनः पवनस्य प्रतिकूलमवतिष्ठमानः शब्दं न शृणोति; पवनवर्त्मनि तु वर्तमानो दूरदेशस्थितोऽपि शृणोति, तथाचलोके वक्तारो-न वयं प्रत्यासन्ना अपि त्वदीयं वचः शृणुमः, पवनस्य प्रतिकूलमवस्थानात्, यदि पुनरप्राप्तमेव शब्दं रूपमिव जनाः प्रमिणुयुः, तर्हि वातस्य प्रतिकूलमप्यवतिष्ठमाना रूपमिवशब्दं प्रमिणुयुः, न च प्रमिण्वन्ति, तस्मात् प्राप्ता एव शब्दपरमाणवः श्रोत्रेन्द्रियेण गृह्यन्ते इति अवश्यमभ्युपगन्तव्यम्, तथा च सति पवनस्य प्रतिकूलमवष्ठिमानानां श्रोत्रेन्द्रियं न शब्दप्रमाणवो वैपुल्येन प्राप्नुवन्ति, तेषामन्यथा वातेन नीयमानत्वात्, ततो न ते शृण्वन्तीति न काचित् क्षतिः, यदपि चोक्तं चाण्डालस्पर्शदोषः प्राप्नोती"ति", तदपि चेतनाविकलपुरुषभाषितमिवासमीचीनं, स्पर्शास्पर्शव्यवस्थाया लोके काल्पनित्वात्, तथाहि—न स्पर्शव्यवस्था लोके पारमार्थिकी, तथाहि—यामेव भुवमग्रे चाण्डालः स्पृशन् प्रयाति तामेव पृष्ठतः श्रोत्रियोऽपि, तथा यामेव नावमारोहति स्म चाण्डालस्तामेवारोहति श्रोत्रियोऽपि, तथा स एव मारुतश्चाण्डालमपि स्पृष्ट्वा श्रोत्रियमपि स्पृशति, न च तत्र लोके स्पर्शदोषव्यवस्था, तथा शब्दपुद्गलस्पर्शोऽपि न भवतीतिनकश्चिद्दोषः, अपि च—यथा केतकीदलनिचयं शतपत्रादिपुष्पनिचयं वा शिरसि निवध्य वपुषि वा मृगमदचन्दनाद्यवलेपनमारचय्यविपणिवीथ्यमागत्यचाण्डालोऽवतिष्ठते तदा तद्गतकेतकीदलादिगंधपुद्गलाः श्रोत्रियादिनासिकास्वपि प्रविशन्ति, ततस्तत्रापि चाण्डालस्पर्शदोषः प्राप्नोतीति तद्दोषभयान्नासिकेन्द्रियमप्राप्यकारि प्रतिपत्तव्यं, न चैतद् भवतोऽप्यागमे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपाद्यते, ततो बालिशजल्पितमेतदिति कृतं प्रसंगेन ॥ केचित्पुनः श्रोत्रेन्द्रियस्य प्राप्यकारित्वमभ्युपगच्छन्तः शब्दस्याम्बरगुणत्वं प्रतिपद्यन्ते, तदयुक्तं, आकाशगुणतायां शब्दस्यामूर्त्तत्त्वप्रसक्तेः, योहि यद्गुणः स तत्समानधर्मा, यथा ज्ञानमात्मनः, तथाहि—अमूर्त्त आत्मा, ततस्तद् गुणो ज्ञानमप्यमूर्त्तमेव, एवं शब्दोऽपि यद्याकाशगुणस्तर्ह्याकाशस्यामूर्त्तत्वाच्छब्दस्यापि तद्गुणत्त्वेनामूर्त्तता भवेत् , न चासौ युक्तिसंगता, तल्लक्षणायोगात् , मूर्तिविरहो ह्यमूर्त्तताया लक्षणं, न च शब्दानां मूर्तिविरहः, स्पर्शवत्त्वात् , तथाहि—स्पर्शवन्तः शब्दाः, तत्संपर्कादुपघातदर्शनाल्लोष्ठवत् , न चायमसिद्धो हेतुः, यतो दृश्यते सद्योजातबालकानां कर्णदेशाभ्यर्णीकृतगाढास्फालितझल्लरीझात्कारश्रवणतः श्रवणस्फोटो, न चेत्थमुपघातकृत्त्वमस्पर्शवत्त्वे सम्भवति, यथा विहायसः, ततो विपक्षे गमनासम्भवान्नानैकान्तिकोऽपि, अतश्च स्पर्शवन्तः शब्दाः, तैरभिघाते गिरिगह्वरभित्यादिषु शब्दोत्थानाल्लोष्ठवत्,अयमपि हेतुरुभयोरपि सिद्धिः,तथाहि--श्रूयन्ते तीव्रप्रयत्नोच्चारितशब्दाभिघाते गिरिगह्वरादिषु प्रतिशब्दाः प्रति दिक् , ततः स्पर्शवत्त्वान्मूर्त्ता एव शब्दाः, "रूपस्पर्शादिसन्निवेशो मूर्त्ति" रिति वचन प्रामाण्यात् , ततः कथमिवाकाशगुणत्वं शब्दानामुपपत्तिमत् , ? । अपि च—तदाकाशमेकमनेकं वा ? यद्येकं तर्हि योजनलक्षादपि श्रूयते, आकाशस्यैकत्वेन शब्दस्य तद्गुणतया दूरासन्नादिभेदाभावात्. अथानेकमेवं सति वदनदेश एव स विद्यते इति कथं भिन्नदेशवर्तिभिः श्रोतृभिः श्रूयते ?, वदनदेशाकाशगुणतया तस्य श्रोतृगतश्रोत्रेन्द्रियाकाशसन्बन्धाभावात् अथ च श्रोत्रेन्द्रियाकाशसबन्धतया तच्छ्रवणमभ्युपगम्यते, तन्नाकाश गुणत्वाभ्युपगमः शब्दस्य श्रेयान्, नन्वाकाशगुणत्त्वमन्तरेण शब्दस्याव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थानमेव नोपपद्यते, अवश्यंहि पदार्थेन स्थितिमता भवितव्यं, तत्र रूपरसस्पर्शगंधानां पृथिव्यादिमहाभूतचतुष्टयमाश्रयः, शब्दस्य त्वाकाशमिति, तदयुक्तं, एवं सति पृथिव्यादीनामप्याकाशगुणत्वप्रसक्तेः, तेषामप्याकाशाश्रितत्वात्, न खल्वाकशमन्तरेणपृथिव्यादीनामप्यन्यदाश्रयः, अगुणत्वात्पृथिव्यादीनामाकाशगुणत्वमनुपपन्नमितिचेत्, न, आकाशाश्रितत्त्वेन भवन्नीत्याबलादपि तद् गुणत्वप्रसक्ते, अथ नाश्रयण मात्रं तद् गुणत्व निवन्धनं किन्तु समवायः, सचास्ति शब्दस्याकाशे न तुपृथिव्यादीनामिति, ननुकोऽयं समवायो नाम ? एकत्रलोलीभावेनावस्थानं यथा पृथिव्यादिरूपाद्योरितिचेत्, न तर्हि शब्दस्य काशगुत्वमाकाशेनसहैकत्र लोलीभावेन तस्याप्रतिपत्तेः, अथाऽऽकाशे उपलभ्यमानत्वात्तद्गुणताशब्दस्य, तूलकादेरपि तर्ह्याकाशे उपलभ्यमानत्वात्तद्गुणत्वं प्राप्नोति, अथ तूलकादेः परमार्थतः पृथिव्यादिस्थानमाकाशेतूपलम्भो वायुना सञ्चार्य्यमाणत्वात्, यद्येवं तर्हि शब्दस्यापि न परमार्थतः स्थानमाकाशं किन्तु श्रोत्रादि, यत् पुनराकाशेऽवस्थानमुपलभ्यते तद् वायुना सञ्चार्य्यमाणत्वादवसेयं, तथाहि—यतो यतो वायुः सञ्चरति ततस्ततः शब्दोऽपिगच्छति, वातप्रतिकूलशब्दस्याश्रवणात्, उक्तं च—"यथा च प्रेर्यते तूलमाकाशे मातरिश्वना । तथा शब्दोऽपि किं वायोः, प्रतीपं कोऽपि शब्दवित्" तन्नाकाशगुणः शब्दः किन्तु पुद्गलमय इति स्थितम् ॥

**मूलः**—से किं तं अत्थुग्गहे ? अत्थुग्गहे छव्विहेपण्णत्ते, तंजहा सोइंदिअअत्थुग्गहे चक्खिंदिअ अत्थुग्गहे, घाणिंदिअ अत्थुग्गहे । जिब्भिंदिअ अत्थुग्गहे फासिंदिअ अत्थुग्गहे नोइं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिअ अत्थुग्गहे ॥ (सू० ३०)

**टीका :**—अथ कतिविधोऽयमर्थावग्रहः ?, सूरिराह—अर्थावग्रहः षड्विधः प्रज्ञप्तः, तद्यथा यथा—'श्रोत्रेन्द्रियार्थावग्रहः' इत्यादि, श्रोत्रेन्द्रियार्थावग्रहः, (श्रोत्रेन्द्रियेण) व्यञ्जनावग्रहोत्तरकालमेकसामायिकमनिर्देश्यसामान्यरूपार्थावग्रहणंश्रोत्रेन्द्रियार्थावग्रहः, एवं घ्राणजिह्वास्पर्शनेन्द्रियोर्थाग्रहेष्वपि वक्यं, चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न भवति, ततस्तयोः प्रथममेव स्वरूपद्रव्यगुणक्रियाविकल्पनातीतमनिर्देश्यं सामान्यमात्रारूपार्थावग्रहणमर्थावग्रहोऽवसेयः। तत्र "नोइंदिय अत्थावग्गहो" त्ति नो इन्द्रियं—मनः, तच्चद्विधा—द्रव्यरूपं भावरूपं च, तत्र मनःपर्याप्तिनामकर्मोदयतो यत मनः प्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमितं तद्द्रव्यरूपंमनः, तथा चाह चूर्णिकृत् "मणपज्जत्ति नाम कम्मोदयओ तज्जोग्गे मणोदव्वे घेत्तुं भणत्तेण परिणामिया दव्वादव्वमणो भण्णइ।" तथा द्रव्यमनोऽवष्ठम्भेन जीवस्य यो मननपरिणामः स भावमनः, तथा चाह चूर्णिकार एव—"जीवो पुण मणणपरिणामकिरियापन्नो भावमणो, किं भणियं होइ ?—मणदव्वालंबणो जीवस्स मणणवावारो भावमणो, भण्णइ" तत्रेह भावमनसा प्रयोजन, तदग्रहणे ह्यवश्यंद्रव्यमनसोऽपि ग्रहणं भवति, द्रव्यमनोऽन्तरेणभावमनसोऽसम्भवात्, भावमनो विनापि च द्रव्य मनो भवति, यथा भवस्थकेवलिनः, तत् उच्यते—भावमनसेह प्रयोजनं, तत्र नोन्द्रियेण—भावमनसाऽर्थावग्रहो द्रव्येन्द्रियव्यापारनिरपेक्षोघटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामायिकोरूपाद्यर्थाकारादिविशेषचिन्ताविकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मकोबोधो नो इन्द्रियार्थावग्रहः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मूल**—तस्स णं इमे एगट्ठिआ नाणाघोसा नानावंजणा पंच नामधिज्जा भवन्ति, तंजहा-ओगेण्हणया उवधारणया सवणया अवलंबणया मेहा । सेत्तं उग्गहे (सू० ३१)

**टीका**:—'तस्य' सामान्येनावग्रहस्य "ण" मिति वाक्यालंकारे 'अमूनि' वक्ष्यमाणानि एकार्थिकानि 'नाना घोसाणि' त्ति घोषाः—उदात्तादयः स्वरविशेषाः, आह च चूर्णिकृत्—"घोसा उदात्तादओ सरविसेसा" नाना घोषा येषां तानि नानाघोषाणि, तथा नानाव्यञ्जनानि—कादीनि येषां तानि नाना व्यञ्जनानि, पञ्चनामान्येव नामधेयानि भवन्ति, 'तद्यथे' ति तेषामेवोपदर्शने, 'ओगिण्हणया' इत्यादि, यदा पुनरवग्रहविशेषानपेक्ष्यामूनि पञ्चापिनामधेयानि चिन्त्यन्ते तदा परस्परंभिन्नार्थानि वेदितव्यानि, तथाहि—इहावग्रहस्त्रिधा, तद्यथा—व्यञ्जनावग्रहः सामान्यार्थावग्रहो विशेषसामान्यार्थावग्रहश्च, तत्र विशेषसामान्यर्थावग्रह औपचारिकः, सचानन्तरमेवाग्रे दर्शयिष्यते, तत्र 'ओगिण्हणय' त्ति अवगृह्यतेऽनेनेति अवग्रहणं, करणेऽनट्, व्यञ्जनावग्रहप्रथमसमयप्रविष्टशब्दादिपुद्गलादानपरिणामः, तद् भावोऽवग्रहणता । तथा 'उवधारणय' त्ति धार्यतेऽनेनेतिधारणं, उप-सामीप्येनधारणं उपधारणं—व्यञ्जनावग्रहेऽपि द्वितीयादिसमयेषुप्रतिसमयमपूर्वापूर्वशब्दादि पुद्गलादानपुरस्सरं प्राक्तनप्राक्तनसमयगृहीतशब्दादिपुद्गलधारणपरिणामः तद् भाव उपधारणता, तथा "सवणय" त्ति श्रूयतेऽनेनेति श्रवणम्—एकसामायिकः सामान्यार्थावग्रहरूपो, बोधपरिणामः तद्भावः श्रवणता, तथा 'अवलंबणय' त्ति अवलम्ब्यते इति अवलम्बनं, 'कृद्बहुल' मिति वचनात् कर्मण्यनट्, विशेषसामान्यार्थावग्रहः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथं विशेषसामान्यार्थावग्रहोऽवलम्बनमिति ?, चेत् , उच्यते,—इह शब्दोऽयमित्यपि ज्ञानं विशेषावगमनरूपत्वाद् अवायज्ञानं, तथाहि—शब्दोऽयं नाशब्दो—रूपादिः, इति शब्दस्वरूपावधारणं विशेषावगमः, ततोऽस्मात् यत्पूर्वमनिर्देश्यसामान्यमात्रग्रहणमेकसामयिकं स पारमार्थिकार्थावग्रहः, तत ऊर्ध्वं तु यत्किमिदमिति विमर्शनं सा ईहा, तदनन्तरं तु यच्छब्दस्वरूपावधारणं शब्दोऽयमिति तदवायज्ञानं, तत्रापि यदा उत्तरधर्मजिज्ञासा भवति—किमयं शब्दः शाङ्खः किं वा शाङ्गः ? इति तदा पाश्चात्य शब्द इति ज्ञानं विशेषावगमापेक्षया सामान्यमत्रालम्बनमित्यवग्रह इत्युपचर्य्यते, स च परमार्थतः सामान्यविशेषरूपार्थालम्बन इति विशेषसामान्यार्थावग्रह इत्युच्यते, इदमेव च शब्द इति ज्ञानमवलम्ब्य किमयं शांखः ? किं वा शाङ्गः ? इति ज्ञानमुदयते, ततो विशेषसामान्यार्थावग्रहोऽवलम्बन इत्युक्तः, ततोऽवलम्बनस्य भावोऽवलम्बनता, ततोऽप्यूर्ध्वं किमयं शांखः ? किं वा शाङ्ग इतीहित्वा यच्छांख एव शाङ्ग एव वेति ज्ञानं तदवायज्ञानं, तदपि च किमयं शांखोऽपि शब्दः मंद्रः किं वा तारः ? इत्युत्तरविशेष जिज्ञासायां पाश्चात्य पाश्चत्यमवायज्ञानमुत्तरोत्तरविशेषावगमापेक्षया सामान्यार्थावलम्बनमित्यवग्रह इत्युपचर्य्यते, किं मन्द्रः ? किं वा तारः ? इतीह मन्द्र एवायं तार एवायमित्यवायः, एवमुत्तरोत्तरविशेष जिज्ञासायां पाश्चात्यं पाश्चात्यमवाय ज्ञानमुत्तरोत्तर विशेषावगमापेक्षया सामान्यार्थावलम्बनमित्यवग्रह इत्युपचर्य्यते, यदा उत्तरधर्मजिज्ञासा न भवति तदा तदंत्यं विशेषज्ञानमवाय ज्ञानमेव, नावग्रह इत्युपचर्य्यते, उपचारनिबंधनाभावात्, उत्तरविशेषाकांक्षाया अपगमात्, ततस्तदनन्तरमविच्युतिरूपाधारणा प्रवर्तते, वास-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नास्मृती तु सर्वेष्वपि विशेषावगमेषु द्रष्टव्ये, तथा चाह प्रवचनोपनिषदवेदी भगवान् जिनभद्रगणिक्षमाश्रमण:— "सामन्नमेत्तगहणं निच्छयत्रो समयमोग्गहो पढ़मो । तत्तोऽणंतरमीहिय वत्थु विसेसस्स जोऽवाओ ॥१॥ छाया—सामान्यमात्रग्रहणं निश्चयत: समयमवग्रह: प्रथम: । ततोऽनन्तर मोहितवस्तुविशेषस्य योऽपाय: ॥ १ ॥ सो पुणरीहावायाविक्खाओ उग्गहत्ति उवयरिओ । एस विसेसावेक्खा सामन्नं गेण्हए जेण ॥ २ ॥ छाय —स पुनरीहापायापेक्षयाऽवग्रह इति उपचरित: । एष विशेषापेक्षया सामान्यं गृह्णाति येन ॥ २ ॥ तत्तोऽणंतरमीहा तओ अवाओ य तव्विसेसस्स । इह सामन्न विसेसाऽवेक्खा जावंतिमो भेओ ॥ ३ ॥ छाया—ततोऽनन्तरमीहा ततोऽपायश्च तद्विशेषस्य । इह सामान्यविशेषापेक्षा यावदन्तिमो भेद: ॥ ३॥ सव्वत्थेहावाया निच्छयओ मोत्तुमाइसामन्नं । संववहारत्थं पुण सव्वत्थावग्गहोऽवाओ ॥ ४ ॥ छाया सर्वत्रेहापायौ निश्चयतो मुक्त्वाऽऽदि सामान्यम् । संव्यवहारार्थं पुनः सर्वत्रावग्रहोऽपाय: ॥ ४ ॥ तरतमजोगाभावेऽवाओ च्चियधारणा तदंतंमि । सव्वत्थ वासणा पुण भणिया कालंतरसई य ॥ ५ ॥" छाया—तारतम्ययोगाभावेऽपाय एव धारणा तदन्ते । सर्वत्र वासना पुनर्भणिता कालान्तरस्मृतिश्च ॥५॥ त्ति, तथा 'मेह' त्ति मेधा प्रथमं विशेषसामान्यार्थावग्रहमितिरिच्योत्तर: सर्वोऽपि विशेषसामान्यार्थावग्रह: ॥ तदेवमुक्तानि पञ्चापि नामधेयानि भिन्नार्थानि, यत्र तु व्यञ्जनावग्रहो न घटते तत्राद्यं भेदद्वयं न द्रष्टव्यं, 'सेत्तं उग्गहो' त्ति निगमनम् ।

**मूल:—** ' से किं तं ईहा ?, २ छव्विहा पण्णत्ता, तंजहा-सोइंदिअईहा चक्खिदिय ईहा घाणिंदिअईहा जिब्भिदिअईहा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फासिंदिअईहा नोइंदिअ ईहा, तीसे णं इमे एगट्ठिआ नाणाघोसा नाणावंजणा। पंच नाम धिज्जा भवंति, तं जहा—आभोगणया मग्गणया गवेसणया चिता विमंसा, से तं ईहा ॥ ( सू० ३२ )

टीका :—अथ केयमीहा ?, ईहा षड्विधा प्रज्ञप्ता, तद्यथा—श्रोत्रेन्द्रियेहा इत्यादि, तत्रश्रोत्रेन्द्रियेणेहा श्रोत्रेन्द्रियेहा, श्रोत्रेन्द्रियार्थावग्रहमधिकृत्य या प्रवृत्ता ईहा सा श्रोत्रेन्द्रियेहा इत्यर्थः, एवं शेषा अपि साधनीयाः। 'तीसे णं' मित्यादि सुगमं। नवरं सामान्यत एकार्थिकानि, विशेष चिन्तायां पुनर्भिन्नार्थानि, तत्र ' आभोगणय' ति आभोग्यतेऽनेनेति आभोगनं—अर्थावग्रहसमनन्तरमेव सद्भूतार्थविशेषाभिमुखमालोचनं तस्यभाव आभोगनता, तथा मार्ग्यतेऽनेनेति मार्गणं—सद्भूतार्थ विशेषाभिमुखमेव तदूर्ध्वमन्वयव्यतिरेकधर्मान्वेषणं तद्भावो मार्गणता तथा—गवेश्यतेऽनेनति गवेषणं-तत ऊर्ध्वं सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मत्यागतोऽन्वय धर्माध्यासालोचनं तद् भावोगवेषणता, ततो मुहुर्मुहुः क्षयोपशमविशेषतः स्वधर्मानुगतसद्भूतार्थविशेषचिन्तनं चिन्ता, तत् ऊर्ध्वंक्षयोपशमविशेषात् स्पष्टतरं सद्भूतार्थविशेषाभिमुखमेव व्यतिरेक धर्मपरित्यागतोऽन्वयधर्मापरित्यागतोऽन्वयधर्मे विमर्शनं विमर्शः। 'से तं ईहे' त्तिनिगमनम् ॥

मूलः—" से किं तं अवाए? २ अवाए छव्विहे पण्णत्ते, तंजहा सोइंदिअअवाए चक्खिंदिअअवाए घाणिंदिअअवाए जिब्भिंदिअअवाए फासिंदिअअवाए नोइंदिअअवाए

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तस्स णं इमे एगट्ठिआ नाणाघोसा नाणावंजणा पंचनामधिज्जा भवन्ति, तं जहा—आउट्टणया पच्चाउट्टणया अवाए बुद्धि विण्णाणे, से तं अवाए ॥ ( सू० ३३ )**

**टीकाः**—अत्र श्रोत्रेन्द्रियेणावायः श्रोत्रेन्द्रियावायः, श्रोत्रेन्द्रियनिमित्तामर्थावग्रहमधिकृत्य यः प्रवृत्तोऽपायः स श्रोत्रेन्द्रियापाय इत्यर्थः, एवं शेषा अपि भावनीयाः । 'तस्स णं' मित्यादि प्रागवत्' अत्रापि सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्नानार्थानि, तत्र आवर्त्तते—ईहातो निवृत्यापायभावं प्रत्यभिमुखो वर्त्तते येन बोधपरिणामेन स आवर्त्तनस्तद्भाव आवर्तनता, तथा आवर्तनं प्रति येगता अर्थ विशेषपूत्तरोत्तरेषु विवक्षिता अपायप्रत्यासन्नतरा बोधविशेषास्ते प्रत्यावर्तनाः तद्भावः प्रत्यावर्तनता, तथा अपायो-निश्चयः सर्वथा ईहाभावाद् विनिवृत्तस्यावधारणा-अवधारितमर्थमवगच्छतो यो बोधविशेषः सोऽपाय इत्यर्थः, ततस्तमेवावधारितमर्थं क्षयोपशमविशेषात् स्थिरतया पुनः, पुनः स्पष्टतरमवबुध्यमानस्य या बोधपरिणतिः सा बुद्धिः, तथा विशिष्टं ज्ञानं विज्ञानं—क्षयोपशमविशेषादेवावधारितार्थविषय एव तीव्रतरधारणा हेतुबोधविशेषः, 'से तं अवाए' इति निगमनम् ॥

**मूल :—से किं तं धारणा ? धारणा छव्विहा पण्णत्ता, तंजहा सोइंदिअधारणा चक्खिंदिअधारणा घाणिंदिअधारणा जिब्भिंदिअधारणा फासिंदिअधारणा नोइंदिअधारणा । तीसे णं इमे एगट्ठिआ नाणाघोसा नाणावंजणा पंच ना-**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मधिज्जा भवंति, तंजहा धारणा साधारणा ठवणा पइट्ठा कोट्ठे, से तं धारणा ॥ ( सू० ३४ )**

टीका – 'से किं त' मित्यादि सुगमं यावद्धारणा इत्यादि, अत्रापि सामान्यत एकार्थानिविशेषार्थचिन्तायां पुनर्भिन्नार्थानि, तत्रापायानन्तरमवगतस्यार्थस्याविच्युत्याऽन्तमुहूर्त्तकालं यावद्धरणं धारणा, ततस्तमेवार्थमुपयोगात् च्युतं जघन्यतोऽन्तमुहूर्त्तादुत्कर्षतोऽसंख्येयकालात् परतो यत्स्मरणं सा धारणा, तथा स्थापनं स्थापना, आपायावधारितस्यार्थस्य हृदिस्थापनं, वासेनेत्यर्थः, अन्ये तु धारणास्थापनयोर्व्यत्यासेनस्वरूपमाचक्षते, तथा प्रतिष्ठापनं प्रतिष्ठा—अपायावधारितस्यैवावर्थस्य हृदिप्रभेदेन प्रतिष्ठापनमित्यर्थः, कोष्ठ इव कोष्ठः अविनष्टसूत्रार्थधारणमित्यर्थः। 'से तं धारण सेयंधारणा'।

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# दर्शनविषयः

**मूलः**—दुविहे दंसणे पन्नत्ते तं०—सम्मदंसणे चेव मिच्छादंसणे चेव १ सम्मदंसणे दुविहे पं तं०—णिसग्गसमद्दंसणे चेव अभिगमसम्मद्दंसणे चेव २ णिसग्गसम्मद्दंसणे दुविहे पं, तं०—पडिवाई चेव अपडिवाई चेव ३ अभिगमसम्मद्दंसणे दुविहे पं, तं०— पडिवाई चेव अप्पडिवाई चेव ४ मिच्छादंसणे दुविहे पं, तं०— अभिग्गहियमिच्छदंसणे चेव ५ अणभिग्गहिय मिच्छादंसणे चेव अभिग्गाहियमिच्छादंसणे दुविहे पं, तं०— सपज्जवसिते चेव अपज्जवसिते चेव ६ एवं अणभिगहितमिच्छा-दंसणेऽवि७ (सू० ७० )

**टीका :**— 'दुविहे दंसणे' इत्यादि सूत्राणि सप्त सुगमान्येव, नवरं, दृष्टिर्दर्शनम्—तत्त्वेषु रुचिः तच्च सम्यग्—अविपरीतं जिनोक्तानुसारि, तथा मिथ्या—विपरीतमिति । 'सम्मदंसणे' इत्यादि, निसर्गः स्वभावोऽनुपदेश इत्यनर्थान्तरं, अभिगमोऽधिगमो गुरूपदेशादिरिति, ताभ्यांयत्तत् तथा, क्रमेण मरुदेवीभरतवदिति, 'निसर्गे' त्यादि, प्रतिपतनशीलं प्रतिपाति सम्यग् दर्शनमौपशमिकं क्षायोप-शमिकं च, अप्रतिपाति क्षायिकं, तत्रैषां क्रमेण लक्षणं—इहौपशमिकी श्रे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णीमनुप्रविष्टस्यानन्तानुबन्धिनां दर्शनमोहनीयत्रयस्य चोपशमादौपशमिकं भवति, यो वाऽनादिमिथ्यादृष्टिरकृतसम्यक्त्वमिथ्यात्वमिश्राभिधान शुद्धाशुद्धोभयरूपमिथ्यात्वपुद्गलत्रिपुञ्जीक एव अक्षीणमिथ्यादर्शनोऽक्षपक इत्यर्थः, सम्यक्त्वं प्रतिपद्यते तस्यौपशमिकं भवतीति, कथं ?—इह यदस्य मिथ्यादर्शनमोहनीयमुदीर्णं तदनुभवेनैवोपक्षीणमन्यत्तु मन्दपरिणामतया नोदितमतस्तदन्तमुहूर्त्तमात्रमुपशान्तमास्ते, विष्कम्भितोदयमित्यर्थः, तावतं कालमस्यौपशमिकसम्यक्त्वलाभ इति, आह च— 'उवसामगसेढिगयस्स' होइ उवसामिअं तु सम्मत्तं । जो वा अकयतिपुञ्जो अखवियमिच्छो लहइ सम्मं ॥ छाया— उपशमश्रेणिगतस्य भवति औपशमिकं तु सम्यक्त्वम् । यो वाऽकृतत्रिपुञ्जोऽक्षपित मिथ्यात्वो लभते-सम्यक्त्वम् ॥ १ ॥ खीणम्मि उदिन्नंमि अणुदिज्जंते य सेसमिच्छत्ते । अन्तोमुहुत्त कालं उवसमसम्मं लहइ जीवो ॥ २ ॥" छाया—क्षीणे उदीर्णे अनुदीर्णे च शेषमिथ्यात्वे । अन्तमुहूर्त्तकालमौपशमिकसम्यक्त्वं लभते जीवः ॥ २ "॥ त्ति । अन्तमुहूर्त्तमात्रकालत्वादेवास्य प्रतिपातित्वं, यच्चानन्तानुबन्ध्युदये औपशमिकसम्यक्त्वात् प्रतिपततः सास्वादनमुच्यते तदौपशमिकमेव तदपि च प्रतिपात्येव, जघन्यतः समयमात्रत्वादुत्कृष्टतस्तु षडावलिकामानत्वादस्येति, तथेह यदस्य मिथ्यादर्शन दलिकमुदीर्णं तदुपक्षीणं यच्चानुदीर्णं तदुपशान्तम्, उपशान्तं नाम विष्कम्भितोदयमपनीतमिथ्यास्वभावं च, तदिहक्षयोपशमस्वभावमनुभूयमानं क्षायोपशमिकमित्युच्यते, नन्वौपशमिकेऽपि क्षयश्चोपशमश्चतथेहापीतिकोऽनयोर्विशेष ?, उच्यते, अयमेवहि विशेष—यदिह वेद्यते दलिकं न तत्र, इह हि क्षायोपशमिके पूर्वशमितमनुसमयमुदेति वेद्यते क्षीयते च,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



औपशमिके तूदर्यविष्कम्भणमात्रमेव, आहच—मिच्छत्तं जमुइन्नं तं खीणं अणुइयं च उवसंतं। मीसीभाव परिणयं वेइज्जंतं खओवसमं ॥ १॥ छाया—मिथ्यात्वं यदुदीर्णं तत् क्षीणं अनुदीर्णं चोपशान्तम्। मिश्रीभाव परिणतं वेद्यमानं क्षायोपशमिकम् ॥ १॥ त्ति, एतदपि जघन्यतोऽन्तमुहूर्त्त स्थितिकत्वादुत्कर्षतः षट्षष्ठि सागरोपमस्थितिकत्वाच्च प्रतिपातीति, यदपि च क्षपकस्य सम्यग्दर्शनदलिकचरमपुद्गलानुभवनरूपं वेदकमित्युच्यते तदपि क्षायोपशमिकभेदत्वात् प्रतिपात्येवेति, तथा मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वमोहनीयक्षयात्, क्षायिकमिति, आहच—"खीणे दसणमोहे तिविहंमिविभवनियाणभूयंमि। निप्पच्चवायमउलं सम्मत्तं खाइयं होइ। ॥ १॥ छाया—क्षीणे दर्शनमोहे त्रिविधेऽपि भवनिदानभूते। निष्प्रत्यपायमतुलं सम्यक्त्वं क्षायिकं भवति ॥ १॥ त्ति, इदन्तु क्षायिकत्वादेवाप्रतिपाति, अत एव सिद्धत्वेऽप्यनुवर्त्तते इति। 'मिच्छादंसणे' इत्यादि, अभिग्रहः—कुमतपरिग्रहः स यत्रास्ति तदाभिग्राहिकं तद् विपरीतम्—अनभिग्रहिकमिति। 'आभिग्गहिए' इत्यादि अभिग्राहिक मिथ्यादर्शनं सपर्यवसितं—सपर्यवसानं सम्यक्त्व प्राप्तौ, अपर्यवसितमभव्यस्य सम्यक्त्वाप्राप्तेः, तच्च मिथ्यात्व मात्रमप्यतीत काल नयानुवृत्त्याऽऽभिग्राहिकमिति व्यापदिश्यते, अनभिग्राहिकं भव्यस्य सपर्यवसितमितरस्यापर्यवसितमिति, अत एवाह—एवं अणभी' त्यादि। दर्शनमभिहितमथ ज्ञानमभिधीयते, तत्र 'दुविहे नाणे इत्यादीनि आवस्सग वइरित्ते दुविहे' इत्यादि सूत्रावसानानि त्रयो विंशतिः सूत्राणि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मूल**—दुविहे नाणे पं० तं०—पच्चक्खे चेव परोक्खे चेव १, पच्चक्खे नाणे दुविहे पन्नत्ते तं०—केवलनाणे चेव णोकेवलनाणे-चेव २, केवलणाणे दुविहे पं० तं०—भवत्थकेवलनाणे चेव सिद्धकेवलनाणे चेव ३ भवत्थकेवलणाणे दुविहे पं० तं०—सजोगिभवत्थकेवलणाणे चेव, अजोगिभवत्थकेवलणाणे चेव ४, सजोगि भवत्थकेवलणाणे दुविहे पं० तं०—पढमसमयसजोगिभवत्थकेवलणाणे चेव अपढमसमयसजोगिभवत्थकेवलणाणे चेव ५, अहवा चरिमसमयसजोगिभवत्थकेवलणाणे चेव अचरिमसमयसजोगि भवत्थकेवलणाणे चेव ६, एवं अजोगिभवत्थकेवलनाणेऽवि ७, ८, सिद्धकेवलणाणे दुविहे पं० तं०—अणंतरसिद्धकेवलणाणे चेव परंपरसिद्धकेवलणाणे चेव ९, अणंतरसिद्धकेवलनाणे दुविहे पं० तं०—एक्काणंतरसिद्धकेवलणाणे चेव अणेक्काणंतरसिद्धकेवलणाणे १०, परंपरसिद्ध केवलणाणे दुविहे पं० तं०—एक्कपरंपरसिद्धकेवलणाणे चेव अणेक्कपरंपरसिद्धकेवलणाणे चेव ११, णोकेवलणाणे दुविहे पं० तं०—ओहिणाणे चेव मणपज्जवणाणे चेव १२, ओहिणाणे दुविहे पं० तं०—भवपच्चइए चेव खओवसमिए चेव १३, दोण्हं भवपच्चइए पन्नत्ते, तं०—देवाणं चेव नेरइयाणं चेव १४, दोण्ह खओवसमिए पं० तं०—मणुस्साणं चेव पंचिंदिय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिरिक्खजोणीयाणं चेव १५, मणपज्जवणाणे दुविहे पं०तं ०—उज्जुमति चेव विउलमति चेव १६० परोक्खेणाणे दुविहे पन्नत्ते, तं– आभिणिवोहियणाणे चेव सुयनाणे चेव, १७ आभिणिवोहियणाणे दुविहे पं०तं०—सुयनिस्सिए चेव असुयनिस्सिए चेव १८, सुयनिस्सिए दुविहे पं० तं०—अत्थोग्गहे चेव वंजणोग्गहे चेव १९, असुयनिस्सितेऽवि एमेव २०, सुयनाणे दुविहे पं० तं०— अंगपविट्ठे चेव अंगवाहिरे चेव २१, अंगवाहिरे दुविहे पं० तं०— आवस्सए चेव आवस्सयवइरित्ते चेव २२, आवस्सयवतिरित्ते दुविहे पं० तं०—कालिए चेव उक्कालिए चेव ॥२३॥, (सू० ७१)

टीका:—सुगमानि, नवरं 'ज्ञानं' विशेषावबोध: अश्नाति-भुंक्ते अश्नुते वा—व्याप्नोति ज्ञानेनार्थानित्यक्ष:—आत्मा तं प्रति यद्वर्तते इन्द्रिय-मनोनिरपेक्षत्वेन तत् प्रत्यक्षम्—अव्यवहितत्वेनार्थसाक्षात्करणदक्षमिति, आह च—" अक्खो जीवो अत्थव्वावणभोयण गुणण्णिओ जेण। तं पइ वट्टइ नाणं जं पच्चक्खं तमिह तिविहं ॥१॥" छाया—अक्षो जीवोऽर्थव्यापन भोजनगुणान्वितो येन। तं प्रति वर्तते ज्ञानं यत्प्रत्यक्षं तदिहत्रिविधम् ॥ १ ॥ 'ति' परेभ्य:—अक्षापेक्षया पुद्गलमयत्वेन द्रव्येन्द्रियमनोभ्योऽक्षस्य—जीवस्य यत्तत्परोक्षं निरुक्तवशादिति, आहच—अक्खस्सपोग्गलकया जं दव्विंदियमणा परा तेण। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व ॥ १ ॥" छाया—अक्षात् पुद्गलमयानि यद्द्रव्येन्द्रियमनांसि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पराणि तेन । तेभ्यो यद् ज्ञानं परोक्षमिह तदनुमानमिव, ॥ १ ॥ " त्ति, अथवा परैरक्षा-सम्बन्धनं जन्यजनकभावलक्षणमस्येति परोक्षं—इन्द्रिय मनो-व्यवधानेनात्मनोऽर्थप्रत्यायकमसाक्षात्कारीत्यर्थः॥ 'पच्चक्खे' त्यादि केवलं—एकं ज्ञानं केवलज्ञानं तदन्यन्नोकेवलज्ञानम्—अवधिमनःपर्य्यायलक्षण मिति । 'केवले' त्यादि, " भवत्थकेवलनाणे चेव" त्ति भवस्थस्य केवल-ज्ञानं यत्तत्तथा, एवमितरदपि, 'भवत्थे' त्यादि, सहयोगैः—कायव्यापारादि भिर्यःस सयोगी, इन्समासान्तत्वात् स चासौ भवस्थश्च तस्य केवल-ज्ञानमितिविग्रहः, न सन्ति योगा यस्य स न योगीति वा योऽसावयोगी—शैलेशीकरणव्यवस्थितः, शेषं तथैव, ' सयोगी ' त्यादि, प्रथमः समयः सयोगित्वे यस्य स तथा, एवमप्रथमो—द्वयादिसमयो यस्य स तथा, शेषं तथैव, " अथवे" त्यादि, चरमः— अन्त्य समयो यस्य सयोग्यवस्थायाः स तथा, शेषं तथैव, 'एव' मिति सयोगि सूत्रवत्प्रथमाप्रथमचरमाचरमविशेषण-युक्तमयोगिसूत्रमपिवाच्यमिति, 'सिद्धे' त्यादि, अनन्तर सिद्धो यः सम्प्रति समयेसिद्धः, सचैकोऽनेको वा, तथा परम्परसिद्धो यस्य द्वयादयः समयाः सिद्धस्य सोऽप्येकोऽनेकोवेति, तेषां यत् केवलज्ञानं तत्तथाव्यपदिश्यत इति । 'ओहिनाणे' इत्यादि, ' भवपच्चइए' ति क्षयोपशमनिमित्तत्वेऽप्यस्य क्षयोपशमस्यापि भव प्रत्ययत्वेन तत्प्राधान्येन भव एव प्रत्ययो यस्य तद् भव प्रत्ययमिति व्यपदिश्यत इति, इदमेवभाष्यकारेण साक्षेपपरिहार मुक्तं, तत्राक्षेपः—" ओहीखओवसमिए भावे भणितो भवो तहोदइए । तो किह भवपच्चइओ वोत्तुं जुत्तोऽवही दोण्हं" ?॥ छाया—अवधिःक्षायोप-शमिके भावे भाणीतो भवस्तथौदयिके । ततःकथं भव प्रत्ययिको वक्तुं युक्तोऽवधिर्द्वयोः ? ॥१॥ (दोण्हं) ति देवनारकयोः, अत्रपरिहारः—सोऽवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हु खओवसमियो किन्तु स एव उ ख्र ओवसमलाभो। तंमि सइ होइऽवस्सं भए-णइ भवपच्चओ तो सो ॥१॥ छाया—सोऽपिक्षायोपशामिकः किन्तु स एव तु क्षयोपशमलाभः। तस्मिन् सति भवत्यवश्यं भण्यते भवप्रत्ययिकस्ततः ॥१॥ यतः—उदयक्खयखओवसमोवसमावि अ जं च कम्मुणो भणिया। दव्वं खेत्तं कालं भवं च भावं च संपप्प ॥ १ ॥ छाया—उदयक्षयक्षयोपशमो-पशमा यच्चकर्मणो भणिताः। द्रव्यं क्षेत्रंकालं भवञ्च भावञ्चसंप्राप्य ॥१॥ 'त्ति, तथा तदावरणस्य क्षयोपशमेभवं क्षायोपशमिकमिति। 'मणपज्जवे' त्यादि, ऋज्वी-सामान्यग्राहिणीमतिः ऋजुमतिः-घटोऽनेन चिन्तत इत्य-ध्यवसायनिबन्धनंमनोद्रव्यपरिरच्छित्ति रित्यर्थः, विपुला—विशेष ग्राहिणीमतिः विपुलमतिः—घटोऽनेन चिन्तितः स च सौवर्णः पाटलि पुत्रिकोऽद्यतनोमहान् इत्याद्यध्यवासायहेतुभूता मनोद्रव्यविज्ञप्तिरिति। आह च—'रिजु सामरणं तम्मत्त गाहिणी रिजुमती मणोनाणं। पायंविसेस विमुहं घडमेत्तं चिन्तितं मुणइ ॥ १ ॥' छाया—ऋजुः सामान्यं तन्मात्र ग्राहिणी ऋजुमतिर्मनोज्ञानम्। प्रायोविशेषविमुखं घटमात्रं चिन्तितं जा नाति ॥१॥ "विउलंवत्थु विसेसणमाणं तग्गाहिणी मती विउला। चिंतिय-मणुसरइघडं पसंगओ पज्जयसएहिं ॥" छाया—विपुलं वस्तु विशेषणमानं तद् ग्राहिणीमतिः विपुला। चिन्तितमनुस्मरति घटं प्रसङ्गतः पर्यायशतैः ॥ २ ॥ 'आभिणिबोहिए' इत्यादि, श्रुतं कर्मतापन्नं निश्रितं-आश्रितं श्रुतं वा निश्रितमनेनेतिश्रुतनिश्रितं, यत् पूर्वमेवश्रुतकृतोपकारस्येदानीं पुनस्तद नपेक्षमेवानुप्रवर्त्तते—तदवग्रहादि लक्षणं श्रुतनिश्रितमिति, यत्पुनः पूर्वं तद परिकर्मितमतेः क्षयोपशमपटीयस्त्वादौत्पत्तिकयादिलक्षणमुपजायतेऽन्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द् वा श्रोत्रादिप्रभवं तदश्रुतनिश्रितमिति, आह च—"पुव्वं सुयपरिकम्मिय मतिस्स जं संपयं सुयाइय । (त्तं) सुयास्सियमियरं पुण आणिस्सियंमइ च उक्कं (तं)" ॥ १ ॥ छाया—पूर्वं श्रुतपरिकर्मितमतेयत् साम्प्रतं श्रुतातीतम् । तन्निश्रितमितरत् पुनरनिश्रितं मतिचतुष्कं तत् ॥१॥" ति 'सुए' त्यादि, अत्थोग्गहे' त्ति अर्यते-अधिगम्यतेऽर्थ्यते वा अन्विष्यत इत्यर्थः, तस्य सामान्यरूपस्यअशेषविशेषनिरपेक्षानिर्देश्यस्य रूपादेरेवग्रहणं—प्रथम परिच्छेदनमर्थावग्रह इति. निर्विकल्पकं ज्ञानं दर्शनमिति यदुच्यते इत्याथः, स च नैश्चयिको यः स सामयिको यस्तु व्यवहारिक शब्दोऽयमित्याद्युल्लेखवान् स आन्तर्मौहूर्त्तिक इति, अयं चेन्द्रियमनःसम्बन्धात् षोढा इति, तथा व्यज्यतेऽनेनाथः प्रदीपेनेव घट इति व्यञ्जनं, तच्चोपकरणेन्द्रियं शब्दादित्वपरिणतद्रव्यसंघातो वा, ततश्च व्यञ्जनेन—उपकारणेन्द्रियेण शब्दादित्वपरिणतद्रव्याणां व्यञ्जनानामवग्रहो व्यंजनावग्रह इति, अथवा व्यंजनं-इन्द्रियशब्दादिद्रव्यसम्बन्ध इति, आह च— "वंजिज्जइ जेणऽत्थो घडोव्व दीवेण वंजणं तोतं । उवगरणिंदय सद्दादिपरिणयद्दव्व संबन्धो ॥१॥" छाया— व्यज्यते येनार्थो घट इव दीपेन व्यंजन ततस्तत् उपकरणेन्द्रियशब्दादिपरिणतद्रव्यसम्बन्धः ॥१॥ 'त्ति' अयं च मनो नयनवर्जेन्द्रियाणां भवतोति चतुर्द्धा, नयनमनसोरप्राप्तार्थपरिच्छेदकत्वात् इतरेषां पुनरन्यथेति, ननु व्यंजनावग्रहो ज्ञानमेव न भवति, इन्द्रियशब्दादिद्रव्यसम्बन्धकाले तदनुभवाभावात्, बधिरादीनामिवेति, नैवं, व्यंजनावग्रहान्ते तद्वस्तु ग्रहणादेवोपलब्धिसद्भावात्, इह यस्य ज्ञेयवस्तु ग्रहणस्यान्ते तत एव ज्ञेयवस्तूपादानात् उपलब्धिर्भवति तत् ज्ञानं दृष्टं, यथाऽर्थावग्रहपर्यन्ते तत एवार्थावग्रहग्राह्यवस्तु ग्रहणाद् ईहासद्भावात् अर्थावग्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हज्ञानमिति, आह च 'अन्नाणं सो बहिराइण व तक्कालमणुवलंभाओ। [आचार्यः] न तदन्ते तत्तोच्चिय उवलंभाओतयं नाणं ॥१॥ छाया— अज्ञानं स बधिरादीनामिव तत् कालमनुपलम्भात। न तदन्ते तदेवोपलम्भात्त कत् ज्ञानम् ॥१॥ ति, किंच- व्यंजनावग्रहकालेऽपि ज्ञानमस्त्येव, सूक्ष्मा-व्यक्तत्वात्तु नोपलभ्यते, सुप्ताव्यक्तविज्ञानवदिति. ईहादयोऽपि श्रुतर्निश्रिता एव, नतूक्ताः, द्विस्थानकानुरोधादिति। 'असुयनिस्सिएऽवि एमेव' ति अ-र्थावग्रहव्यंजनावग्रहभेदेनाश्रुतनिश्रितमपि द्विधैवेति, इदं च श्रोत्रादिप्र-भवमेव, यत्तु औत्पत्तिक्याद्यश्रुतनिश्रितं तत्रार्थावग्रहःसम्भवति, यदाह— "किहपडि कुक्कडहीणो जुज्झे बिंबेण उग्गहो ईहा। किं सुसिलिट्ठमवाओ द-प्पण संकंत बिंबंति ॥१॥" छाया—कथं प्रतिकुक्कटहीनो युध्यति बिम्बेनाव-ग्रह ईहा। किं सुश्लिष्टमवायो दर्पणसंक्रान्तंबिम्बमिति ॥ १ ॥ न तु व्यंजनावग्रहः तस्येन्द्रियाश्रितत्वात, बुद्धीनान्तु मानसत्वात्, ततो बुद्धिभ्योऽन्यत्र व्यंजनावग्रहोमन्तव्य इति। 'सुयणाणे' इत्यादि' प्रवचनपुरुषस्याङ्गानीवाङ्गानि तेषु प्रविष्टं—तदभ्यन्तरं तत स्वरूपमित्यर्थः, तच्चगणधरकृतं "उप्पन्ने इवे" त्यादि मातृका पदत्रयप्रभवं वा ध्रुव श्रुतं वा आचारादि, यत्पुनः—स्थविरकृतं मातृकापदत्रयव्यतिरिक्तव्याकरण निबद्धमध्रुवश्रुतं वोत्तराध्ययनादि तदंग बाह्यमिति ॥ आहच—"गणहर १ थेराइकतं आएसा मुक्कवागरणाओ वा २। धुव १ चल विसेसणाओ २ अंगाणंगेसुनाणत्तं" ॥१॥ छाया—गणधर स्थविरादिकृतं आदेशात् मुक्त व्याकरणतो वा। ध्रुवचल विशेषणाद्वा अङ्गानङ्गयोः नानात्वम् ॥१॥ 'अंगबाही' त्यादि अवश्यं कर्त्तव्यमित्यावश्यकं—सामायिकादि षड्विधम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आहच--"समणेण सावएण य अवस्स कायव्वयं हवइ जम्हा। अंतो अहो-णिसस्स य तम्हा आवस्सयंनामं ॥१॥छाया--श्रमणेन श्रावकेण चावश्यं कर्त्तव्यं भवति यस्मात्। अंतेऽन्होनिशश्च तस्मादावश्यकं नाम॥१॥ आवश्यकाद् व्यतिरिक्तं ततो यदन्यदिति। "आवस्सगवतिरित्त" इत्यादि यदिह दिवसनिशाप्रथमपश्चिमपौरुषीद्वय एव पठ्यते तत् कालेन निर्वृत्तं कालिकम्--उत्तराध्ययनादि, यत् पुनः कालवेलावर्जपठ्यतेतदूर्ध्वे कालिकादित्युत्तरकालिकं--दशकालिकादीति॥ उक्तं ज्ञानं, चारित्रं प्रस्तावयति—

**मूलः**—दुविहे धम्मे पं० तं०—सुयधम्मे चेव चरित्तधम्मे चेव, सुयधम्मे दुविहे पं० त०—सुत्तसुयधम्मे चेव अत्थसुयधम्मे चेव, चरित्तधम्मे दुविहे पं, तं०—अगारचरित्तधम्मे चेव अणगारचरित्तधम्मे चेव, दुविहे संजमे पं० तं०—सरागसंजमे चेव वीतरागसंजमे चेव, सरागसंजमे दुविहे पं० तं०—सुहुमसंपराय सरागसंजमे चेव, वादरसंपरायसरागसंजमे चेव, सुहुमसंपराय सरागसंजमे दुविहे पन्नत्ते तं०—पढमसमयसुहुमसंपरायसराग-संजमे चेव अपढमसमयसु०, अथवा चरमसमय सु० अचरम समय सु०, अहवा सुहुमसंपरायसरागसंजमे दुविहे पं, तं०—संकिलेसमाणए चेव विसुज्झमाणए चेव, वादरसंपरायसराग-संजमे दुविहे पं० तं०—पढमसमयवादरसं० अपढमसमय वादर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सं०—अहवा चरिमसमय० अचरिम समय०, अहवा बायरसंपराय सरागसंजमे दुविहे पं० तं०—पडिवाति चेव अपडिवाति चेव, वीयरागसंजमे दुविहे पं० तं०—उवसंतकसायवीयरागसंजमे चेव खीणकसायवीयरागसंजमे चेव, उवसंतकसायवीयराग संजमे दुविहे पं० तं०—पढमसमयउवसंतकसायवीतरागसंजमे चेव, अपढमसमयउव०, अहवा चरिमसमय० अचरिमसमय०, खीणकसायवीतरागसंजमे दुविहे पं० तं०—छउमत्थखीणकसाय वीयरागसंजमे चेव केवलिखीणकसायवीयरागसंजमे चेव, छउमत्थखीणकसायवीयरागसंजमे दुविहे पं० तं०—सयंबुद्ध छउमत्थखीणकसाय० बुद्धबोहियछउमत्थ०, सयंबुद्धछउमत्थ० दुविहे प० तं०—पढमसमय० अपढमसमय०, अहवा चरिमसमय० अचरिमसमय०, बुद्धबोहियछउमत्थखीण० दुविहे पं० तं०—पढमसमय० अपढमसमय०, अहवा चरिमसमय० अचरिमसमय०, केवलिखीणकसायवीतरागसंजमे दुविहे पं० तं०—सजोगि केवलिखीणकसाय० अजोगिकेवलिखीणकसायवीयराग०, सजोगिकेवलिखीणकसायसंजमे दुविहे पं० तं०— पढमसमय० अपढमसमय०, अहवा चरिमसमय० अचरिमसमय०, अजोगि केवलिखीणकसाय० संजमे दुविहे पं० तं०—पढमसमय०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अपढमसमय०, अहवा चरिमसमय० अचरिमसमय० (सू०७२)**

**टीकाः**—दुर्गतौ प्रपततो जीवान् रुणद्धि सुगतौ च तान्-धारयतीतिधर्मः श्रुतं—द्वादशाङ्गं तदेवधर्मः श्रुतधर्मः, चर्यते-आसेव्यते यत् तेन वा चर्यते-गम्यते मोक्ष इति चरित्रं—मूलोत्तरगुणकलापस्तदेव धर्मश्चारित्रधर्म इति। 'सुयधम्मे' इत्यादि, सूच्यन्ते सूच्यन्ते वाऽर्था अनेनेतिसूत्रं, सुस्थितत्वेन व्यापित्वेन च सुष्ठूक्तत्वादवा सूक्तं सुप्तमिव वा सुप्तम्, अव्याख्यानेन प्रबुद्धावस्थत्वादिति;भाष्यवचनंत्वेवं—सिञ्चतिखरइ जमत्थं तम्हा सुत्तं;निरुत्त विहिणा वा। सूएइ सवति सुव्वइ सिव्वइ सरए व जेणत्थं॥१॥ छाया—सिञ्चति क्षरति यस्मादर्थं तस्मात् सूत्रं निरुक्तविधिना वा, सूचयति श्रवति श्रूयते सिच्यते स्मर्यते वा येनाथः॥१॥ अविवरियं सुत्तंपि व सुट्ठियवावित्तओ सुवुत्तं' ति छाया—अविवृतं सुप्तमिव सुस्थितव्यापित्वात् सूक्तमिति॥ अर्यतेऽधिगम्यतेऽर्थ्यते वा याच्यते बुभुत्सुभिरित्यर्थो-व्याख्यानमिति, आहच-'जो सुत्ताभिप्पाओ सो अत्थो अज्जए य जम्हति' छाया—यः सूत्राभिप्रायःसोऽर्थोऽर्यते च यस्मादिति। 'चरित्ते' त्यादि, अगारं-गृहं तद्योगादागाराः—गृहिणस्तेषां यश्चारित्रधर्मः—सम्यक्त्वमूलाणुव्रतादि पालनरूपः स तथा, एवमितरोऽपि, नवरमगारं नास्ति येषां तेऽनगाराः साधव इति। चरित्रधर्मश्च संयमोऽतस्तमेवाह—'दुविहे' त्यादि, सह रागेण-अभिष्वङ्गेण मायादिरूपेण य स सरागः स चासौ संयमश्च सरागस्य वा संयम इति वाक्यम्। वीतो—विगतो रागो यस्मात् स चासौ संयमश्च वीतरागस्य वा संयम इति वाक्यमिति। 'सरागे' त्यादि, सूक्ष्मः—असंख्याताकट्टकावेदनतः सम्परायः-कषायः सम्परैति-संसरति संसारं जन्तुरनेनेति व्युत्पादनात्, आह च-कोहाइ संपराओ तेण जुओ संपरीति संसारं' ति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छाया –क्रोधाद्या. संपरायास्तैर्यु तः संपरैति संसारम्। स च लोभकषायरूपः उपशमकस्य क्षपकस्य वा यस्य स सूक्ष्म संपराय: साधुस्तस्य सरागसंयम:, विशेषणसमासो वा भणनीय इति, बादरा:—स्थूरा: सम्परायाः कषाया यस्य साधो यस्मिन् वा संयमे: स तथा—सूक्ष्मसम्परायप्राचीनगुणस्थानकेषु, शेषं प्रागवदिति।'सुहुमे' त्यादि, सूत्रद्वये प्रथमाप्रथमसमयादिविभागः केवलज्ञानवदिति।'अहवे' त्यादि, संक्लिश्यमानः संयम: उपशमश्रेण्याः प्रतिपततः, विशुद्धयमानस्तामुपशमश्रेणीं वा समारोहत इति। 'बादरे' त्यादि सूत्रद्वयं, बादर सम्पराय सरागसंयमस्य प्रथमाप्रथमसमयता संयम प्रतिपत्तिकालापेक्षया चरमाचरमसमयतातु यदनन्तरं सूक्ष्मसम्परायता असंयतत्वं वा भविष्यति तदपेक्षयेति, 'अहवे' त्यादि, प्रतिपाती उपशमकस्यान्यस्य वा अप्रतिपातीक्षपकस्येति । सरागसयम उक्तोऽतो वीतरागसंयममाह — 'वीयरागे' त्यादि, उपशान्ताः प्रदेशतोऽप्यवेद्यमानाः कषाया यस्य यस्मिन् वा स तथा साधुः संयमोवेति –एकादश गुणस्थानवर्त्तीति, क्षीणकषायो द्वादशगुणस्थानवर्त्तीति, 'उवसंते' त्यादि सूत्रद्वयं प्रागिव ' खीणे' त्यादि, छादयत्यात्मस्वरूपं यत्तत् छद्मज्ञानावरणादिघातिकर्म तत्र तिष्ठतीति छद्मस्थः—अकेवली, शेषं तथैव, केवलम् उक्तस्वरूपं ज्ञानं च दर्शनं चास्यास्तीति केवलीति। 'छउमत्थे' त्यादि, स्वयं बुद्धादिस्वरूपं प्रागिवेति, 'सयंबुद्ध' त्यादि नव सूत्राणि गतार्थान्येवेति ॥
(स्थानाङ्ग सूत्र ७२ उद्देश १)

**मूल:**—''अथवा तिविधे ववसाते पं० तं०-- पच्चक्खे पच्च- तिते आणुगामिए ॥ ५,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका :—व्यवसायो-निश्चयः, स च प्रत्यक्षोऽवधिमनःपर्यायकेवलाख्यः, प्रत्ययात्—इन्द्रियानिन्द्रियलक्षणान्निमित्ताज्जातः प्रात्ययिकः साध्यम्—अग्न्यादिकमनुगच्छति साध्याभावे न भवति यो धूमादिहेतुः सोऽनुगामी ततो जातमानुगामिकम्-अनुमानं तद्रूपो व्यवसाय आनुगामिक एवेति, अथवा प्रत्यक्षः स्वयंदर्शनलक्षणः प्रात्ययिकः-आप्तवचनप्रभवः, तृतीयस्तथैववेति ५। (स्थानांग सू० स्थान ३ उ. ३ सू १८५)

मूलः—चउविहेणाते पं० तं०—आहरणे आहणतद्देसे आहरणतद्दोसे उवन्नासोवणए १ आहरणे चउव्विहे पं० तं०—अवाते उवाते ठवणाकम्मे पडुप्पन्नविणासी २, आहरणतद्देसे चउव्विहे पं० तं०—अणुसिट्ठी उवालंभे पुच्छा निस्सावयणे ३, आहरणतद्दोसे चउव्विहे पं० तं०—अधम्मजुत्ते पडिलोमे अंतोवणीते दुरुवणीते ४ उवन्नासोवणए चउव्विहे पं० तं०—तव्वत्थुते तदन्नवत्थुत्ते पडिनिभे हेतु ५ हेऊचउव्विहे पं० तं०—जावते थावते वंसते लूसते, अहवा हेऊचउव्विहे पं० तं०—पच्चक्खे अणुमाणे ओवम्मे आगमे, अहवा हेऊचउव्विहे पं० तं०—अत्थित्तंअत्थिसो हेऊ १ अत्थित्तंणत्थि सो हेऊ २ णत्थित्तं अत्थि सो हेऊ ३ णत्थित्तं णत्थितं सो हेऊ ४ (सू० ३३८)

टीका :—तत्र ज्ञायते अस्मिन् सति दार्ष्टान्तिकोऽर्थ इति अधिकरणे क्तप्रत्ययोपादानात् ज्ञातं—दृष्टान्तः, साधनसद्भावे साध्यस्यावश्यंभावः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साध्याभावे वा साधनस्यावश्यमभाव इत्युपदर्शनलक्षणे, यदाह—"साध्येनानुगमो हेतोः, साध्याभावे च नास्तिना । ख्याप्यते यत्र दृष्टान्तः, स साधर्म्येतरो द्विधा ॥१॥" इति, तत्र साधर्म्यदृष्टान्तोऽग्निरत्र धूमाद् यथा महानस इति; वैधर्म्य दृष्टान्तस्तु अग्न्यभावे धूमो न भवति, यथा जलाशये इति, अथवा अख्यानकरूपं ज्ञातं तच्च चरितकल्पितभेदात् द्विधा, तत्र चरितं यथा निदानं दुःखाय ब्रह्मदत्तस्येव, कल्पितं यथा प्रमादवतामनित्यं यौवनादीतिदेशनीयं, यथा पाण्डुपत्रेण किशलयानां देशितं, तथा हि—'जह तुब्भे तह अम्हे तुब्भेऽविय होहिहा जहा अम्हो अप्पाहेइ पडंतं पंडुयपत्तं किसलयाणं ॥१॥ छाया—यथा यूयं तथा वयं यूयमपि भविष्यथ यथा वयम् शिक्षयति पतत्पांडुपत्रं किशलयान् । इति, अथवोपमानमात्रं ज्ञातं सुकुमारः करः किशलयमिवेत्यादिवत् अथवा ज्ञातं-उपपत्तिमात्रं ज्ञातहेतुत्वात्, कस्माद्यवाः क्रीयन्ते ? यस्मान्मुधा न लभ्यंते इत्यादिवदिति, एवमनेकधा साध्यप्रत्यायनस्वरूपं ज्ञातमुपाधिभेदात् चतुर्विधंदर्शयति–तत्र आ–अभिविधिना ह्रियते प्रतीतौ नीयते अप्रतीतोऽर्थोऽनेनेत्याहरणं, यत्र समुदित एव दार्ष्टान्तिकोऽर्थः उपनीयते यथापापं दुःखाय ब्रह्मदत्तस्येवेति. तथा तस्य-आहरणार्थस्यदेशस्तद्देशः स चासावुपचारादाहरणं चेति प्राकृतत्वात् आहरणशब्दस्य पूर्वनिपाते आहरणतद्देश इति, भावार्थश्चात्र–यत्रदृष्टान्तार्थदेशेनैव दार्ष्टान्तिकार्थस्योपनयनं क्रियते तत्तद्देशोदाहरणमिति, यथा चन्द्र इव मुखमस्या इति, इह हि चन्द्रे सौम्यत्वलक्षनरणेनैव देशेन मुखस्योपनयनं नानिष्टेन नयननासावर्जितत्वकलंकादिनेति, तथा तस्यैव-आहरणस्य सम्बन्धीसाक्षात् प्रसंग सम्पन्नो वा दोषस्तद्दोषः स चासौ धर्म्मे धर्मिणः उपचारादाहरणं चेति प्राकृतत्वेन पूर्वनिपातादाहरण तद्दोष

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति, अथवा तस्य–आहरणस्यदोषो यस्मिंस्तत्तथा, शेषं तथैव, अयमत्र भावार्थः—यत् साध्य विकलत्वादिदोषदुष्टं तद्दोषहरणं, यथा नित्य शब्दोऽमूर्त्तत्वात् घटवत् इहसाध्यसाधनवैकल्यं नामदृष्टान्तदोषो, यच्चासभ्यादिवचनरूपं तदपि तद्दोषाहरणं, यथा सर्वथाऽहमसत्यं—परिहरामि गुरुमस्तककर्त्तनवदिति, यद् वा साध्यसिद्धिं कुर्वदपि दोषान्तरमुपनयति तदपि तदेव, यथा सत्यंधर्ममिच्छन्ति लौकिक मुनयोऽपि—"वरंकूपशताद् वापी वरं वापीशतात् क्रतुः । वरं क्रतुशतात् पुत्रः सत्यं पुत्रशताद् वरम् ।। १ ।। इतिवचन वक्तृनारदवदिति, अनेन च श्रोतुः पुत्र क्रतुप्रभृतिषु प्रायः संसारकारणेषुधर्मप्रतीतिराहितेति आहरणतद्दोषतेति, यथा वा—बुद्धिमता केनापि कृतमिदं जगत् सन्निवेशविशेषवत्वात् घटवत् सचेश्वर इति, अनेन हि स बुद्धिमान् कुम्भकारतुल्योऽनीश्वरः सिद्धयतीति, ईश्वरश्च स विवक्षित इति, तथा वादिना अभिमतार्थसाधनायकृते वस्तूपन्यासे तद् विघटनाय यः प्रतिवादिनाविरुद्धार्थोपनयः क्रियते पर्यनु योगोपन्यासे वा य उत्तरोपनयः स उपन्यासोपनयः, उत्तररूपमुपपत्तिमात्र मपि ज्ञातभेदो ज्ञातहेतुत्वादिति यथा अकर्त्ता आत्मा अमूर्त्तत्वात् आकाशवदित्युक्ते अन्य आह—आकाशवदेवाभोक्तेत्यपि प्राप्तमनिष्टंचैतदिति, यथा वा मांसभक्षणमदुष्टं प्राण्यङ्गत्वादोदनादिवत् अत्राहान्यः—ओदनादिवदेव स्वपुत्रादिमांसभक्षणमप्यदुष्टमिति, यथा वा त्यक्तसङ्गा वस्त्र पात्रादि संग्रहं न कुर्वन्ति ऋषभादिवत्, अत्राह कुण्डिकाद्यपि ते न गृह्णंति तद्वदेवेति, तथा कस्मात् कर्मकुरुषे यस्माद् धनार्थीति इह प्रथमं ज्ञातं समग्रसाधर्म्यं द्वितीयं देशसाधर्म्यं तृतीयं सदोषं चतुर्थं प्रतिवाद्युत्तररूपमित्ययमेषां स्वरूपविभाग इति, इह देशतः संवाद गाथा—चरियं च कप्पियं वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुविहं तत्तो चउव्विहं क्केक्कं । आहरणे तद्देसे तद्दोसे चेवुवन्नासा ॥१॥ छाया—चरितं च काल्पिकं वा द्विविधं ततश्चतुर्विधमेकैकं आहरणं तद्देशः तद्दोषश्चैव उपन्यासः ॥ १ ॥ इति, "अवाये" अपायः—अनर्थः स यत्र द्रव्यादिष्वभिधीयते यथैतेषु द्रव्यादिविशेषेष्वस्त्यपायो विवक्षितद्रव्यादिविशेषेष्विव, हेयता वाऽस्य यत्राभिधीयते तदाहरणमपाय इति, स च चतुर्धाद्रव्यादिभिः—तत्र द्रव्यात् द्रव्ये वाऽपायो द्रव्यमेव वा तत् कारणत्वादपायोद्रव्यापाय, एतद् हेयतासाधकं एतत्साधकं वाऽऽहरणमपि तथोच्यते, तत् प्रयोगो—द्रव्यापायः परिहार्य्यस्तत्र वाऽपायो वर्तते-देशान्तरगमनेनोपार्जितद्रविणयोस्तल्लोभात् परस्परमारणपरिणतयोः स्व ग्रामाद् वहिः प्राप्तावनुतापात् ह्रदत्यक्तमत्स्यगिलित तद् वित्तयोर्मत्स्यवन्धकपार्श्वात् गृहीतस्य तस्यमत्स्यस्य विदारणेऽवाप्त तद्द्रव्यलुब्धभगिन्या मत्स्यच्छेदकशस्त्राभिघातेन तदुद्दालनप्रवृत्तिमारित मातृकायास्तथाविधव्यतिकरदर्शनोत्पन्नसंवेगात् प्रतिपन्नप्रव्रज्ययोर्भ्रातृवणिजोरिव, तत् परिहारश्च प्रव्रज्यया तत्त्यागादिति, आहरणता चास्यदेशेनोपनयस्याविवक्षणादिति, तथाक्षेत्रात क्षेत्रे वा क्षेत्रमेव वाऽपायः क्षेत्रापायः, शेषं तथैव, एवमुत्तरत्रापि तत् प्रयोगः—अपायवत् क्षेत्रं वर्जयेत् जरासन्धाभिधानप्रतिवासुदेवात् सम्भावितापायां मथुरानगरीं यथा दशार्हचक्रं वर्जयामासेति, अथवा सम्भवत्यपायः स प्रत्यनीक क्षेत्रे ससर्पग्रहवत्, कालापायो यथा—सापायकाल वर्जने यतेत, द्वैपायनो द्वारकामावर्षद्वादशकाद्धक्ष्यतीति श्रुतनेमिनाथ वचनोद्द्वादशवर्षलक्षणसापायकालपरिजिहीर्षयोत्तरापथप्रवृत्तो द्वैपायनोयथेति, अथवा सापायोऽपिभवति कालो रुद्रादिवदिति, तथा भावापायो यथाभावापायं परिहरेत् महानागवत् नागदत्तक्षुल्लकवद् वेति ,तथाहि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किल कश्चित् क्षपकः प्रस्तुतपारणकः सक्षुल्लकः समारब्धभिक्षार्थभ्रमणकः कथञ्चिन्मारितमण्डूकिकः क्षुल्लकप्रेरितोऽप्रतिपन्नतद्वचनः पुनरावश्यक काले स्मारिततदर्थः समुत्पन्नकोपः क्षुल्लकोपघातायाभ्युत्थितो वेगादागच्छन् स्तम्भ आपतितोमृतो ज्योतिष्केषूत्पन्नोऽनन्तरंच्युतो जातिस्मरणदृष्टिविषसर्पतयोत्पन्नः सर्पदष्टमृतपुत्रेण च सर्पेषुकुपितेन राज्ञाऽऽदिष्टजनमार्यमाणेषु नागेषु नागविनाशकनरेण केनाप्योषधिवलादाकृष्यमाणो दृष्टकोपविपाकतया च मद्दृष्टिविषेण मा घातकपुरुषविघातो भवत्विति भावनया पुच्छतो निर्गच्छन् यथानिर्गमश्च खण्ड्यमानः कोपलक्षणभावापायं परिहृतवानिति, तथा स एवानन्तरं नागदत्ताभिधानराजसुततयोत्पन्नो वालत्व एव प्रतिपन्नप्रव्रज्योऽत्यन्तसंविग्नस्तिर्यग्भवाभ्यासाच्चात्यन्त क्षुधालुरादित्योदयादस्तमयं यावद् भोजनशीलोऽसाधारणगुणावर्जित देवताभिवंदितोऽत एव तद्गच्छगतमासादिक्षपकचतुष्टयस्येर्ष्याविषयीभूतो विनयार्थं तेषामुपदर्शितस्वार्थानीतभोजनः तैश्च मत्सरादभोजन मध्यनिष्ठ्यूतनिष्ठीवनोऽत्यन्तोपशान्तचित्तवृत्तितया यः सञ्जातकेवलः पुर्देवतावन्दितस्तेषामपि क्षपकाणांसंवेगहेतुत्वेन केवलज्ञानदर्शनसमृद्धि संपादकः कोपरूपं भावापायं परिजहारेति, अथवा कोपादिलक्षणो भावोऽपायोभवति क्षपकस्यैवेति, गाथे इह – दव्वावाए दुन्नि उ वाणियगा भायरो धणनिमित्तं । वहपरिणयमेक्कमिक्कं दहंमि मच्छेण निव्वेओ ॥ १ ॥ खित्तंमि अवक्कमणं दसारवग्गस्स होइ अवरेणं । दीवयणो य काले भावे मण्डूक्कियाखमओ ॥ २ ॥ छाया – द्रव्यापाये द्वौ वणिग्भ्रातरौ धननिमित्तम् । वधपरिणतौ एकैकस्मिन् ह्रदे मत्स्येन निर्वेदः ॥ १ ॥ क्षेत्रेऽपक्रमणं दशार्हवर्गस्य भवत्यपरस्याम् । द्वीपायनश्च काले भावे मण्डूकिका क्षपकः ॥२॥ इति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'उवाए' त्ति उपायः—उपेयं प्रतिपुरुषव्यापारादिकासाधनसामग्री स यत्र द्रव्यादावुपेये अस्तीत्यभिधीयते यथैतेषु द्रव्यादिविशेषेषु साधनीयेष्वस्त्युपायो विवक्षितद्रव्यादिविशेषवत्, उपादेयता वाऽस्य यत्राभिधीयते तदाहरणमुपाय इति, सोऽपिद्रव्यादिभिश्चतुर्द्धैव, तत्र द्रव्यस्य सुवर्णादेः प्रासुकोदकादेर्वा द्रव्यमेव वा उपायो द्रव्योपायः, एतत्साधनमेतदुपादेयता साधनं वाऽऽहरणमपि तथोच्यते, तत् प्रयोगश्चैवम् अस्तिसुवर्णादिषूपायः उपायेनैव वा सुवर्णादौ प्रवर्त्तितव्यं, तथाविधधातुवादसिद्धादिवदिति, एवं क्षेत्रोपायः—क्षेत्रपरिकर्मणोपायो यथा अस्त्यस्य क्षेत्रस्य क्षेत्रीकरणोपायो लाङ्गलादिस्तथाविधसाधुव्यापारो वा तेनैव वा प्रवर्तितव्यमत्र तथा विधान्यक्षेत्रवादति, एवं कालोपायः—कालज्ञनोपायः, यथा अस्तिकालस्य ज्ञाने उपायः धान्यादेरिव, जानीहि वा कालं घटिकाच्छायादि नोपायेन तथा भूतगणितज्ञवदिति, एवं भावोपायो यथा भावज्ञाने उपायोऽस्ति भावं वोपायत्तो जानीहि, वृद्ध कुमारिका कथाकथनेन विज्ञातचौरादिभावाभयकुमारवदिति, तथाहि—किल राजगृहनगरस्वामिनः श्रेणिकराजस्य पुत्रोऽभयकुमाराभिधानो देवता प्रसादलब्धसर्वर्त्तुकफलादिम्मृद्धारामस्याम्रफलानां अकालाम्रफलदोहदवद्भार्य्यादोहद पूरणार्थं चाण्डालचौरेणापहरणे कृते चौरपरिज्ञानार्थं नाट्यदर्शननिमित्तमिलितबहुजनमध्ये वृद्ध कुमारिका कथामचकथत्, तथाहि काचिद् वृद्धकुमारिका वाञ्छितवरलाभायकामदेवपूजार्थमारामे पुष्पाणि चोरयन्ती आरामपतिना गृहीता सद्भावकथने विवाहितया पत्या अपरिभुक्तया मत्पार्श्वे समागन्तव्यमित्यभ्युपगमं कारयित्वामुक्ता ततः कदचित् विवाहिता सती पतिमापृच्छय रात्रावारामपतिपार्श्वे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गच्छन्ती चौरराक्षसाभ्यां गृहीता सद्भावकथने प्रतिनिवृत्तया भवत्पार्श्वे आगतव्यमिति कृताभ्युपगमामुक्ता आरामेगता आरामिकेण सत्यप्रतिज्ञे त्यखण्डितशीलाविसर्जिता इतराभ्यामपि तथैव विसर्जिता पतिसमीपमागतेति, ततो भो लोकाः पत्यादीनां मध्ये को दुष्करकारक इति चासौ पप्रच्छ तत ईर्ष्यालुप्रभृतयः ! पत्यादीन् दुष्करकारित्वेनाभिदधु , चौरचाण्डालस्तु चौरानिति, ततोऽसावनेनोपायेनभावमुपलक्ष्य चौर इति कृत्वा तं बन्धयामासेति, अत्रापि गाथे 'एमेव चउविगप्पो होइ उवाओऽवि तत्थ दव्वम्मि। धाउव्वाओ पढमो णंगलकुलिएहिं खेत्तं तु ॥१॥ कालोऽवि नालियाईहिं होइ भावम्मि पंडिओ अभओ। चोरस्स कए णट्टि य वड्ढकुमारिं परिकहिंसु ॥२॥' छाया – एवमेव चतुर्विकल्पो भवत्युपायोऽपि तत्रद्रव्येधातुवादः प्रथमः लांगूलकुलिकैः क्षेत्रन्तु ॥१॥ कालोऽपि नालिकादिभिः भवति भावे पंडितोऽभयः चोरस्य कृते नृत्ये वृद्धकुमारी कथां परिचख्यौ ॥२॥ इति, "ठवणा कम्मे" त्ति स्थापनं प्रतिष्ठापनं स्थापना तस्याः कर्म—करणं स्थापना कर्म्मे येन ज्ञातेन परमतं दूषयित्वा स्वमतस्थापना क्रियते तत्स्थापनाकर्मेति भावः तच्च द्वितीयाङ्गे द्वितीयश्रुतस्कन्धे प्रथमाध्ययनं पुण्डरीकाख्यं, तत्र ह्युक्तमस्ति— काचित् पुष्करिणी कर्दमप्रचुरजला तन्मध्यदेशे महत्पुण्डरीकं तदुद्धरणार्थं चतसृभ्यो दिग्भ्यश्चत्वार पुरुषाः सकर्दममार्गैः प्रवेष्टुमारब्धाः, ते चाकृततदुद्धरणा एवं पङ्के निमग्नाः, अन्यस्त तेटस्थोऽसंस्पृष्टकर्दम एवामोघवचनतया तदुद्धृतवानिति ज्ञातं, उपनयश्चायमत्र-कर्दमस्थानीया विषया पुण्डरीकं राजादिर्भव्यपुरुषः चत्वारः पुरुषाः परतीर्थिकाः पंचमः पुरुषः साधुः अमोघवचनं धर्मदेशना पुष्करिणी संसारः तदुद्धारोनिर्वाणमिति, अनेन च ज्ञातेन विषयाभिष्वङ्गवतां तीर्थिकानां भ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यस्य संसारानुत्तारकत्वं साधोश्च तद्विपर्ययं वदता आचार्य्येण परमत दूषणेन स्वमतं स्थापितमतो भवतीदं ज्ञातं स्थापना कर्म्मेति, अथवाऽऽपन्नं दूषणमपोह्य स्वभिमतस्थापना कार्य्येत्येवंविधार्थप्रतिपत्तिर्यतो जायते तत् स्थपनाकर्म्म, किल मालाकारेण केनापि राजमार्गपुरीषोत्सर्गलक्षणापराधापोहाय तत्र स्थाने पुष्पपुञ्जकरणेन किमिदमिति पृच्छतो लोकस्य हिंगु शिवो देवोऽयमिति वदता व्यन्तरायतन स्थापनाकृतेति, एतस्मात् किलाख्यानकादुक्तार्थ: प्रतीयते इतीदं स्थापनाकर्मेति, तथा नित्यानित्यं वस्त्वित्य संगतं जिनमतं विरुद्धधर्माध्यासादिति दूषणमापन्नमेतद् व्यपोह्यायोच्यते विरुद्धधर्माध्यासो न भेदनिबन्धनं विकल्पस्येव, विकल्पोहि क्रमभाविवर्णोल्लेखवान् विरुद्धधर्मोपेतो भवति, न च कथञ्चिदेको न भवति, खण्डशो विभक्तस्य तस्य स्वरूपलाभाभावात् प्रवृत्तिनिवृत्योरकारणताम्यादसमंजसं चैवमिति, एवञ्च विरुद्धधर्माध्यासस्य कथञ्चिद्भेदकत्वे सति न केवलं नित्यानित्यं न भवतीति दूषणमपोढमपि तु सर्वमनेकान्तात्मकमिति विकल्पज्ञानेन स्वमतं प्रसाधितम्, अतो विकल्पज्ञातं स्वमतस्थापनेन स्थापनाकर्म्मेति अत्र निर्युक्तिगाथा:—'ठवणाकम्मं एकं [अभेदमित्यर्थ:] दिट्ठंतो तत्थ पुंडरीयंतु। अहवाऽव सन्नढकण हिंगुसिवकयं उदाहरणं ॥१॥' छाया—स्थापनाकर्म अभिन्नं दृष्टान्तस्तत्र पुण्डरीकं तु—अथवापि संज्ञाच्छादकहिंगु शिवदेवकृतमुदाहरणम् ॥१॥ इति, सव्यभिचारो हेतुय: सहासोपन्यस्तस्तस्य समर्थनार्थं यो दृष्टान्त: पुनरुपन्यस्यते स स्थापनकर्म्मेति, उक्तञ्च—सव्वभिचारं हेउं सहसा वोत्तुं तमेव अन्नेहिं। उववूहइ सप्पसरं सामत्थं चऽप्पणो णाउं ॥१॥" छाया—सव्यभिचारं हेतुं सहसोक्त्वा तमेवान्यै:, उपबृंहयति सप्रसंगं सामर्थ्यं चात्मनो ज्ञात्वा ॥१॥ ति, तद् यथा—अनित्य: शब्द: कृत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कत्वात् , अथ वर्णात्मके शब्दे कृतकत्वं न विद्यते वर्णानां नित्यतयाऽभि हितत्वादिति व्यभिचारः, समर्थनापुनर्वर्णात्माशब्दः कृतको निजकारणभेदेन भिद्यमानत्वाद् घटपटादिवत् , घटादिदृष्टान्तेन हि वर्णानां कृतकत्वं स्थापितमिति भवत्ययं स्थापनाकर्मेति, 'पडुप्पन्नविणासि' ति'—प्रत्युपन्नस्य तत्कालोत्पन्नवस्तुनो विनाशोऽभिधेयतया यत्रास्ति तत् प्रत्युत्पन्नविनाशीति, यथा केनापि वणिजा दुहित्रादिस्त्रीपरिवारशीलविनाशरक्षार्थं तदासक्तिनिमित्तस्वगृहासन्नराजगान्धर्विकगुणनिकायाः स्वगृहदे कुलदेवतानिवेशनात् गुणनिकाकाले तस्या देवताया अग्रतः आतोद्यानादव्याजेन राजापराधपरिहारेण विनाशः कृत , एवं गुरुणा शिष्यान् क्वचिद् वस्तुन्यध्युपपद्यमानानुपलभ्य तस्य तदासक्तिनिमित्तत्वमुपहन्तव्यमित्येवं प्रत्युत्पन्नविनाशनीयता ज्ञापकत्वात् प्रत्युत्पन्नविनाशिज्ञातता गन्धर्विकाख्यानकस्यावगन्तव्येति, उक्तञ्च होतिपडुप्पन्नविणासणंमि गंधव्विया उदाहरणं सो सोऽवि कत्थइ जइ अज्झो वज्जेज्ज तो गुरुणा ॥१॥ छाया—भवति प्रत्युत्पन्नविनाशने गांधर्विकोदाहरणम् शिष्योऽपि कुत्रापि यदि अध्युपपद्येत तदा गुरुणोपायेन वारयितव्यः ॥१॥ वारेयव्वो उवाएणं' इति, अथवा अकर्त्ता आत्मा अमूर्त्तत्वात् आकाशवत् इत्युत्पन्ने आत्मनोऽकर्तृत्वापत्तिलक्षणे दूषणे तद् विनाशायोच्यते—कर्त्तैवात्मा कथंचिन्मूर्त्तत्वात् देवदत्तवदिति । व्याख्यातमाहरणं, आहरणताचैतद्भेदानां देशेनदोषवत्ताया चोपनयाभावादिति, अथाहरणतद्देशो व्याख्यायते—स च चतुर्द्धा, तत्र अनुशासनमनुशास्तिः—सद्गुणोत्कीर्त्तनेनोपबृंहणं सा विधेयेति यत्रोपदिश्यते साऽनुशास्तिः, यथा गुणवन्तोऽनुशासनीया भवन्ति, यथा साधुलोचनपतितजःकणापनयनेन लोकसम्भावितशीलकलंका तत्क्षालनायराधितदेवताकृतप्राति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हार्यो चालनीव्यवस्थापितोदकच्छोटनोद्घाटितचंपागोपुरत्रया सुभद्रा अहो शीलवतीति महाजनेनानुशासितेति, उक्तञ्च—आहरणं तद्देसे चउहा अणुसट्ठि तह उवालंभो । पुच्छानिस्सा वयणं होइ सुभद्दाऽणुसट्ठीए ॥१॥ छाया—आहरणं तद्देशे चतुर्धा अनुशास्तिस्तथोपालंभः। पृच्छा निश्रा-वचनं भवति सुभद्रानुशास्तौ ॥ १ ॥ साहुक्कार पुरोयं जह सा अणुसासिया पुरजणेणं। वेयावच्चाईसुवि एव जयंतेव वूहेज्जा ॥ २ ॥ छाया—साधुकार पूर्वकं यथासाऽनुशिष्टापौरजनेन । वैयावृत्यादिष्वपि एवं यतमानानप्युपबृंहयेत् ॥ २ ॥ इति, इहच तथाविधवैयावृत्यकरणादिना-प्युपनयः सम्भवति तत्त्यागेन च महाजनानुशास्ति मात्रेणोपनयः कृत इत्याहरण तद्देश इति, एवमनभिमतांश त्यागादभिमतांशोपनयनमुत्तरे ष्वपि—भावनीयमिति, तथा उपालम्भनं उपालम्भो—भङ्गयन्तरेणानुशासन-मेवस यत्राभिधीयते स उपालंभो यथाकचिदपराधवृत्तयो विनेयाउपालम्भनीयाः यथा महावीर समवसरणे सविमानागत चन्द्रादित्योद्योतेन काल विभागम-जानती मृगावती नाम्नी साध्वी स्थिता ततस्तद्गमनेऽतिकालोऽयमिति सम्भ्रान्ता सह साध्वीभिरार्यचन्दना समीपं गता तयाचोपालब्धा—अयुक्त-मिदं भवादृशीनामुत्तमकुलजातानामिति, तथा पृच्छा—प्रश्नः किं कथं केन कृतमित्यादि सा यत्र विधेयतयोपदिश्यते सा पृच्छा यथा प्रच्छनीया ज्ञानिनो निर्णयार्थिभिर्यथा भगवान् कोणिकेन पृष्टः, तथाहि किल कोणिकः श्रेणिकराजपुत्रः श्रमणंभगवन्तं महावीरं पमप्रच्छ। तद् यथाभदंत ! चक्रवर्ति-नोऽपरित्यक्त कामाः मृताः कोत्पद्यंते ? भगवताऽभिहितंसप्तमनरकपृथिव्यां, ततोऽसौ बभाण—अहं कोत्पत्स्ये ? स्वामिनोक्तं षष्ठ्यां, स उवाच—अहं किं न सप्तम्याम् ? स्वामिनाजगदे—सप्तम्यां चक्रवर्तिनो यान्ति, ततोऽसाव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिद्धौ, किमहं न चक्रवर्ती ? यतो ममापि हस्त्यादिकं तत् समानमस्ति, स्वामिना प्रत्यूचे—तव रत्ननिधयो न सन्ति ततऽसौ कृत्रिमाणि रत्नानि कृत्वा भरतक्षेत्र साधन प्रवृत्तः कृतमालकयक्षेण गुहाद्वारे व्यापादितः षष्ठीं गत इति, तथा ' निस्सावयणे' त्ति निश्रया वचनं निश्रावचनं, अयमर्थः—कमपि सुशिष्यमालम्ब्य यदन्य प्रबोधार्थ वचनं तन्निश्रावचनं तद्यत्र-विधेयतयोच्यते तदाहरणं निश्रावचनं यथा असहनान् विनेयान् मार्दव सम्पन्नमन्यमालंब्य किञ्चिद् ब्रूयात्, गौतममाश्रित्य भगवानिवेति तथाहि-किल गौतमतापसादि प्रव्रजितानां केवलोत्पत्तावनुत्पन्न केवलत्वेनाधृतिमन्तं चिरसंश्लिष्टोऽसि गौतम ! चिर परिचितोऽसि गौतम ! मा त्वमधृतिं कार्षी रित्यादिनावचनसंदोहेनानुशासयता अन्येऽप्यनुशासिताः तदनुशासनार्थं द्रुमपत्रकाध्ययनं च प्रणिन्ये इति, उक्तञ्च—'पुच्छाए कोणिए खलु-निस्सावयणंमिगोय मस्सामि । छाया—(पृच्छायां कोणिकः खलु निश्रावचने गौतमस्वामी) । इति, ॥ व्याख्यातं तद्देशोदाहरणम् । तद्दोषोदाहरणमथ व्याख्यायते, तच्चचतुर्द्धा तत्र 'अहम्मजुत्ते' ति यदुदाहरणं कस्यचिदर्थस्य साधनायोपादीयते केवलं पापाभिधानस्वरूपं येन चोक्तेन प्रतिपाद्यस्याधर्मबुद्धिरुपजन्यते तदधर्मयुक्तं तद्यथा उपायेन कार्याणि कुर्यात् कोलिकनलदामवत् , तथाहि—पुत्रखादकमत् कोटकमार्गणोपलब्धबिलवासनामशेषमत्कोटकानां तप्तजलस्यविले प्रक्षेपणतो मारणदर्शनेन रञ्जितचित्त चाणक्यावस्थापितेन चौरग्राहनलदामाभिधानकुविंदेन चौर्य्यसहकारि तालक्षणोपायेन विश्वासिता मिलिताश्चौरा विषमिश्रभोजनदानतः सर्वेव्यापदिता इति, आहरण तद्दोषता चास्याधर्मयुक्तत्वात् तथाविधश्रोतुरधर्मबुद्धि जनकत्वाच्चेति, अत एवं नैवं विधमुदाहर्त्तव्यं यतितेति ' पडिलो ' त्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिकूलं यत्र प्रातिकूल्यमुपदिश्यते यथा शठंप्रति शठत्वं कुर्य्यात् यथाचण्ड-प्रद्योते तदपहरणार्थं तदपहृताभयकुमारश्चकारेति, तद्दोषताचास्य भ्रातु परापकारकरणे निपुणबुद्धिजनकत्वात्, अथवा धृष्ट प्रतिवादिना द्वावेव राशी जीवश्चाजीवश्चेत्युक्ते तत्प्रतिघातार्थं कश्चिदाह — तृतोयोऽप्यस्ति नोजीवाख्यो गृहकोलिकादिच्छिन्नपुच्छवदिति, अस्यापि तद्दोषताऽपसिद्धांताभिधाना-दिति, अत्तोवणीए' त्ति आत्मैवोपनीतः —तथा निवेदितो नियोजितो यस्मिं स्तत्तथा येन ज्ञातेन परमतदूषणायोपात्तेनात्ममतमेव दुष्टतयोपनीयते यथा पिंगलेनात्मा तदात्मोपनीतं, तथाहि — कथमिदं तडागमभेदं भविष्यतीति राज्ञा पृष्टः पिंगलाभिधानः स्थपतिरवोचत् भेदस्थाने कपिलादिगुणे पुरुषे निखाते — सतीति अमात्येन तु स एव तत्र तद्गुणत्वान्निखात इति तेनात्मैव नियुक्तः, स्ववचनदोषात्. तदेवंविधमात्मोपनीतमिति, अत्रोदाहरणं यथा सर्वसत्वा न हन्तव्या इत्यस्यपक्षस्य दूषणाय कश्चिदाह — अन्यधर्मस्थिता हन्तव्या विष्णुनेवदानवा इत्येवं वादिना आत्माहन्तव्यतयोपनीतोधर्मान्तर-स्थितपुरुषाणामिति, तद्दोषता तु प्रतीतैवास्येति 'दुरुवणीए' त्तिदुष्टमुपनीतं— निगमितं योजितमस्मिन्निति दुरुपनीतं परिव्राजकवाक्यवद्, यथाहि किल कश्चित् परिव्राजको जालव्यग्रकरोमत्स्यबन्धाय चलितः केनचित्धूर्त्तेन किञ्चिदुक्तःस्तेन च तस्योत्तरमसङ्गतं दत्तम्, अत्र च वृत्तं 'कंथाऽऽकचार्योऽघ नतेननु शफरवधे जालमश्नासि मत्स्यांस्तेमेमद्योपदंशान् पिबसि ननु ? युतोवेश्ययायासि वेश्याम् ! दत्त्वाऽरीणां गलेऽङ्घ्रि क नु तव रिपवो ? येषु सन्धि छिनद्मि, चौरस्त्वंद्यूतहेतोः कितव इति कथं येन दासी सुतोऽस्मि" इत्येवं प्रकृतसाध्यानुपयोगिस्वमत दूषणावहं वा यद् तद् दार्ष्टान्तिकेन सह साधर्म्याभावात् दुरुपनीतमिति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा नित्यः शब्दो घटवद् इह घटे नित्यत्वं नास्त्येवेति कुतस्तत् साधर्म्याच्छब्दस्य नित्यत्वमस्तु ? अपित्वनित्यत्वात्घटस्य तत्साधर्म्याच्छब्दस्यानित्यत्वमेवानभिमत सिध्यतीति साध्यानुपयोगीदमुदाहरणम् , तथा सन्तानोच्छेदोमोक्षो दीपस्येवेत्यभ्युपगमे दीपदृष्टान्तादनादिमतोऽपिसन्तानस्यावस्तुता प्रतीयते, तथाहि—दीपस्यात्मनश्च सन्तानोच्छेद उत्तरक्षणाजनकत्वात् , तत्त्वे चार्थक्रियाकारित्वलक्षणसत्वाभावादन्त्यक्षणस्यावस्तुत्वम् , अवस्त्वजनकत्वात् पूर्वक्षणस्यापि तत एव पूर्वतरस्यापीत्येवं समस्तस्यापि सन्तानस्यावस्तुत्वम् । अथक्षणान्तरानारंभेऽपि स्वगोचर ज्ञानजनन लक्षणार्थक्रियाकारित्वादन्त्यक्षणो वस्तु भविष्यति, नैवम्, एवं हि भूतभाविपर्याय परम्परापि योगिज्ञानं स्वविषयमुत्पादयतीति वस्तुत्त्वं स्वीकुर्य्यात् , तन्न क्षणान्तरानारंभे वस्तुत्त्वमित्यतो भवति दीपज्ञातं स्वमतदूषणावहमिति, अथवा अनित्यः शब्दः कृतकत्वाद् घटवदिति वक्तव्ये सम्भ्रमादनित्योघटः कृतकत्वाछब्दवदिति वदतो दुरुपनीतमिति विपर्ययोपनयनादिति, अत्र गाथा—'पढमं अहम्मजुत्तं पडिलोमं अत्तणो उवन्नासो दुरुवणियं च चउत्थं अहम्मजुत्तंमि नलदामो । १ ।। छाया—प्रथममधर्मयुक्तं प्रतिलोमआत्मन उपन्यासः, दुरुपनीतं च चतुर्थमधर्मयुक्ते नलदामः ।। १ ।। पडिलोमे जह अभओ पज्जोयं हरइ अवहिओ संतो' इति "अत्तउवन्नासंमि य तलायभेयंमि पिंगलो थवई । अणिमिसगेण्हणभिक्खुग दुरुवणीए उदाहरणं ।। १ ।" छाया—प्रतिलोम्नि यथाऽभयः प्रद्योत हरति अपहृतः सन् । आत्मोपन्यासे च तडाक भेदे पिंगलः स्थपतिः । अनिमेषग्राहकभिक्षुदुरुपनीते उदाहरणम् ।। १ ।। इति, उक्त आहरणतद्दोषोऽधुनोपन्यासोपनय उच्यते स च चतुर्द्धा, तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तव्वत्थुए, त्ति तदेव--परोपन्यस्तसाधनं वस्त्विति - उत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स तद्वस्तुकोऽथवा तदेव—परोपन्यस्तं वस्तु तद्वस्तु तदेव तद्वस्तुकं तद्युक्त उपन्यासोपनयोऽपि तद्वस्तुक इत्युच्यते एवमुत्तरत्रापि, यथा कश्चिदाह—समुद्रतटे महान् वृक्षोऽस्ति तच्छाखा जलस्थलयोरुपरिस्थिताः, तत्पत्राणि च यानि जले निपतंति तानि जलचरा जीवाभवंति यानि च स्थले निपतंति तानि स्थलचरा इति. अन्यस्तदुपन्यस्तमवे तरुपत्रपतनवस्तु गृहीत्वा तदुक्तं विघटयति, यदुत यानि पुनर्मध्ये तेषां का वार्त्त्येतदुपपत्तिमात्रमुत्तरभूतं तद्वस्तुक उपन्यासोपनयो, ज्ञातत्वं चास्य ज्ञातनिमित्तत्वाद्, अथवा यथारूढमेव ज्ञातमेतत्, तथाहि एवं प्रयोगोऽस्य—जलस्थलपतितपत्राणि न जलचरादिसत्वाः सम्भवन्ति, जलस्थलमध्यपतितपत्रवत् , तन्मध्यपतितपत्राणां हि जलस्थलपतिपत्रतजलचरत्वादिप्राप्तिवदुभयरूपप्रसंगो, नचोभयरुपाः सत्वा अभ्युपगता इति , अथवा नित्यो जीव अमूर्त्तत्वादाकाशवदित्युक्ते आह– अनित्य एवास्तु अमूर्त्तत्वात कर्मवदिति । तथा ' तयन्नवत्थुए ' ति तस्मात् परोपन्यस्ताद् वस्तुनोऽन्यदुत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स तदन्यवस्तुको यथा जले पतितानि जलचरा इत्युक्ते एतत् विघटनाय पतनादन्यदुत्तरमाह्–यानि पुनः पातयित्वाखादति नयति वा तानि किं भवन्ति ? न किञ्चिदित्यर्थोऽयमपि ज्ञापकतया ज्ञातमुक्तः, अथवा यथारूढमेव ज्ञातमेषः, तथाहि—न जलस्थलपतितानि पत्राणि जलचरादिसत्वाः सम्भवंति, मनुष्याद्याश्रितानीव, अयमभिप्रायो यथा जलाद्याश्रितत्वात् जलचरादितया तानि सम्पद्यंते तथा मनुष्याद्याश्रिततया मनुष्यादिभवयूकादितयाऽपि सम्पद्यंताम् , आश्रितत्वस्याविशेषात् , न च तानि तथाऽभ्युपगम्यन्ते इति जलादि गतानामपि ज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लचरत्वाद्यसम्भव इति, तथा 'पडिनिभे त्ति यत्रोपन्यासोपनये वादिनो-पन्यस्तवस्तुनः सदृशं वस्तूत्तरदानायोपनीयते स प्रतिनिभो यथा कोऽपि प्रतिजानीते यदुत—यो मामपूर्वं श्रावयति तस्मै लक्ष्यमूल्यमिदं कटोरकं ददामीति, स च श्रावितोऽपि तन्नापूर्वमिति प्रतिपद्यते, तत् एकेन सिद्धपुत्रेणोक्तं—'तुज्झ पिया मज्झ पिउणो धारेइ अणूणयं सयसहस्सं । जइ सुयपुव्वं दिज्जउ अह न सुयं खोरयं देहि ॥१॥, छाया—तव पिता मम पितुर्धारयत्यनूनं शतसहस्रम् । यदि श्रुतपूर्वं ददातु अथ न श्रुतं खोरकं देहि ॥१॥ इति प्रतिनिभता चास्य सर्वस्मिन्नप्युक्ते श्रुतपूर्वमेवेदं ममेत्येवमसत्यं वचो ब्रुवाणस्य परस्य निग्रहाय तव पिता मम पितुर्धारयति लक्षमित्येवंविधस्य द्विपाशरज्जुकल्पस्यासत्यस्यैव वचस उपन्यस्तत्वादिति, अस्य चोपपत्तिमात्ररूपस्याप्यर्थज्ञापकतया ज्ञातत्वमुक्तमिति, अथवा यथारूढमेव ज्ञातमेषः, तथाह अत्रायं प्रयोगः नास्त्यश्रुतपूर्वं किञ्चित् श्लोकादि ममेत्येवमभिमानधनं ब्रूमो वयम्—अस्ति तवाश्रुतपूर्वं वचनं तव पित मम पितुर्धारत्यनूनं शतसहस्रमिति यथेति, । तथा 'हेउ, त्ति यत्रोपन्यासोपनये पर्यनुयोगस्य हेतुरुत्तरतयाऽभिधीयते स हेतुरिति, यथा केनापि कश्चित् पर्यनुयुक्तः—अहो किं यवाः क्रीयन्ते त्वया ?, स त्वाह—येन मुधैव न लभ्यन्ते इति तथा कस्मात् ब्रह्मचर्यादिकष्टमनुष्ठीयते ? यस्मादकृततपसां नरकादौ गुरुतरावेदना भवतीति, इदमपि उपपत्तिमात्रमेव ज्ञातत्वेनोक्तमर्थज्ञापकत्वादिति, अथवाऽयमपि यथारूढं ज्ञातमेव, तथाह्यस्यैवं प्रयोगः कस्मात् त्वया प्रव्रज्या क्रियत इति पृष्टः सन् केनापि साधुराह —यतस्तां विना मोक्षो न भवति एतत्समर्थनायैव साधुस्तमाह—भो यवग्राहिन् । किमिति त्वया यवाः क्रीयन्ते ? स त्वाह—येन मुधा न लभ्यन्ते, साधोश्चायम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिप्रायो यथा—मुधालाभाभावात् तान् क्रीणासि त्वमेवमहं तां विना तदभा· वात्तां करोमीति, इह च मुधा यवालाभस्य क्रयणे हेतोः सतो दृष्टान्ततयोप न्यस्तत्वाद्धेतूपन्यासोपनयज्ञाततेति, इह च किञ्चद्विशेषेणैवंविधा ज्ञातभेदाः सम्भवन्त्यन्येऽपि किन्तु ते न विवक्षिताः अन्तर्भावो वा कथञ्चित् गुरुभिर्विवक्षितो न च तं वयं सम्यग् जानीम इति। अथ ज्ञातानन्तरं ज्ञातवद्धेतोः साध्यसिद्धयङ्गत्वात् तद्भेदान् हेऊ इत्यादिना सूत्रत्रयेणाह—व्यक्तं चैतत्, नवरं हिनोति गमयति ज्ञेयमिति हेतुः—अन्यथाऽनुपपत्तिलक्षणः, उक्तञ्च—"अन्यथाऽनुपपन्नत्वं, हेतोर्लक्षणमीरितम्। तद्-प्रसिद्धिसन्देहविपर्यासैस्तदाभता ॥१॥" इति, प्रागुक्तश्च हेतु पर्यनुयुक्तस्योत्तर-रूपमुपपत्तिमात्रमयं तु साध्यं प्रत्यन्वयव्यतिरेकवान् तथाविधदृष्टान्तस्मृत-तद्भाव इति, स चैकलक्षणोऽपि किञ्चद्विशेषाच्चतुर्धा, तत्र 'जावए' त्ति या· पयति-वादिनः कालयापनां करोति, यथा काचिदसती एकैकरूपकेण एकैकमुष्ट्र लिएंडं दातव्यमिति दत्ताशिक्षस्य पत्युस्तद्विक्रयार्थमुज्जयनीप्रेषणे नायेन विटा सेवायां कालयापनां कृतवतीति यापकः, उक्तञ्च—'उब्भामिया य महिला जाव· गहेउम्मि उट्टलिंडाई ॥, इति, इह वृद्धैर्व्याख्यातम्—प्रतिवादिनं ज्ञात्वा तथा तथा विशेषणबहुलो हेतुः कर्त्तव्यो यथा कालयापना भवति, ततोऽसौ नावगच्छ-ति प्रकृतमिति, स चेदृशः संभाव्यते-सचेतना वायवः अपरप्रेरणे सति ति-र्यग्नियतत्वाभ्यां गतिमत्त्वात् गोशरीरवदिति, अयं हेतुर्विशेषणबहुलतय परस्य दुरधिगमत्वाद् वादिनः कालयापनां करोति, स्वरूपमस्यानवबुद्धया-मानो हि परो न झगित्येवानैकान्तिकत्वादिदूषणोद्भावनाय प्रवर्तितुं श-क्नोति, अतो भवत्यस्माद् वादिनः कालयापनेति, अथवायोऽप्रतीतव्याप्तिक-तया व्याप्तिसाधकप्रमाणान्तरसव्यपेक्षत्वान्न, झगित्येवसाध्यप्रतीतिं करोति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि तु कालक्षेपेणेत्यसौ साध्यप्रतीतिं प्रति कालयापनाकारित्वाद् यापकः, यथा क्षणिकं वस्त्विति पक्षं बौद्धस्य सत्त्वादिति हेतुः, नहि सत्त्वश्रवणादेव क्षणिकत्वं प्रत्येति पर इत्यतो बौद्धः सत्त्वं क्षणिकत्वेन व्याप्तमिति प्रसाधयितुमुपक्रमते, तथाहि—सत्त्वं नामार्थक्रियकारित्वमेव, अन्यथा वन्ध्यासुतस्यापि सत्त्वप्रसङ्गः, अर्थक्रिया तु नित्यस्यैकरूपत्वान्न क्रमेण नापि यौगपद्येन क्षणान्तरे अकर्तृत्वप्रसंगादित्यतोऽर्थक्रियालक्षणं सत्त्वमक्षणिकान्निवर्त्तमानं क्षणिक एवावतिष्ठत इत्येवं क्षेपेण साध्यसाधने कालयापनाकारित्वाद् यापकः सत्त्वलक्षणो हेतुरिति। तथा स्थापयति पक्षमक्षेपेण प्रसिद्धव्याप्तिकत्वात् समर्थयति, यथा परिव्राजकधूर्त्ते लोकमध्यभागे दत्तं बहुफलं भवति तच्चाहमेव जानामीति मायया प्रतिग्राममन्यान्यं लोकमध्यं प्ररूपयति सति तन्निग्रहाय कश्चित् श्रावको लोकमध्यस्यैकत्वात् कथं बहुषु ग्रामादिषु तत्सम्भव इत्येवंविधोपपत्त्या त्वद्दर्शितो भो ! लोकमध्यभागो न भवतीति पक्षं स्थापितवान् इति स्थापको हेतुः, उक्तञ्च—लोगस्स मज्झ जाणण थावगहेऊ उदाहरणं' इति, स चायं—अग्निरत्र धूमात् तथा नित्यानित्यं वस्तु द्रव्य पर्यायतस्तथैव प्रतीयमानत्वादिति, अनयोश्च प्रतीतव्याप्तिकतया अकालक्षेपेण साध्यस्थापनात् स्थापकत्वमिति। तथा व्यंसयति—परं व्यामोहयति शकटतित्तिरीग्राहकधूर्त्तवद् यः स व्यंसक इति, तथाहि—कश्चिदन्तराललब्धमृततित्तरीयुक्तेन शकटेन नगरं प्रविष्टः उक्तो धूर्त्तेन यथा—शकटतित्तिरी कथं लभ्यते ?, स च किलायं शकटस्य सत्कां तित्तिरीं याचत इत्यभिप्रायादवोचत् तर्पणालोडिकयेति, सक्त्वालोडनेन जलाद्यालोडितसक्तुभिरित्यर्थः, ततो धूर्त्तः साक्षिण आहूत्य सतित्तिरीकं शकटं जग्राह, उक्तवांश्च मदीयमेतद्' अनेनैव शकटतित्तरीति दत्तत्वादिति, मया त शकटसहिता तित्तिरी शकट

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिरत्तीति गृहीतत्वादिति, ततो विषण्णः शाकटिक इति, अत्रोक्तम्—' सा सगडतित्तिरी वंसगंमि हेउंमि होइ णायव्वा ॥ '' इति, स चैवं—अस्ति जीवोऽस्ति घट इत्यभ्युपगमे जीवघटयोरस्तित्वमाविशेषेण वर्त्तते ततस्तयोरेकत्वं प्राप्तमभिन्नशब्दविषयत्वादिति व्यंसको हेतुः घटशब्द विषयघटस्वरूप वत्, अथास्तित्वं जीवादौ न वर्तते ततो जीवाद्यभावः स्यादस्तित्वाभावादिति व्यंसकः प्रतिवादिनो व्यामोहकत्वादिति, तथा 'लूसए' त्ति लूषयति—मूष्णाति व्यंसकापादितमनिष्टमिति लूषको हेतुः, स एव शाकटिको, यथा—धूर्त्तान्तरशिक्षितेन हि शाकटिकेन तेन याचितोऽसौ धूर्त्त तर्हि देहिमेतर्प्पणालोडिकामिति, तत धूर्त्तेनोक्ता स्वभार्य्या—देह्यस्मै सत्कूनालोड्य ति, ताञ्च तथा कुर्वन्ती तद्भार्यां गृहीत्वाऽसौ प्रस्थितोऽवदिच्च धूर्त्तमभि—मदीयेयं तर्प्पणमिति सत्कूनालोडंयतीति तर्पणालोडिकेति भवतैव दत्तत्वादिति, स चायं यदि जीवघटयोरस्तित्ववृत्या एकत्वं सम्भावयसि तदा सर्वभावानामेकत्वं स्यात् सर्वेष्वप्यस्तित्ववृत्तेरविशेषात्, न चैवमिति, इहास्तित्व वृत्तेरविशेषादित्ययं लूषको जीवघटयोरेकत्वापादनलक्षणस्याभावापत्तिलक्षणस्य वाऽनिष्टस्य परापादितस्यानेन लूषितत्वादिति, अथवेति हेतोः प्रकारान्तरताद्योतको विकल्पार्थो हिनोति—गमयति प्रमेयमर्थं स वा हीयते—अधिगम्यते अनेनेति हेतुः—प्रमेयस्य प्रमितौ कारणं प्रमाणमित्यर्थः, स चतुर्विधः स्वरूपादिभेदात्, तत्र 'पच्चक्खे' त्ति अश्नाति अश्नुते—व्याप्नोत्यर्थानित्यक्षः—आत्मा तं प्रति यद्वर्तते ज्ञानं तत्प्रत्यक्षं निश्चयतोऽवधिमनःपर्यायकेवलानि, अक्षाणि वेन्द्रियाणि प्रति यत्तत्प्रत्यक्षं व्यवहारतस्तचक्षुरादिप्रभमिति, लक्षणमिदमस्य—'अपरोक्षतयाऽर्थस्य, ग्राहकं ज्ञानमीदृशम् । प्रत्यक्षमितरत् ज्ञेयं, परोक्षं ग्रहणेक्षया ॥ १ ॥'' ग्रहणापेक्षयेति भावः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्विति – लिङ्गदर्शनसंबन्धानुस्मरणयोः पश्चान्मानं – ज्ञानमनुमानम्, एतल्लक्षणमिदम् – 'साध्याविनाभुवो लिंगात्, साध्यनिश्चायकं स्मृतम्। अनुमानं तदभ्रान्तं प्रमाणत्वात् समक्षवद् ॥ १ ॥" इति, एतच्च साध्याविनाभूतहेतुजन्यत्वेनाप्युपचाराद्धेतुरिति, तथा उपमानमुपमा सैवोपम्यं अनेन गवयेन सदृशोऽसौ गौरिति सादृश्यप्रतिपत्तिरूपं, उक्तञ्च – 'गां दृष्ट्वाऽयमरण्येऽन्यं गवयं वीक्षते यदा। भूयोऽवयवसामान्यभाजं वर्त्तुलकण्ठकम् ॥१॥ तस्यामेव त्ववस्थायां यद्विज्ञानं प्रवर्तते। पशुनैतेन तुल्योऽसौ गोपिण्ड इति सोपमा ॥ २ ॥" इति, अथवा श्रुतातिदेशवाक्यस्य समानार्थोपलम्भनेसंज्ञासंज्ञिसंबन्धज्ञानमुपमानमुच्यत इति, आगम्यन्ते – परिच्छिद्यन्ते अर्था अनेनेत्यागमः आप्तवचनसंपाद्यो विप्रकृष्टार्थप्रत्ययः, उक्तञ्च – दृष्टेष्टाव्याहताद् वाक्यात् परमार्थाभिधायिनः। तत्त्वग्राहितयोत्पन्नं मानं शब्दं प्रकीर्त्तितम् ॥१॥ आप्तोपज्ञमनुल्लंघ्यमदृष्टेष्टविरोधकम्। तत्वोपदेशकृत् सार्वं शास्त्रं कापथघट्टनम् ॥१॥ इति, इहान्यथानुपपन्नत्वलक्षणहेतुजन्यत्वादनुमानमेव कार्ये कारणोपचाराद्धेतुः, स च चतुर्विधः चतुर्भंगीरूपत्वात्, तत्र अस्ति–विद्यते तदिति लिङ्गभूतं धूमादिवस्तु इति कृत्वा अस्ति सः अग्न्यादिकः साध्योऽर्थ इत्येव हेतुरिति अनुमानम्। तथा अस्ति तदग्न्यादिकं वस्तवतो नास्त्यसौ तद्विरुद्धः शीतादिरर्थ इत्येवमपि हेतुरनुमानमिति, तथा नास्ति तदग्न्यादिकमतः शीतकालेऽस्ति स शीतादिरर्थ इत्येवमपि हेतुरनुमानमिति, तथा नास्ति तद्वृक्षत्वादिकमिति नास्ति शिंशपात्वादिकोऽर्थ इत्यपि हेतुरनुमानमिति, इह च शब्दे कृतकत्वस्यास्तित्वादस्त्यनित्यत्वं, घटवत्तथा धूमस्यास्तित्वादिहास्त्यग्निर्महानस इवेत्यादिकं स्वभावानुमानं कार्यानुमानंच प्रथमभंगकेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूचितं १, तथा अग्नेरस्तित्वाद्धूमास्तित्वाद् वा नास्ति शीतस्पर्श इत्यादि विरुद्धोपलम्भानुमानं विरुद्धकार्योपलम्भानुमानञ्च, तथाऽग्नेर्धूमस्य वाऽस्तित्वान्नास्ति शीतस्पर्शजनितदन्तवीणारोमहर्षादिः पुरुषविकारो महानसवदित्यादि कारणविरुद्धोपलम्भानुमानम्। कारणविरुद्धकार्योपलम्भानुमानं च द्वितीयभंगकेनाभिहितं २ तथा छत्रादेरग्नेर्वा नास्तित्वादस्ति कचित् कालादिविशेषे आतपः शीतस्पर्शो वा पूर्वोपलब्धप्रदेश इवेत्यादिकं विरुद्धकारणानुपलम्भानुमानं विरुद्धानुपलम्भानुमानञ्च तृतीयभंगकेनोपात्तं ३ तथा दर्शन सामग्र्यां सत्यां घटोपलम्भस्य नास्तित्वान्नास्तीह घटो विवक्षितप्रदेशवदित्यादि स्वभावानुपलब्ध्यनुमानं तथा धूमस्य नास्तित्वान्नास्त्यविकलो धूमकारणकलापः प्रदेशान्तरवदित्यादि कार्य्यानुपलब्ध्यनुमानम्, तथा वृक्षनास्तित्वात् शिंशपा नास्तीत्यादि व्यापकानुपलम्भानुमानं तथाऽग्नेर्नास्तित्वाद्धूमो नास्तीत्यादिकारणानुपलम्भानुमानं च चतुर्थभंगकेनावरुद्धमिति न च वाच्यं न जैनप्रक्रियेयं, सर्वत्र जैनाभिमतान्यथानुपपन्नत्वरूपस्य हेतुलक्षणस्य विद्यमानत्वादिति ॥४॥ स्थानांगसूत्र स्थान ४ उद्देश ३

**मूल :—कतिविधे णं भंते ! इंदियअवाए पं० ?, गो० ! पंचविधे इंदियअवाए पं,० तं०—सोतिंदियअवाए जाव फासिंदियअवाए, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि। कतिविहा णं भंते ! ईहा पं० ?, गो० ! पंचविहा ईहा पं० तं०—सोतिंदियईहा जाव फासिंदियईहा, एवं जाव वेमाणियाणं, णवरं जस्स जइ इंदिया ८। कतिविविधे णं भंते !**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उग्गहे पं० ?, गो० !, दुविहे उग्गहे पं०, तं०—अत्थोग्गहे य वंजणोग्गहे य। वंजणोग्गहे णं भंते ! कतिविधे ० ? गो० ! चउव्विहे पं०, तं०—सोतिंदियवंजणोग्गहे घाणिंदियवंजणोग्गहे जिब्भिंदियवंजणोग्गहे फासिंदियवं० । अत्थोग्गहे ण भंते। कतिविधे पं० ?, गो० ! छव्विहे पं,० तं०—सोतिंदियअत्थोवग्गहे चक्खिदियअ० जिब्भिदियअ० फासिदियअ० नोइंदिय अत्थो० । नेरइयाणं भंते ! कतिविहे उग्गहे पएणत्ते ? गो० ! दुविहे पं,० तं०—अत्थोग्गहे य वंजणोग्गहे य, एवं असुरकुमाराणं जाव थणियकुमाराणं । पुढविकाइयाण भंते ! कतिविधे उग्गहे, पं० ?, गो० दुविधे उग्गहे पं०—अत्थोग्गहे य वंजणावग्गहे य। पुढविकाइयाणं भंते ! वंजणोग्गहे कतिविधे पं० ?, गो० ! एगे फासिंदियवंजणोग्गहे पं० । पुढविकाइयाणं भंते ! कतिविधे अत्थोग्गहे पएणत्ते ?, गो० एगे फासिंदिय अत्थोग्गहे पं० एवं जाव वणस्सइकाइयाणं, एवं बेइंदियाणवि, नवरं बेइंदियाणं वंजणोग्गहे दुविहे पं०, अत्थोग्गहे दुविहे पं० एवं तेइंदिय चउरिंदियाणवि, णवरं इंदियपरिवुड्ढी कायव्वा, चउरिंदियाणं वंजणोग्गहे तिविधे पं०, अत्थोग्गहे चउव्विधे पं०, सेसाणं जहा नेरइयाणं जाव वेमाणियाणं ६, १० ( सू० २०० )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**टीकाः**— "कतिविहेणं भंते ! इंदियअवाए पं०" इत्यादि तत्रावग्रहज्ञानेनावगृहीतस्य ईहाज्ञानेन ईहितस्यार्थस्य निर्णयरूपो योऽध्यवसायः सोऽपायः, शांख एवायं शाङ्ग एव वायं इत्यादिरूपोऽवधारणात्मको निर्णयोऽवाय इतिभावः । ईहा इति, 'ईह चेष्टायां' ईहनमोहा, सद्भूतार्थपर्यालोचनरूपा चेष्टा इत्यर्थः, किमुक्तं भवति ?—अवग्रहादुत्तरकालमवायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखः प्रायोऽत्र मधुरत्वादयः शंखादिशब्दधर्मा दृश्यन्ते न कर्कशनिष्ठुरतादयः शाङ्गादिशब्दधर्मा इत्येवंरूपो मतिविशेष ईहा, आह च भाष्यकृत -"भूयाभूयविसेसादाणच्चायाभिमुहमीहा" । [ भूताभूतविशेषादानत्यागाभिमुख्यमीहा] ' दुविहे ओग्गहे पं०, तं०—वंजणोग्गहे य अत्थोग्गहे य' इति, अवग्रहो द्विविधः—अर्थावग्रहो व्यञ्जनावग्रहश्च, तत्र अवग्रहणमवग्रहः अर्थस्यावग्रहोऽर्थावग्रहः, अनिर्देश्यसामान्यरूपाद्यर्थग्रहणमिति भावः, आह च नन्द्यध्ययनचूर्णिकृत् —" सामन्नस्स रूवाइ विसेसणरहियस्स अनिद्देस्सस्समवग्गहणं अवग्गह" इति, तथा व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं,' तच्च उपकरणेन्द्रियस्य शब्दादिपरिणत द्रव्याणां च यः परस्परं सम्बन्धः, सम्बन्धेहि सति सोऽर्थः श्रोत्रादीन्द्रियेण व्यञ्जितुं शक्यते नान्यथा ततः सम्बन्धो व्यञ्जनं, आह च भाष्यकृत्—" वंजिज्जइ जेणत्थो घडोव दीवेण वंजणं तं च । उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो ॥ १ ॥ छाया—व्यज्यते येनार्थो घट इव दीपेन व्यंजनं, तच्चोपकरणेन्द्रिय शब्दादिपरिणतद्रव्यसंबन्धः ॥ १ ॥ व्यञ्जनेन—सम्बन्धेनावग्रहणं—सम्बध्यमानस्य शब्दादिरूपस्यार्थस्य।व्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, अथवा व्यज्यन्ते इति व्यञ्जनानि ' कृद्बहुलं' मिति वचनात् कर्मण्यनट, व्यञ्जनानां—शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेन्द्रियसम्प्राप्तानामर्थावग्रह अव्यक्तरूपः परिच्छेदो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यञ्जनावग्रहः, आह—प्रथम अर्थावग्रहो भवति ततोऽर्थावग्रहस्तत कस्मादिह प्रथममर्थावग्रह उपन्यस्त ? उच्यते, स्पष्टतयोपलभ्यमानत्वात्, तथाहि—अर्थावग्रहः स्पष्टरूपतया सर्वैरपि जंतुभिः संवेद्यते शीघ्रतरगमनादौ सकृत्सत्वरमुपलभ्यते, किञ्चिद् दृष्टं न परिभावितं सम्यगिति व्यवहारदर्शनात् अपिच अर्थावग्रहः सर्वेन्द्रियमनोभावी व्यञ्जनावग्रहस्तु नेति प्रथममर्थावग्रह उक्तः। सम्प्रति व्यञ्जनावग्रहादूर्ध्व अर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रहस्वरूपं प्रतिपपादयिषु प्रश्नं कारयति शिष्य—' भंजणोग्गहे णं भंते ! कइविहे पं०' इत्यादि, इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिपरिणतद्रव्याणां च परस्परं सम्बन्ध इत्युक्तं प्राक्, ततश्चतुर्णामेव श्रोत्रादीनामिन्द्रियाणां व्यञ्जनावग्रहो न नयनमनसोः, तयोरप्राप्यकारित्वात्, सा चाप्राप्यकारिता नन्द्यध्ययनटीकायां प्रदर्शितेति नेह प्रदर्श्यते, अर्थावग्रहः षड्विधः, तद्यथा—'सोइंदियअत्थुग्गहे' इत्यादि, श्रोत्रेन्द्रियेणार्थावग्रहो व्यञ्जनावग्रहोत्तरकालमेकसामयिकमनिर्देश्यं सामान्यमात्रार्थग्रहणं श्रोत्रेन्द्रियार्थावग्रहः, एवं घ्राणजिह्वास्पर्शनेन्द्रियार्थावग्रहेष्वपि वाच्यं, चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न भवति, ततस्तयोः प्रथममेव स्वरूपद्रव्यगुणक्रियाकल्पनातीतमनिर्देश्यसामान्यमात्रस्वरूपार्थावग्रहणमर्थावग्रहोऽवसेयः, ' नोइंदियअत्थावग्गहो' इति नोइन्द्रिय—मनः तच्च द्विधा—द्रव्यरूपं भावरूपञ्च, तत्र मनः पर्याप्तिनामकर्मोदयतो यत् मनःप्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमनं—तद् द्रव्यरूपं मनः, तथा चाह नन्द्यध्ययनचूर्णिकृत् '—मणपज्जत्तिनामकम्मोदयओ जोग्गे मणोदव्वे घित्तुं मणत्तेण परिणामिया दव्वा दव्वमणो भन्नइ' इति, तथा द्रव्यमनोऽवष्टम्भेन जीवस्य यो मनःपरिणामः स भावमनः तथा चाह नन्द्यध्ययनचूर्णिकृदेव—"जीवो पुण मणपरिणामकि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रियावंतो भावमणो, किं भणियं होइ ?—मणद्व्वालंबणो जीवस्समणवावारो भावमणो भण्णइ" इति, तत्रेह भावमनसा प्रयोजनं, तद्ग्रहणे ह्यवश्यं द्रव्यमनसोऽपि ग्रहणं भवति, द्रव्यमनोऽन्तरेण भावमनसोऽसंभवात्, भावमनो विनापि च द्रव्यमनो भवति यथा भवस्थकेवलिनां, तत उक्तं भावमनसा प्रयोजनं, तत्र नोइन्द्रियेण—भावमनसाऽर्थावग्रहो—द्रव्येन्द्रियव्यापारनिरपेक्षघटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामयिको रूपाद्यर्थाकारादिविशेषचिन्ताविकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मको बोधो नोइन्द्रियार्थावग्रहः, अवग्रहग्रहणं चोपलक्षणं तेन नोइन्द्रियार्थावग्रहस्य साक्षादितरयोस्तु ( ईहापाययोः ) उपलक्षणत उपादानं, विचित्रत्वात् सूत्रगतेरित्यदोषः ।

प्रज्ञापना सूत्र पद १५ उद्देश २ सू० २००

**मूल :—कइविहाणं भंते ! आया पण्णत्ता ?, गोयमा ! अट्ठविहा आया पण्णत्ता, तंजहा—दवियाया कसायाया योगाया उवओगाया णाणाया दंसणाया चरित्ताया वीरियाया ।। जस्स णं भंते ! दवियाया तस्स कसायाया जस्स कसायाया तस्स दवियाया ?, गोयमा ! जस्स दवियाया तस्स कसायाया सिय अत्थि सिय नत्थि जस्स पुण कसायाया तस्स दवियाया नियमं अत्थि। जस्स णं भंते ! दविया तस्स जोगायाया ?, एवं जहा दवियाया कसायाया भणिया तहा दवियाया जोगाया भाणियव्वा । जस्स**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णं भंते ! दवियाया तस्स उवओगाया एवं सव्वत्थ पुच्छा भाणियव्वा, गोयमा ! जस्स दवियाया तस्स उवओगाया नियमं अत्थि, जस्सवि उवओगाया तस्सवि दवियाया नियमं अत्थि, जस्स दवियाया तस्स णाणाया भयणाए जस्स पुण णाणाया तस्स दवियाया नियमं अत्थि, जस्स दवियाया तस्स दंसणाया नियमं अत्थि जस्सवि दंसणाया तस्स दवियाया नियमं अत्थि, जस्स दवियाया तस्स चरित्ताया भयणाए जंस्स पुण चरित्ताया तस्स दवियाया नियमं अत्थि, एवं वीरियायाएवि समं । जस्स णं भंते ! कसायाया तस्स जोगाया पुच्छा, गोयमा ! जस्स कसायाया तस्स जोगाया नियमं अत्थि, जस्स पुण जोगाया तस्स कसायाया सिय अत्थि सिय नत्थि, एवं उवओगायाएवि समं कसायाया नेयव्वा, कसायाया य णाणाया य परोप्परं दोवि भइयव्वाओ, जहा कसाया य उवओगाया य तहा कसायाया य दंसणाया य कसाया य चरित्ता य दोवि परोप्परं भइयव्वाओ, जहा कसायाया य जोगाया य तहा कसायाया य वीरियाया य भाणियव्वाओ, एवं जहा कसायायाए वत्तव्वया भणिया तहा जोगायाएवि उवरिमाहिं समं भाणियव्वाओ । जहा दवियायाए वत्तव्वया भणिया तहा उवयोगायाएवि उवरिल्लाहिं समं भाणियव्वा । जस्य नाणाया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्स दंसणाया नियमं अत्थि जस्स पुण दंसणाया तस्स णाणाया भयणाए, जस्स नाणाया तस्स चरित्ताया सिय अत्थि सिय नत्थि जस्स पुण चरित्ताया तस्स नाणया नियमं अत्थि, णाणाया वीरियाया दोवि परोप्परं भयणाए। जस्स दंसणाया तस्स उवरिमाओ दोवि भयणाए, जस्स पुण ताओ तस्स दंसणाया नियमं अत्थि। जस्स चरित्ताया तस्स वीरियाया नियमं अत्थि जस्स पुण वीरियाया तस्स चरित्ताया सिय अत्थि सिय नत्थि ॥ एयासि—णं भंते ! दवियायाणं कसायायाणं जाव वीरियायाणं य कयरे २ जाव विसेसा० गोयमा ? सव्वत्थोवाओ चरित्तायाओ नाणायाओ अणंतगुणाओ कसायाओ अणंत० जोगायाओ वि० विरियायाओवि उवयोगदवियदंसणायाओ तिन्निवि तुल्लाओ वि० ॥ (सू० ४६७)

आया भंते ! नाणे अन्नाणे ?, गोयमा ! आया सिय नाणे सिय अन्नाणे णाणे पुण नियमं आया ॥ आया भंते ! नेरइयाणं नाणे अन्ने नेरईयाणं नाणे ? गोयमा ! आया नेरइयाणं सिय नाणे सिय अन्नाणे नाणे पुण से नियमं आया एवं जाव थणियकुमाराणं, आया भंते ! पुढवि० अन्नाणे अन्ने पुढविकाइयाणं अन्नाणे ?, गोयमा ! आया पुढविकाइयाणं नियमं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्नाणे अन्नाणेवि नियमं आया, एवं जाव वणस्सइका०, बेइंदिय तेइंदिय जाव वेमाणियाणं जहा नेरइयाणं। आया भंते दंसणे अन्ने दंसणे ? गोयमा ! आया नियमं दंसणे दंसणेवि नियमं आया। आया भंते ! नेर० दंसणे अन्ने नेरइयाणं दंसणे ?, गोयमा ! आया नेरइयाणं नियमा दंसणे दंसणेवि से नियमं आया एवं जाव वेमा० निरंतरं दंडओ ॥ (सू० ४६८)

टीका :—'कइविहा णं' मिति, 'आय' त्ति अतति—सततं गच्छति अपरापरान् स्वपरपर्यायानित्यात्मा, अथवा अतधतोर्गमनार्थत्वेन ज्ञानार्थत्वादतति—सन्ततमवगच्छति उपयोगलक्षणत्वादित्यात्मा, प्राकृतत्वाच्च सूत्रे स्त्रीलिंगनिर्देशः तस्य चोपयोगलक्षणत्वात् सामान्येनैकविधत्वेऽप्युपाधिभेदादष्टधात्वं, तत्र 'दवियाय' त्ति द्रव्यं —त्रिकालानुगाम्युपसर्जनीकृतकषायादि पर्यायं तद्रूप आत्मा द्रव्यात्मा सर्वेषां जीवानां, 'कसायाय' त्ति क्रोधादिकषाय विशिष्ट आत्माकषायात्मा अक्षीणानुपशान्तकषायाणाम्' 'जोगाय' त्ति योगामनः प्रभृतिव्यापारास्तत्प्रधान आत्मा योगात्मा योगवतामेव, 'उवओगाया' त्ति उपयोगः– साकारानाकारभेदस्तत्प्रधान आत्मा उपयोगात्मा सिद्धसंसारिस्वरूपः सर्वजीवानां, अथवा विवक्षितवस्तूपयोगापेक्षयोपयोगात्मा, 'नाणाय' त्ति ज्ञानविशेषित उपसर्जनीकृतदर्शनादिरात्मा ज्ञानात्मा सम्यग्दृष्टेः एवं दर्शनात्मादयोऽपि नवरं दर्शनात्मा सर्वजीवानां, चारित्रात्मा विरतानां वीर्य—उत्थानादि तदात्मा सर्वसंसारिणामिति, उक्तं च—जीवनां द्रव्यात्माज्ञेयः सकषायिणां कषायात्मा। योगः सयोगिनां पुनरुपयोगः सर्वजीवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम् ॥ १ ॥ ज्ञानं सम्यग्दृष्टेर्दर्शनमथ भवति सर्वजीवानाम् । चारित्रं विरतानां तु सर्वसंसारिणां वीर्यम् ॥२" इति ॥ एवमष्टधाऽऽत्मनं प्ररूप्यथ यस्यात्मभेदस्य यदन्यदात्मभेदान्तरं युज्यते च न युज्यते च तस्य तद्दर्शयितुमाह—'जस्स ण' मित्यादि, इहाष्टौ पदानि स्थाप्यन्ते, तत्र प्रथमपदं शेषैः सप्तभिः सह चिन्त्यन्ते तत्र यस्य जीवस्य 'द्रव्यात्मा' द्रव्यात्मत्वं जीवत्वमित्यर्थः तस्यकषायात्मा स्यादस्ति' कदाचिदस्ति सकषायावस्थायां 'स्यान्नास्ति' कदाचिन्नास्ति क्षीणोपशान्तकषायावस्थायां, यस्य पुनः कषायात्माऽस्ति तस्य द्रव्यात्मा द्रव्योत्मत्वं—जीवत्वं नियमादस्ति, जीवत्वं विना कषायाणामभावादिति । तथा यस्य द्रव्यात्मा तस्य योगात्माऽस्ति, योगवतामिव, नास्ति अयोगिसिद्धानामिव, तथा यस्य योगात्मा तस्य द्रव्यात्मा नियमादस्ति, जीवत्वं विना योगानामभावात्, एतदेव पूर्वसूत्रोपमानेन दर्शयन्नाह–'एवं जहा दवियाये' त्यादि । तथा यस्य जीवस्य द्रव्यात्मा तस्य नियमादुपयोगात्मा, यस्याप्युपयोगात्मा तस्य नियमाद् द्रव्यात्मा, एतयोः परस्परेणाविनाभूतत्वात् यथा सिद्धस्य, तदन्यस्य च द्रव्यात्मास्त्युपयोगात्मा चोपयोगलक्षत्वाज्जीवानां , एतदेवाह—'जस्स दवियाये' त्यादि । तथा 'जस्स दवियाया तस्स नाणाया भयणाए जस्स पुण नाणाया तस्स दवियाया नियमं अत्थि' त्ति यस्य जीवस्य द्रव्यात्मा तस्य ज्ञानात्मा स्यादस्ति यथा सम्यग्दृष्टीनो स्यान्नास्ति यथा मिथ्यादृष्टीनामित्येवं भजना, यस्य तु ज्ञानात्मा तस्य द्रव्यात्मा नियमादस्ति, यथा सिद्धस्येति 'जस्स दवियाया तस्स दंसणाया नियमं अत्थि' त्ति यथा सिद्धस्य केवलदर्शनं 'जस्स वि दंसणाया तस्स दवियाया नियमं अत्थि' त्ति यथा चक्षुर्दर्शनादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्शनवतां जीवत्वमिति, तथा 'जस्स दवियाया तस्स चरित्ताया भयणाए' त्ति यतः सिद्धस्याविरतस्य वा द्रव्यात्मत्वे सत्यपि चारित्रात्मा नास्ति विरतानां चास्तीति भजनेति, 'जस्स पुण चरित्ताया तस्य दवियाया नियमं' अत्थि, त्ति चारित्रिणां जीवत्वाऽव्यभिचारित्वादिति, 'एवं वीरयातेवि समं' ति यथा द्रव्यात्मनश्चारित्रात्मना सह भजनोक्ता नियमश्चैवं वीर्यात्मनाऽपि सहेति, तथाहि— यस्य द्रव्यात्मा तस्य वीर्यात्मा नास्ति, यथा सकरणवीर्यापेक्षया सिद्धस्य तदन्यस्य त्वस्तीति भजना, वीर्यात्मनस्तु द्रव्यात्माऽस्त्येव यथा संसारिणामिति ॥८॥ अथ कषायात्मना सहान्यानि षट्पदानि चिन्त्यन्ते—जस्सण'-मित्यादि, यस्य कषायात्मा तस्य योगात्माऽस्त्येव, नहि सकषायोऽयोगी भवति, यस्य तु योगात्मा तस्य कषायात्मा स्याद्वा न वा, सयोगानां सकषायाणामकषायाणां च भावादिति, 'एवं उवओगाया, एवी' त्यादि, अयमर्थ— यस्य कषायात्मा तस्योपयोगात्माऽवश्यं भवति, उपयोगरहितस्य कषायाणामभावात्, यस्य पुनरुपयोगात्मा तस्य कषायात्मा भजनया, उपयोगात्मतायां सत्यामपि कषायिणामेव कषायात्मा भवति निष्कषायाणां तु नासाविति भजनेति, तथा 'कसायाया य नाणाया य परोप्परं दोवि भइयव्वाओ' त्ति कथं यस्य कषायात्मा तस्य ज्ञानात्मा स्यादस्ति स्यान्नास्ति, यतः कषायिणः सम्यग्दृष्टेर्ज्ञानात्माऽस्ति मिथ्यादृष्टेस्तु तस्य नास्त्यसाविति भजना, तथा यस्य ज्ञानात्मास्ति तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, ज्ञानिनां कषायभावात् तदभावाच्चेति भजनेति, ' जहा कसायाया उवओगाया य तहा कसायाया य दंसणाया य' त्ति अतिदेश, तस्माच्चेदं लब्धं—' जस्स कसायाया तस्स दंसणाया नियमं अत्थि' दर्शनरहितस्य घटादेः कषायात्मनोऽभावात् ' जस्स पुण दंसणाया तस्स कसायाया सिय अत्थि सिय नत्थि' दर्शनवतां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कषायसद्भावात्तदभावाच्चेति, दृष्टान्तार्थस्तु प्राक् प्रसिद्ध एवेति, 'कसायाया य चरित्ताया य दोवि परोप्परं भइयव्वाओ' त्ति भजना चैवं—यस्य कषायात्मा तस्य चारित्रात्मा स्यादस्ति स्यान्नास्ति, कथं ?, कषायिणां चारित्रस्य सद्भावात् प्रमत्तयतीनामिव तदभावाच्चासंयतानामिवेति, तथा यस्य चारित्रात्मा तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, कथं ?, सामायिकादि चारित्रिणां कषायाणां भावाद् यथाख्यातचारित्रिणां च तदभावादिति, 'जहा कसायाया य जोगाया य तहा कसायाया वीरियाया य भाणियव्वाओ' त्ति दृष्टांतः प्राक् प्रसिद्धः, दार्ष्टान्तिकस्त्वेवं यस्य कषायात्मा तस्य वीर्यात्मा नियमादस्ति, नहि कषायवान् वीर्य्य विकलोऽस्ति, यस्य पुनर्वीर्यात्मा तस्य कषायात्मा भजनया, यतो वीर्य्यवान् स कषायोऽपि स्याद् यथा संयतः अकषायोऽपि स्याद् यथा केवलीति ॥ ६ ॥ अथ योगात्माऽग्रेतनपदैः पञ्चभिःसह चिन्तनोयस्तत्र च लाघवार्थमतिदिशन्नाह—' एवं जहा कसायाया वत्तव्वया भणिया तहा जोगायाएवि उवरिमाहिं समं भाणियव्व' त्ति, साचैवं—यस्य योगात्मा तस्योपयोगात्मा नियमाद् यथा सयोगानां, यस्य पुनरुपयोगात्मा तस्य योगात्मा स्यादस्ति यथा सयोगानां स्यान्नास्ति यथाऽयोगिनां सिद्धानाञ्चेति, तथा यस्य योगात्मा तस्य ज्ञानात्मा स्यादस्ति सम्यग्दृष्टीनामिव स्यान्नास्ति मिथ्यादृष्टानामिव यस्य ज्ञानात्मा तस्यापि योगात्मा स्यादस्ति सयोगिनामिव स्यान्नास्त्यो—गिनामिवेति, तथा यस्य योगात्मा तस्य दर्शनाऽऽत्माऽस्त्येव योगिनामिव यस्य च दर्शनात्मा तस्य योगात्मा स्यादस्ति योगवतामिव स्यान्नास्त्ययोगिनामिव, तथा यस्य योगात्मा तस्य चारित्रात्मा स्यादस्ति विरतानामिव स्यान्नास्त्यविरतानामिव, यस्यापि चारित्रात्मा तस्य योगात्मा स्यादस्ति सयोगचा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रित्रवतामिव स्यान्नास्त्ययोगिनामिवेति, वाचनान्तरे पुनरिदमेवं दृश्यते— जस्स चरित्ताया तस्स जोगाया नियमं' त्ति तत्र च चारित्रस्य प्रत्युपेक्षणादि व्यापाररूपस्य विवक्षितत्वात्तस्य च योगाविनाभावित्वात् यस्य चारित्रात्मा तस्य योगात्मा नियमादित्युच्यत इति, तथा यस्य योगात्मा तस्य वीर्यात्माऽस्त्येव योगसद्भावे वीर्यस्यावश्यम्भवात्, यस्य तु वीर्यात्मा तस्य योगात्मा भजनया यतो वीर्य्यविशेषवान् सयोग्यपि स्याद् यथा सयोगकेवल्यादि :— अयोग्यपि स्याद् यथाऽयोगिकेवलीति ॥५॥ अथोपयोगात्मना सहान्यानि चत्वारि चिन्त्यन्ते तत्रातिदेशमाह—'जहदवियाये' त्यादि एवञ्च भावना कार्या—यस्योपयोगात्मा तस्य ज्ञानात्मा स्यादस्ति यथा सम्यग् दृशां स्यान्नास्ति यथा मिथ्यादृषां, यस्य च ज्ञानात्मा तस्यावश्यमुपयोगात्मा सिद्धानामिवेति, ॥१॥ तथा यस्योपयोगात्मा तस्य दर्शनात्मऽस्त्येव यस्यापि दर्शनतमा तस्यापयोगात्माऽस्त्येव यथा सिद्धादीनामिव ति २ तथा यस्योपयोगात्मातस्य चारित्रात्मा स्यादस्ति यथा संयतानामसंयतानां च यस्य तु चारित्रात्मा तस्योपयोगात्माऽस्त्येवति यथा संयतानां ३ तथा यस्योपयोगात्मा तस्य वीर्यात्मा स्यादस्ति संसारिणामिव स्यान्नास्ति सिद्धानामिव यस्य पुनर्वीर्यात्मा तस्योपयोगात्माऽस्त्येव संसारिणामिवेति ४ । अथ ज्ञानात्मना सहान्यानि त्रीणि चिन्त्यन्ते 'जस्स नाणे' त्यादि, तत्र यस्य ज्ञानात्मा तस्य दर्शनात्मा स्त्येव सम्यगदृशामिव, यस्य च दर्शनात्मा तस्य ज्ञानात्मा स्यादस्ति यथा सम्यगदृशां स्यान्नास्ति यथा मिथ्यादृशामत एवोक्तं 'भयणाए' त्ति १ तथा 'जस्स नाणाया तस्स चरित्ताया सिय अत्थि' त्ति, संयतानामिव सिय नत्थि, त्ति, असंयतानमिव 'जस्स पुण चरित्ताया तस्स नाणाया नियमं अत्थि, त्ति ज्ञानं विना चारित्रस्याभावादिति २ तथा 'णाणाये'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यादि अस्यार्थः—यस्य ज्ञानात्मा तस्यवीर्यात्मा स्यादस्ति केवल्यादीनामिव स्यान्नास्ति सिद्धानामिव, यस्यापि वीर्यात्मा तस्य ज्ञानात्मा स्यादस्ति सम्यग् दृष्टेरिव स्यान्नास्तिमिथ्यादृश इवेति ३ ॥ अथ दर्शनात्मना सह द्वे चिन्त्येते 'जस्स दंसणाये' त्यादि, भावना चास्य—यस्य दर्शनात्मा तस्य चारित्रात्मा स्यादस्ति संयतानामिव स्यान्नस्त्यसंयतानामिव, यस्य च चारित्रात्मा तस्य दर्शनात्मातस्त्येव साधूनामिवेति १ तथा यस्य दर्शनात्मा तस्य वीर्यात्मा स्यादस्ति संसारिणामिव स्यान्नास्ति सिद्धानामिव, यस्य च वीर्यात्मा तस्य दर्शनात्माऽस्त्येव संसारिणामिवेति २॥ अथान्तिम पदयोर्योजना 'जस्स चरित्तौ त्यादि, यस्य चारित्रात्मा तस्य वीर्यात्माऽस्त्येव वीर्यं विना चारित्रस्याभावात्, यस्य पुनर्वीर्यात्मा तस्य चारित्रात्मा स्यादस्ति साधूनामिव स्यान्नास्त्यसंयतानामिवेति अधुनैषामेवात्मनामल्पबहुत्वमुच्यते 'सव्वत्थोवाओ चतित्तायाओ' त्ति चारित्रिणां संख्यातत्वात् 'णाणायाओ अणंत गुणाओ' त्ति सिद्धादीना सम्यग् दृशां चारित्रेभ्योऽनन्तगुणत्वात् 'कसायाओ अणंतगुणाओ' त्ति सिद्धेभ्यः कषायोदयवतामनन्तगुण त्वात् जोगायाओ विसेसाहियाओ' त्ति अपगतकषोयोदयैर्योगवद्भिरधिका इत्यर्थः 'वीरियाओ विसेसाहियाओ' त्ति अयोगिभिरधिका इत्यर्थः अयोगिनां वीर्यवत्वादिति, 'उवओगदवियदंसणायाओ तिण्णिवि तुल्लाओ विसेसाहियाओ' त्ति परस्परापेक्षया तुल्याः, सर्वेषां सामान्यजीवरूपत्वात् वीर्यात्मभ्यः सकाशादुपयोद्रव्यदर्शनात्मानो विशेषाधिका यतो वीर्यात्मानः सिद्धाश्च मीलिता उपयोगाद्यात्मानो भवंति, ते च वीर्यात्मभ्यः सिद्धराशिनाऽधिका भवन्तीति, भवंति चात्र गाथाः—कोडी सहस्स पहुत्तं जईण तो थोवियाओ चरणाया। णाणायाऽणंतगुणा पडुच्च सिद्धे य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धाओ ॥१॥ छाया—यतीनांकोटी सहस्रपृथकत्वं ततः स्तोकाश्चरणात्मा-नः । ज्ञानात्मनोऽनन्तगुणाः सिद्धाः सिद्धान् प्रतीत्य ॥१॥'होंति कसायायाओ ऽणंतगुणा जेण ते सरागाणं। जोगाया भणियाओ अयोगि वज्जाणतो अहिया ॥ २ ॥ छाया—कषायात्मानोऽनन्तगुणा भवन्ति यतस्ते सरागाणाम् । ततो योगात्मानोऽधिका अयोगिवर्ज्या यतोभणिताः ॥ २ ॥ ' जं सेलेसि गयाणवि लद्धो विरियं तओ समहियाओ । उवओगदविय दंसण सव्वजि-या णं ततो अहिया ॥ ३ ॥ इति, छाया—यच्छैलेशीगतानामपि लब्धि-वीर्य्य ततस्ते समधिका । उपयोगद्रव्यदर्शनात्मानः सर्वे जीवास्ततोऽधि-काः ॥ ३ ॥ इति । अथात्मान एव स्वरूपनिरुणायाह—'आया भंते ! नाणे इत्यादि, आत्मा ज्ञानं योऽयमात्माऽसौ ज्ञानं न तयोर्भेदः अथात्म-नोऽन्यज्ज्ञानमिति प्रश्नः, उत्तरं तु—आत्मा स्याज्ज्ञानं सम्यक्त्वे सति मत्यादि ज्ञान स्वभावत्वात्तस्य, स्यादज्ञानं मिथ्यात्वे सति तस्य मत्यज्ञाना-दि स्वभावत्वात्, ज्ञानं पुनर्नियमादात्मा आत्मधर्मत्वाज्ज्ञानस्य, न च सर्व-था धर्मो धर्मिणोभिद्यते, सर्वथा भेदे हि विप्रकृष्ट गुणिनो गुणमात्रोपल-ब्धौ प्रतिनियतगुणिविषय एवसंशयो न स्यात्, तदन्येभ्योऽपि तस्य भेदाविशेषात्, दृश्यते च यदा कश्चिद्धरिततरुतरुणशाखाविसररंध्रोदरान्तरतः किमपि शुक्लं पश्यति तदा किमियंपताका किमियं बालका ? इत्येवं प्रतिनि-यतगुणिविषयोऽसौ, नापि धर्मिणो धर्म्म सर्वथैवाभिन्नः, सर्वथैवाभेदेहि संशयानुत्पत्तिरेव, गुण ग्रहणात एव गुणिनोऽपि गृहीतत्वादतः कथञ्चि-दभेदपत्तमाश्रित्य ज्ञानं पुनर्नियमादात्मेत्युच्यत, इति इह चात्मा ज्ञानं व्यभिचरति ज्ञानं त्वात्मानं न व्यभिचरति खदिरवनस्पतिवदिति सूत्रगर्भार्थ इति ॥ अमुमेवार्थं दण्डके निरूपयन्नाह—'आये' त्यादि, नारकाणां ' आ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्मा' आत्मस्वरूपं ज्ञानं उतान्यन्नारकाणां ज्ञानं ? तेभ्यो व्यतिरिक्तमित्यर्थः इति प्रश्नः, उत्तरं तु आत्मा नारकाणां स्याज्ज्ञानं सम्यग्दर्शनाभावात् स्यादज्ञानं मिथ्या दर्शनाभावात् ज्ञानं—पुनः 'से' त्ति तन्नारक सम्बन्धि आत्मा न तद्व्यतिरिक्तमित्यर्थः ।। 'आया भंते ! पुढविक्काइ-याण' मित्यादि, 'आत्मा' आत्मस्वरूपज्ञानमुतान्यत्तत्तेषां ? उत्तरं तु आत्मा तेषामज्ञानरूपो नान्यत्तत्तेभ्य इति भावार्थः एवं दर्शनसूत्राण्यपि, नवरं सम्यग्दृष्टिमिथ्यादृष्ट्योर्दर्शनस्याविशिष्टत्वादात्मा दर्शनं दर्शनमप्या-त्मैवेति वाच्यं, यत्र हि धर्मे विपर्ययो नास्ति तत्र नियम एवोपनीयते न व्यभिचारो, यथैव दर्शने, यत्र तु विपर्ययोऽस्ति तत्र व्यभिचारो नियमश्च यथा ज्ञाने आत्मा ज्ञानरूपोऽज्ञानरूपश्चेति व्यभिचारः, ज्ञानं त्वात्मैवेति नियम इति ।।

**मूल** :—आया भंते ! रयणभापु० अन्ना रयणप्पभा पुढवी ! गोयमा ! रयणप्पभा सिय आया सिय नो आया सिय अवत्तव्वं आयति य नो आयाइ य, से केणट्ठेणं भंते ! एवं वुच्चइ रयणप्पभा पुढवी सिय आया सिय नो आया सिय अवत्तव्वं आतातिय नो आतातिय ? गोयमा ! अप्पणो आदिट्ठे आया परस्स आदिट्ठे नो आया तदुभयस्स आदिट्ठे अवत्तव्वं रयणप्पभा पुढवी आयातिय नो आयातिय य, से तेणेट्ठणं तं चेव जाव नो आयातिय । आया भंते ! सक्करप्पभा पुढवी जहा रयणप्पभा पुढवी तहा सक्क,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रप्पभाएवि, एवं जाव अहे सत्तमा । आया भंते ! सोहम्मकप्पे पुच्छा, गोयमा ! सोहम्मे कप्पे सिय आया सिय नो आया जाव नो आयाति य, से केणट्ठेणं भंते ! जाव नो आयातिय ?, गोयमा ! अप्पणो आइट्ठे आया परस्स आइट्ठे नो आया तदुभयस्स आइट्ठे अवत्तव्व आताति य नो आताति य, से तेणट्ठेणं तं चेव जाव नो आयाति य, एवं जाव अच्चुएंकप्पे। आया भंते ! गेविज्जविमाणे अन्ने गेविज्जविमाणे एवं जहा रयणप्पभा तहेव, एवं अणुत्तरविमाणावि, एवं ईसिपब्भारावि। आया भंते परमाणुपोग्गले अन्ने परमाणुपोग्गले ?, एवं जहा सोहम्म कप्पे तहा परमाणुपोग्गलेवि भाणियव्वे ॥ आया भंते दुपएसिएं खंधे अन्ने दुपएसिए खंधे ? गोयमा ! दुपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाइ य नो आयातिय ३ सिय आया य नो आया य ४ सिय आया य अवत्तव्वं आयाति य नो आया तिय ५ सिय नो आया य अवत्तव्वं आयाति य नो आयाति य ६, से केणट्ठेणं भंते ?, एवं तं चेव जाव नो आयाति य अवत्तव्वं अयाति य नोआयाति य गोयमा ! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे णो आया २ तदुभयस्स आदिट्ठे अवत्तव्वं दुपएसिए खंधे आयाति य नो आयाति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य ३ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे दुप्पएसिए खंधे आया य नो आया य ४ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे दुपएसिएं खंधे आया य अवत्तव्वं आयाइ य नो आयाइ य ५ देसे आदिट्ठे असब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे दुपएसिए खंधे नो आया य अवत्तव्वं आयाति य णो आयाति य ६ से तेणट्ठेणं त चेव जाव नो आयाति य ॥ आया भंते ! तिपएसिए खंधे अन्ने तिपएसिए खंधे ?, गोयमा १ तिपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवतव्वं आयाति य नो आयाति य ३ सिय आया य नो आया य ४ सिय आया य नो आयाओ य ५ सिय आयाउ य नो आया य ६ सिय आया य अवत्तव्वं आयाति य नो आयाति य ७ सिय आयाइय अवत्तव्वाइं आयाओ य नो आयाओ य ८ सिय आयाओ य अवत्तव्वं आयाति य नो आयाति य ९ सिय नो आया य अवत्तव्वं आयाति नो आयाति य १० सिय आया य अवत्तव्वाइं आयाओ य नो आया य ११ सिय नो आयाओ य अवत्तव्वं आयाइ य नो आयाइ य १२ सिय आया य नो आया य अवत्तव्वं आयाइ य नो आयाइय १३ से केणट्ठेणं भंते ?, एवं वुच्चइ तिपएसिए खंधे सिय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आया एवं चेव उच्चारेयव्वं जाव सिय आया य नो आया य अवत्त-व्वं आयाति य नो आयाति य १, गोयमा ! अप्पणो आइट्ठे आ-या १ परस्स आइट्ठे नो आया २ तदुभयस्स आइट्ठे अवत्तव्वं आयाति य नो आयाति य ३ देसे आइट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भाव पज्जवे तिपएसिए खंधे आया य नो आया य ४ देसे आदिट्ठे सब्भावपज्जवे देसा आइट्ठा असब्भाव पज्जवे तिपएसिए खंधे आया य नो आयाओ य ५ देसा आदिट्ठा सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे देसे आदिट्ठे अस-ब्भाव पज्जवे तिपएसिए खंधे आयाओ य नो आया य ६ देसे आदिट्ठे सब्भाव पज्जवे देसे आदिट्ठे तदुभयपज्जवे तिपएसिए खंधे आया य अवत्तव्वं आयाइ य नो आयाइ य ७ देसे आदिट्ठे सब्भावपज्जवे देसा आदिट्ठा तदुभयपज्जवा तिपएसए खंधे आया य अवत्तव्वाइं आयाओ य नो आयाओ य ८ देसा आदिट्ठा सब्भावपज्जवा देसे आदिट्ठे तदुभयपज्जवे तिपएसिएखंधे आयाओ य अवतव्वं आयाति य ९ एए तिन्नी भंगा, देसे आदिट्ठे असब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे तिपएसिए खंधे नो आया य अवत्तव्वं आयाइ य नो आयाति य १० देसे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदिट्ठे असब्भावपज्जवे देसा आदिट्ठा तदुभयपज्जवा तिपएसिए खंधे नो आया य अवत्तव्वाइं आयाओ य नो आयाओ य ११ देसा आदिट्ठा असब्भावपज्जवा देसे आदिट्ठे तदुभयपज्जवे तिपएसिए खंधे नो आयाओ य अवत्तव्वं आयातिय नो आयाति य १२ देसे आदिट्ठे सब्भावपज्जवे देसेआदिट्ठे असब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे तिपएसिए खंधे आया य नो आया य अवत्तव्वं आयाति य नो आयाइ य १३ से तेणट्ठेणं गोयमा ! एवं वुच्चइ तिपएसिए खंधे सिय आया तं चेव जाव नो आयाति य ॥ आया भंते ! चउप्पएसिए खंधे अन्ने पुच्छा, गोयमा ! चउप्पएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाति य नो आयाति य ३ सिय आया य नो आयाय ४ सिय आया य अवत्तव्वं ४ सिय नो आया य अवत्तव्वं ४ सिय आया य नो आया य अवत्तव्वं आयाति य नो आयातिय १६ सिय आया य नो आयाय अवत्तव्वाइं आयाआ य नो आयाओ य १७ सिय आया य नो आयाओ य अवत्तव्वं आयाति य नो आयाति य १८ सिय आयाओ य नो आयाय अवत्तव्वं आयाति य नो आयाति य १६ से केणट्ठेणं भंते ! एवं वुच्चइ चउप्पएसिए खंधे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिय आया य नो आया य अवत्तव्वं तं चेव अट्ठे पडिउच्चारेयव्वं ?, गोयमा ! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे नो आया २ तदुभयस्स आदिट्ठे अवत्तव्वं आयाति य नो आयाति य ३ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भाव पज्जवे चउभंगो, सब्भावपज्जवेणं तदुभयेण य चउभंगो असब्भावेणं तदुभयण य चउभंगो, देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे चउप्पएसिए खंधे आया य नो आया य अवत्तव्वं आयाति य नो आयाति य, देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे देसा आदिट्ठा तदुभयपज्जवा चउप्पएसिए खंधे भवइ आया य नो आया य अवत्तव्वाइं आयाओ य नो आयाओ य १७ देसे आदिट्ठे सब्भावज्जवे देसा आदिट्ठा असब्भावपज्जवा देसे आदिट्ठे तदुभयपज्जवे चउप्पएसिए खंधे आया य नो आयाओ य अवत्तव्वं आयाति य नो आयातिय १८ देसा आइट्ठा सब्भावपज्जवा देसे आइट्ठे असब्भावप० देसे आइट्ठे तदुभयपज्जवे चउप्पएसिए खंधे आयाओ य नो आया य अवत्तव्वं आयाति य नो आयातिय १९ से तेणट्ठेणं गोयमा ! एवं वुच्चइ चउप्पएसिए खंधे सिय आया सिय नो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आया सिय अवत्तव्वं निक्खेवे ते चेव भंगा उच्चारेयव्वा जाव नो आयाति य ॥ आया भंते ! पंचपएसिए खंधे अन्ने पंचपएसिए खंधे ?, गोयमा ! पंचपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाति य नो आयाति य ३ सिय आया य नो आया य सिय अवत्तव्वं ४ नो आया य अवत्तव्वेण य ४ तियग संजोगे एक्को ण पडइ, से केणट्ठेणं भंते ! तं चेव पडिउच्चारेयव्वं ?, गोयमा ! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे नो आया २ तदुभयस्स आदिट्ठे अवत्तव्वं ३ देसे आदिट्ठे सब्भाव पज्जवे देसे आदिट्ठे असब्भावपज्जवे एवं दुयग संयोगे सव्वे पडंति तियग संजोगे एक्को ण पडइ । छप्पएसियस्स सव्वे पडंतिजहा छप्पएसिए एवं जाव अणंतपएसिए । सेवं भंते । सेवं भंते त्ति जाव विहरति ॥ (सू० ४६९ ) ॥ दसमो उद्देसो समत्तो ॥ बारसमं सयं समत्तं ॥ १२—१० ॥

टीका :—आत्माधिकाराद् रत्नप्रभादिभावानात्मत्वादिभावेन चिन्तयन्नाह—'आयाभंते' इत्यादि, अतति—संततं गच्छति तांस्तान्पर्यायानित्यात्मा ततश्चात्मा–सद्रूपारत्नप्रभापृथिवी 'अन्न' त्ति अनात्मा असद्रूपेत्यर्थः 'सिय आया सिय नो आय' त्ति स्यात्सती स्याद्सती 'सिय अवत्तव्वं' त्ति आत्मत्वेनानात्मत्वेन च व्यपदेष्टुमशक्यं वस्त्विति भावः, कथमवक्तव्यम् ? इत्याह—आत्मेतिच नो आत्मेति च वक्तुमशक्यमित्यर्थ,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'अप्पणो आइट्ठ' त्ति आत्मनः—स्वस्य रत्नप्रभाया एव वर्णादिपर्यायैः 'आदिट्ठ' आदेशेसति तैर्व्यपदिष्टा सतीत्यर्थः आत्मा भवति, स्वपर्यायापेक्षया सतीत्यर्थः 'परस्स आइट्ठे नो आया' त्ति परस्य शर्करादिपृथिव्यन्तरस्य-पर्यायैरादिष्टे—आदेशेसति तैर्व्यपदिष्टा सतीत्यर्थः नो आत्मा—अनात्मा भवति, पररूपापेक्षयाऽसतीत्यर्थः, 'तदुभस्य आइट्टे अवत्तव्वं' त्ति तयोः स्वपरयोरुभयं तदेव वोभयं तदुभयं तस्य पर्यायैरादिष्टे—आदेशे सति तदुभयपर्यायैर्व्यपदिष्टेत्यर्थः 'अवक्तव्यम्' अवाच्यं वस्तु स्यात् तथाहि— न ह्यसौ आत्मेति वक्तुं शक्या, परपर्यायापेक्षयाऽनात्मत्वात्तस्याः, नाप्यनात्मेति वक्तुं शक्या, स्वपर्यायापेक्षया तस्या आत्मत्वादिति, अवक्तव्यं चात्मानात्मशब्दापेक्षयैव न तु सर्वथा अवक्तव्यशब्देनैव तस्या उच्यमानत्वात् अनभिलाप्यभावानामपि भावपदार्थवस्तु प्रभृतिशब्दैरनभिलाप्यशब्देन वाऽभिलाप्यत्वादिति, एवं परमाणु सूत्रमपि ॥ द्विप्रदेशिक सूत्रे षड्भंगाः तत्राद्यस्त्रयः सकलस्कन्धापेक्षाः पूर्वोक्ता एव, तदन्ये तु त्रयोदेशापेक्षाः तत्र च 'गोयमे' त्यत आरभ्य व्याख्यायते 'अप्पणो' त्ति स्वस्य पर्यायैः 'अदिट्ठे' त्ति आदिष्टे—आदेशे सति आदिष्ट इत्यर्थः द्विप्रदेशिकस्कन्ध-आत्मा भवति १ एवं परस्य पर्यायैरादिष्टोऽनात्मा २ तदुभयस्य—द्विप्रदेशिकस्कन्धतदन्यस्कन्धलक्षणस्य पर्यायैरादिष्टोऽसाववक्तव्यं वस्तु स्यात्, कथम्? आत्मेति चानात्मेति चेति ३ तथा द्विप्रदेशत्वात्तस्य देश एक अदिष्टः, सद्भावप्रधानाः सत्तानुगताः पर्यवायस्मिन् स सद्भावपर्यवः, अथवा तृतीयबहुवचनमिदं स्वपर्यवैरित्यर्थः, द्वितीयस्तु देश आदिष्टः असद्भावपर्यवः परपर्यायैरित्यर्थः, परपर्यवाश्च तदीय द्वितीयदेशसम्बन्धिनो वस्त्वन्तरसम्बन्धिनो वेति ततश्चासौ द्विप्रदेशिकः स्कन्धः क्रमेणात्मा चेति नोआत्मा चेति

For Private And Personal Use Only

४, तथा तस्य देश आदिष्टः सद्भावपर्यवो देशश्चोभयपर्यवस्ततोऽसावात्मा चावक्तव्यंचेति ५ तथा तस्यैव देश आदिष्टोऽसद्भावपर्यवोदेशस्तूभयपर्यवस्ततोऽसौ नोआत्मा चावक्तव्यं च स्यादिति ६ सप्तमः पुनरात्मा च नोआत्मा चावक्तव्यं चेत्येवंरूपो न भवति द्विप्रदेशिके, द्वयंशत्वादस्य त्रिप्रदेशिकादौ तु स्यादिति सप्तभंगी ॥ त्रिप्रदेशिस्कन्धे तु त्रयोदश भङ्गास्तत्रपूर्वोक्तेषु सप्तस्वाद्याः सकलादेशास्त्रयस्तथैव, तदन्येषु तु त्रिषु त्रयस्त्रय एकवचनबहुवचनभेदात् सप्तमस्त्वेकविध एव स्थापनाचेयम् यच्चेह प्रदेशद्वये-



ऽप्येकवचनं क्वचित्तत्तस्य प्रदेशद्वयस्यैकप्रदेशावगाढत्वादि हेतुनैकत्वविवक्षणात्, भेदविवक्षायां च बहुवचनामिति ॥ चतुष्प्रदेशिकेऽप्येवं, नवरमेकोनविंशतिभङ्गाः तत्र त्रयः सकलादेशाः तथैव शेषेषु चतुर्षु

प्रत्येकं चत्वारो विकल्पाः ते चैवं चतुर्थादिषु त्रिषु 

सप्तमस्त्वेवं—  पंचप्रदेशिके

तु द्वाविंशतिस्तत्राद्यास्त्रयस्तथैव, तदुत्तरेषु च त्रिषु प्रत्येकं चत्वारो विकल्पा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तथैव, सप्तमे तु सप्त, तत्र त्रिकसंयोगे किलाष्टौ भंगका भवन्ति तेषु च सप्तैवेह ग्राह्याः, एकस्तु तेषु न पतत्यसंभवात् , इदमेवाह—'तिगसंजोगे त्यादि, तत्रैतेषां स्थापना

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | २ | १ | २ | १ | २ | १ |
| १ | १ | २ | २ | १ | १ | २ |
| १ | १ | १ | १ | २ | २ | २ |

यश्च न पतति— स पुनरयम् २२२, षट्प्रदेशिके त्रयो विंशतिरिति ।। द्वादशशते दशमः १२, १० समाप्तं च द्वादशशत विवरणम् ।।

सू० ४६६ व्याख्या प्र. शतक १२ उद्दे० १०

**मूल:—अद्दायं पेहमाणे मणूसे अद्दायं पेहति अत्ताणं पेहइ पलिभागं पेहति ? गोयमा ! अद्दायं पेहति नो अप्पाणं पेहति पलिभागं पेहति, एवं एतेणं अभिलावेणं असि मणिं दुद्धं पाणं तेल्लं फाणियं वसं (सूत्रं १६७ )**

**टीका—** अद्दायं पेहमाणो' इत्यादि, ' अद्दाय' मिति आदर्शं 'पेहमाणे' इति प्रेक्षमाणो मनुष्यः किमादर्शं प्रेक्षते आहोश्विदात्मानं ? अत्रात्मशब्देन शरीरमभिगृह्यते, उत' पलिभाग' मिति प्रतिभागं प्रतिबिम्बं ? भगवानाह—आदर्शं तावत् प्रेक्षत एव तस्य स्फुटरूपस्य यथावस्थिततया तेनोपलम्भात्, आत्मानं—आत्मशरीरं पुनर्न पश्यति, तस्य तत्राभावात्, स्वशरीरं हि स्वात्मनि व्यवस्थितं नादर्शे ततः कथमात्मशरीरञ्च तत्र पश्येदिति ? प्रतिभागं—स्वशरीरस्य प्रतिबिम्बं पश्यति, अथकिमात्मकं प्रतिबिम्बम् ? उच्यते, छायापुद्गलात्मकं, तथाहि—सर्वमैन्द्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्च, रश्मय इति छाया पुद्गलाः व्यवह्रियन्ते च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छायापुद्गलाः प्रत्यक्षत एव सिद्धाः, सर्वस्यापि स्थूलवस्तुनः छाया, अध्यक्षतः प्रतिप्राणि प्रतीतेः. अन्यच्च यदि स्थूलवस्तु व्यवहिततया दूरस्थिततया वा नादर्शादिष्ववगाढरश्मिर्भवति, ततो न तत्र तद् दृश्यते तस्मादवसीयते सन्ति छाया पुद्गलाः इति, ते च छायापुद्गलास्तत्तत् सामग्रीवशाद् विचित्र परिणमनस्वभावास्तथाहि—ते छाया पुद्गला दिवा वस्तुन्यभास्वरे प्रतिगताः सन्तः स्वसंबंधि द्रव्याकारमाबिभ्राणाः श्यामरूपतया परिणमन्ते निशि तु कृष्णाभाः, एतच्च प्रसरति दिवसे सूर्य्यकरनिकरे निशि तु चन्द्रोद्योते प्रत्यक्षत एव सिद्धं, त एव छाया—परमाणवः आदर्शादिभास्वर द्रव्यप्रतिगताः सन्तः स्वसंबंधिद्रव्याकारमादधानाः यादृग् वर्णः स्वसम्बन्धिनिद्रव्ये कृष्णो नीलः शितः पीतो वा तदाभाः परिणमन्ते, एतदप्यादर्शादिष्वध्यक्षतः सिद्धं, ततोऽधिकृतसूत्रेऽपि ये मनुष्यस्य छायापरमाणवः आदर्शमुपसंक्रम्य स्वदेहवर्णतया स्वदेहाकारतया च परिणमन्ते तेषां तत्रोपलब्धिर्न शरीरस्य, ते च प्रतिबिम्बशब्दा वाच्या अत उक्तं—न शरीरं पश्यति किन्तु प्रतिभागमिति, नैवेतत् स्वमनीषिकाविजृम्भितं, यत उक्तमागमे—'सामा उ दिया छाया अभासुरगता निसिं तु कालाभा। सा चेव भासुर गया सदेह वण्णा मुणेयव्वा ॥ १ ॥ छाया—श्यामा तु दिवा छाया अभास्वरगता निशि तु कालाभा। सैव भास्वरगता स्वदेह-वर्णा ज्ञातव्या ॥ १ ॥ जे आदरिसस्सन्तो देहावयवा हवंति संकंता। तेसिं तत्थुवलंभो पगासजोगा न इयरेसिं ॥ २ ॥ छाया—ये आदर्शस्यान्तर्देहावयवा भवन्ति संक्रान्ताः। तेषां तत्रोपलम्भः प्रकाशयोगात् नेतरेषाम् ॥२॥ मूलटीकाकारोऽप्याह—यस्मात् सर्वमेवहि ऐन्द्रियकं स्थूलं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्यं चयापचयधर्मिकं रश्मिवच्च भवति, यतश्चादर्शादिषु छाया स्थूलस्य दृश्यते अवगाढ रश्मिनः ततः स्थूलद्रव्यस्य कस्यचिद्दर्शनं भवति, नचान्तरितं दृश्यते किञ्चिन्न अति दूरस्थं वा अतः 'पलिभागं' प्रति भागं 'पेहति' पश्यतीति। एवमसिमण्यादि विषयाण्यपि षट् सूत्राणिभावनीयानि, सूत्रपाठोऽप्येवम्—'असिं देहमाणेमणूसे किं असिं देहइ अत्ताणं देहइ पलिभागं देहइ ? इत्यादि, गोयमा ! असिं देहइ नो अत्ताणं देहइ पलिभागं देहइ' इत्यादि ॥

प्रज्ञापना सूत्रपद १५ उद्देश १ सू० सं १९७॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ज्ञान विषयः

'यथोद्देशस्तथा निर्देशः' इति न्यायतोज्ञानभेदानाह—

' तत्थ पंचविहं नाणं सुअं आभिणि वोहियं ।
ओहियनाणं तइयं मणनाणं च केवलं ॥

उत्तराध्ययन—सूत्र मोक्षमार्ग गत्यध्ययन २८, गाथा, ४ ॥

टीकाः—'तत्र' इति तेषु ज्ञानादिषु मध्ये ' पञ्चविधं' पञ्चप्रकारं, किं तत् ? ज्ञानं, क एते पञ्च प्रकारा इत्याह—श्रूयते तदिति श्रुतं—शब्द मात्रं, तच्च द्रव्यश्रुतमेव, यत् पुनः शब्दमाकर्णयतः स्वयं वा वदतः पुस्तकादिन्यस्तानि वा चक्षुरादिभिरक्षराण्युपलभमानस्य शेषेन्द्रियगृहीतं वाऽर्थं विकल्पयतोऽक्षरारूषितं विज्ञानमुपजायते तदिह भावश्रुतं श्रुतशब्देनोक्तं, तथाऽभिमुखो योग्यदेशावस्थित वस्त्वपेक्षया नियतः स्वस्वविषयपरिच्छेदकतयाऽवबोधः—अवगमोऽभिनिबोधः स एवाभिनिबोधिकं, विनयादित्वात् स्वार्थिकष्ठक्, ' ओहि' त्ति अवशब्दोऽधः शब्दार्थः, ततश्चाधः इत्यधस्ताद्धावति अधोऽधा विस्तृतविषयवेदकतयेत्यत्रधिः, औणादिको डिः, यद्वा 'अवेत्यध एव धानं धातूनामनेकार्थत्वात् परिच्छेदोऽवधिः, उपसर्गे घोः किरिति (पा. ३-३-९२) किः, अथवाऽवधिः—मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृतिरित्येवंरूपा, तदुपलक्षितं ज्ञानमप्यवधिः, ज्ञायतेऽनेनेति ज्ञातिर्वा ज्ञानं ततोऽवधिश्चासौ ज्ञानं चावधिज्ञानं, तृतीयं तृतीय



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थानवर्त्तित्वात्, ' मणणाणं' ति मनः शब्देन द्रव्यपर्याययोः कथञ्चिद् भेदात् मनोद्रव्यपर्याया गृह्यन्ते, तेषु तत्तत् संज्ञिविकल्पहेतुषु ज्ञानं मनो ज्ञानं, तानेव हि मनः पर्यायज्ञानी साक्षादेव बुध्यते नतु बाह्यान्, अनुमान गम्यमानत्वात्तेषाम्; उक्तं हि—'जाणति वज्झेऽणुमाणाओ' त्ति चः समुच्चये भिन्नक्रमस्ततः केवलं च, तत्र केवलम्—एकमकलुषं सकलम-साधारणमनन्तं च ज्ञानमिति प्रक्रम, उक्तं हि—' केवलमेगं सुद्धं सकलमसाधारणं अणंतं च' छाया—केवलमेकं शुद्धं सकलमसाधारण मनन्तं च । आह—नन्द्यादिषु मतिज्ञानानन्तरं श्रुतज्ञानमुक्तं तदिह किमर्थमादित एव श्रुतोपादानं ? उच्यते, शेषज्ञानानामपि स्वरूपज्ञानस्य प्रायस्तदधीनत्वेन प्राधान्यख्यापनार्थमिति सूत्रार्थः ॥

साम्प्रतं ज्ञानशब्दस्य सम्बन्धि शब्दत्वाद् येषां तज्ज्ञानं तान्य-भिधातुमाह—

**मूल**—एयं पंचविहं नाणं दव्वाण य गुणाण य ।
पज्जवाणं च सव्वेसिं, नाणं नाणीहिं देसियं ॥५॥

**टीका** :—'एतद्' अनन्तरोक्तं पञ्चविधं ज्ञानं द्रवन्ति गच्छन्ति तांस्तान्पर्यायानिति द्रव्याणि—वक्ष्यमाणलक्षणानि तेषां 'च' तद्गताने-कभेदख्यापको, गुणानां—रूपादीनां, च प्राग्वत्, परीति—सर्वतः, कोऽर्थ ? द्रव्येषु गुणेषु सर्वेष्ववन्ति—गच्छन्तीति पर्यवास्तेषां च 'सर्वेषाम्' अशे-षाणां, केवलापेक्षया चायं द्रव्यकार्त्स्न्ये, सर्व शब्दः शेष ज्ञानापेक्षया तु प्रकारकार्त्स्न्ये, प्रतिनियतपर्यायग्राहित्वात्तेषां, 'ज्ञानम्'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवबोधकं 'ज्ञानिभिः' अतिशयज्ञानोपेतैः केवलिभिरिति यावत् 'देशितं कथितम्। अनेन च यदाहुः—ज्ञानं ज्ञानस्वरूपस्यैव ग्राहकं, बाह्याभिमतस्य वस्तुनो ज्ञानातिरिक्तस्यासत्वाद्, अत एवोक्तं—स्वरूपस्य स्वतो गतिरिति, तन्निरस्तम्, अन्तः सुखादिप्रतिभासवद् बहिः स्थूलप्रतिभासस्यापि स्वसंविदितत्वात्, न च युगपद्वेद्यमानयोरेकस्य तात्त्विकत्वमित्तरस्य त्वन्यथात्वमिति निमित्तं विना कल्पयितुं शक्यं, अथैकत्राविद्योपदर्शितत्वं तत् कल्पनिमित्तं, न यतस्तदितरत्रापि किं न कल्प्यते ?, निमित्तं विना कल्पनाया उभयत्राविशेषात्, तथा च ज्ञानस्यप्यभावेन सर्वशून्यतापत्तिरित्यलं प्रसंगेनेति सूत्रार्थः ॥ अनेन द्रव्यादिविषयत्वं ज्ञानस्योक्तं, तत्र च द्रव्यादीनि किं लक्षणानी इत्यत आह—

**मूल**—गुणाणं आसओ दव्वं, एगदव्वस्सिया गुणा।
लक्खणं पज्जवाणं तु उभओ अस्सिया भवे ॥६॥

**टीका :**—'गुणानां' वक्ष्यमाणानां 'आश्रयः' आधारो यत्रस्थास्त उत्पद्यन्ते उत्पद्य चावतिष्ठन्ते प्रलीयन्ते च तद् द्रव्यम्, अनेन रूपादय एव वस्तु न तद्व्यतिरिक्तमन्यदिति तथागतमतमपास्तं, तथाहि—यदुत्पादविनाशयोर्न यस्योत्पादविनाशौ न तत्ततोऽभिन्नं, यथा घटात्पटो, न भवतश्च पर्यायोत्पादविनाशयोर्द्रव्यस्योत्पादविनाशौ, न चायमसिद्धो हेतुः, स्थासकोशकुशूलाद्यवस्थासु मृदादिद्रव्यस्यानुगामित्वेन दर्शनात्, न चास्य मिथ्यात्वं कदाचिदन्यथादर्शनासिद्धेः, उक्तं हि—"योह्यन्यरूपसंवेद्यः, संवेद्येतान्यथा पुनः। स मिथ्या न तु तेनैव, यो नित्यमवगम्यते ॥१॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथैकस्मिन् द्रव्ये स्वाधारभूते आश्रिता: स्थिता:—एकद्रव्याश्रिता:, के ते ?—'गुणा:' रूपादय:, एतेन च ये द्रव्यमेववेच्छन्ति तद्व्यतिरिक्तांश्च रूपादीनविद्योपदर्शितानाहुस्तन्मतनिषेध: कृत:, संविन्निष्ठा हि विषयव्यवस्थितयो, न च रूपाद्युत्कलितरूपं कदाचित्केनचिद् द्रव्यमवगतमवगम्य ते वा, अथ तद्विवर्त्ता एव रूपादयो न तु तात्त्विका: केचन तद्भेदेन सन्ति, नन्वेवं रूपादिविवर्त्तो द्रव्यमित्यपि किं न कल्प्यते ? अथ तथैव प्रतीते:, एवं सति प्रतीतिरुभयत्र साधारणेत्युभयमुभयात्मकमस्तु, लक्ष्यतेऽनेनेति लक्षणं 'पर्यवाणां' वक्ष्यमाणरूपाणां 'तु' विशेषणे 'उभयो:' द्वयोः प्राकृतत्वाद् द्रव्यगुणयोराश्रिता: 'भवे' त्ति 'भवेयु:' स्यु: । अनेन च य एवमाहु: —यदाद्यन्तयोरसत् मध्येऽपि तत्तथैव, यथा मरीचिकादौ जलादि, न सन्ति च कुशूलकपालाद्यवस्थयोर्घटादिपर्याया:, ततो द्रव्यमेवादिमध्यान्तेषु सत्, पर्याया: पुनरसत्यैराकाशकेशादिभि: सदृशा अपि भ्रान्तै: सत्यतया लक्ष्यन्ते, यथोक्तम्— "आदावन्ते च यन्नास्ति मध्येऽपि न तत्तथा । वितथै: सदृशा: सन्तोऽवितथा इव लक्षिता: ॥१॥" तेऽपाकृता:, तथाहि—आद्यन्तयोरसत्त्वेनमध्येऽपिअप्यसत्त्वं साधयतामिदमाकूतं—यत् कचिदसत्तत्सर्वस्मिन्नसदिति, ततश्च मृद्द्रव्येऽप्यद्रव्यस्यासत्त्वात्सर्वस्मिन्नप्यसत्त्वप्रसंग:, अथेष्टमेवैतत्, सत्तामात्रस्यैव तत्त्वत इष्टत्वात्, उक्तं हि—"सर्वमेकं सदविशेषात्" नन्वेवमभावे भावाभावाद्भावस्यापि सर्वत्राभाव प्रसङ्ग:, तस्माद्बाधकप्रत्ययोदय एवासत्त्वे निबन्धनमिति न कचिदसत्त्वे तस्यावश्यंभाव:, ततो द्रव्यवत्पर्यायाणामप्यबाधितबोधविषयत्वे सत्त्वमस्तु, तथा गुणेष्वपि नवपुराणादिपर्याया: प्रत्यक्षप्रतीता एव कियत्कालभाविन:, प्रतिसमयभाविनस्तु पुराणत्वाद्यन्यथानुपपत्तेरनुमान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोऽवसीयन्ते, ततश्च द्रव्यगुणपर्यायात्मकमेकं, शबलमणि वच्चित्रप-तंगादिवद् वस्त्विति स्थितमिति सूत्रार्थः ॥ आह—गृह्णीमो 'गुणा-नामश्रयो द्रव्य'मिति द्रव्यलक्षणं' तच्चैवंलक्षणं द्रव्यं किमेकमेवोत तस्यभेदा अपि सन्तीत्याह—

**मूलः**—धम्मो अधम्मो आगासं कालो पुग्गलजंतवो ।
एस लोगुत्ति पन्नत्तो, जिणेहिं वरदंसिहिं ॥७॥

**टीकाः**—'धर्म' इति धर्मास्तिकायः 'अधर्म' इत्यधर्मास्तिकायः 'आकाश' मित्याकाशास्तिकायः 'काल' अद्धासमयात्मकः 'पुद्गलजन्तवः', इति पुद्गलास्तिकायः जीवास्तिकायः, एतानि द्रव्याणीति शेषः प्रसंगतो लोकस्वरूपमप्याह—एष इत्यादि, सुगममेव, नवरमेष इति-सामान्यतः प्रतीतो लोक इत्येवं स्वरूपः, कोऽर्थः ?, अनन्तरोक्तद्रव्यषट्कात्मकः, उक्तं हि—'धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम् । तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥१॥ इति सूत्रार्थ ॥ आह किमेतेऽपि धर्मादयो भेदवन्त उतान्यथा ? उभयथाऽपीति ब्रूमः तथाचाह—

**मूलः**—"धम्मो अधम्मो आगासं, दव्वं इक्किक्क माहियं ।
अणंताणि य दव्वाणि कालो पुग्गल जंतवो ॥८॥

**टीकाः**—धर्मोऽधर्म आकाशं द्रव्यमिति धर्मादिभिः प्रत्येकं योज्य ते ५ 'एकैकं एक संख्यायो एवैतेषु भावाद् आख्यातं तीर्थकृद्भिरिति गम्यते तत किं कालादिद्रव्याण्यप्येवमेवेत्याह—' अनन्तानि ' अनन्तसंख्यानि स्वगतभेदानन्त्यात् 'चः' पुनरर्थे उत्तरत्र योत्त्यते, कानि ? द्रव्याणि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कतमानि? काल: पुद्गल जन्तवश्चोक्तरूपा:, कालस्य चानन्त्यमतीतानागतापेक्षयेति सूत्रार्थ: ।। एषां परस्परभेदनिबन्धनं लक्षणभेदमाह—

**मूल** :—गइलक्खणो उ धम्मो, अहम्मो ठाणलक्खणो ।
भायणं सव्वदव्वाणं, नहं ओगाहलक्खणं ।।९।।
वत्तणालक्खणो कालो, जीवो उवओगलक्खणो ।
नाणेणं दंसणेण च सुहेण य दुहेण य ।।१०।।
नाणं च दंसणं चेव चरित्तं च तवो तहा ।
वीरियं उवओगे य, एयं जीवस्स लक्खणं ।।११।।
सद्दंधयार उज्जोओ, पभा छाया तवुत्ति वा ।
वण्णरसगंधफासा, पुग्गलाणं तु लक्खणं ।।१२।।

**टीका:**— गमनं गति: – देशान्तरप्राप्तिः लक्ष्यतेऽनेनेति लक्षणं, गतिर्लक्षणमस्येति गतिलक्षण:, तु:, पूरणे, कोऽसौ ? धर्मास्तिकाय:, आह—सिद्धे सति वस्तुनोऽस्तित्वे इदमनेन लक्ष्यत इति वक्तुं युक्तम्, अस्य तु सत्त्वमेवासिद्धम्, अत्रोच्यते, यद्यच्छुद्धपद वाच्यं तत्तदस्ति, यथा स्तम्भादि:, शुद्धपदवाच्यश्च धर्मनामास्तिकायो, नचायमसिद्धो हेतु:, धर्म इत्यस्यैतद् वाचकस्यासमस्तपदत्वेन तथाऽभिधेयार्थबाधक—प्रमाणाभावात्, प्रमाणान्तर बाधितविषयत्वाख्यदोषरहितत्त्वेन च सिद्धत्वात्, नच खपुष्पादिषु संकेतितैर्दु:खादि शुद्धपदैरनेकान्तो, वृद्धपरम्परायातसङ्केतविषयाणामेवशुद्धपदानां वाच्यत्वस्येह हेतुत्वेनेष्टत्वात्, निपुणेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपन्नाभाव्यम्, अन्यथा धूमादेरपि गोपालघटादिष्वन्यथाभाव-दर्शनादेष प्रसङ्गो दुर्निवारः स्यात्, उक्तञ्च—'अत्थित्ति निव्वियप्पो जीवो नियमा उ सद्दतो सिद्धी। कम्हा? सुद्ध पयत्ता घडरवरसिंगाणुमाणाओ ॥ १ ॥ छाया—अस्तीति निर्विकल्पो जीवो नियमात् शब्दत एव सिद्धिः। कस्मात्? शुद्धपदत्वात् घटखरशृंगानुमानात् ॥ १ ॥ इत्याद्यलं प्रसङ्गेन, तथा 'अधर्मः' अधर्मास्तिकायः स्थितिः स्थानं गतिनिवृत्तिरित्यर्थः। तल्लक्षणमस्येति स्थानलक्षणः, स हि स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्य्यं प्रत्यपेक्षाकारणत्वेन व्याप्रियत इति तेनैव लक्ष्यत इत्युच्यते, अनेनाप्यनुमानमेव सूचितं, तच्चेदम्—यद्यत्कार्य्यं तत्तदपेक्षा कारणवद्, यथाघटादि, कार्यंचासौ स्थितिः, यश्च तदपेक्षाकारणं तदधर्मास्तिकाय इति, अत्र च नैयायिकादिः सौगतो वा वदेत्—नास्ति अधर्मास्तिकायः, अनुपलभ्यमानत्वात्, शशविषाणवत्, तत्र यदि नैयायिकादिस्तदाऽसौ वाच्यः—कथं भवतोऽपि दिगादयः सन्ति? अथ दिगादिप्रत्ययलक्षणकार्यदर्शनात्, भवति हि कार्यात् कारणानुमानम्। एवं सति स्थितिलक्षणकार्यदर्शनादयमत्यस्तीति किं न गम्यते? अथ तत्र दिगादि प्रत्ययकार्यस्यान्यतोऽसंभवात् कारणभूतान् दिगादीननुमिमीमह इति मतिः, इहाप्याकाशादीनामवगाहदानादिस्वस्वकार्यव्यापृतत्वेन ततोऽसंभवादधर्मास्तिकायस्यैव स्थितिलक्षणं कार्य्यमिति किं नानुमीयते? अथासौ न कदाचिद् दृष्टः? एतद्दिगादिस्वपि समानम्। अथ सौगतः सोऽप्येवं वक्तव्यः यथा—भवतः कथं बाह्यार्थसंसिद्धिः? नहि कदाचिदसौ प्रत्यक्ष गोचरः, साकारज्ञानवादिनः सदा तदाकारस्यैव संवेदनात्; तथा च तस्या प्यनुपलभ्यमानत्वादभाव एव, अथाकारसंवेदनेऽपि तत् कारणमर्थः परि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्प्यते, धूमज्ञान इवाग्निः एवं सति स्थितिदर्शनेऽपि किं न तत् कारणस्याधर्मास्तिकायस्य निश्चयः ? अथायमप्यभिदधीत—न कदाचिदसौ तत् कारणत्वेनेक्षित इति, ननु बाह्यार्थेऽपि तुल्यमेतत्, नहि सोऽपि तदाकार कारितया कदाचिदवलोकितः, अथ मनस्कारस्य चिद्रूपतायामेव व्यापारो नतु नियता (त) कारणत्वे, अतस्तत्रार्थः कारणं कल्प्यते, एवं तर्हि जीव पुद्गलौ परिणाममात्र एव कारणं, स्थितिपरिणतौ पुनरधर्मास्तिकायोऽपेक्षा कारणत्वेन व्याप्रियत इति किं न कल्प्यते ? अथासौ सर्वदा सर्वस्य सन्निहित इत्यनियमेन स्थिति—कारणं भवेत्, नन्वेवमर्थोऽपि किं सन्निहित इत्येव स्वाकारमर्पयति ? अथ चक्षुरादि व्यापारमयमपेक्षते, अधर्मास्तिकायोऽपि तर्हि स्वपरगतौ विश्रसाप्रयोगावपेक्षत इति नानयोर्विशेषमुत्पश्यामः, तथा 'भाजनम्' आधारः 'सर्वद्रव्याणां' जीवादीनां 'नभः' आकाशम्, अवगाहः— अवकाशस्तल्लक्षणमस्येत्यवगाहलक्षणं तद्ध्यव गाढुं प्रवृत्तानामालम्बनो भवति, अनेनावगाहकारणत्वमाकाशस्योक्तं न चास्य तत् कारणत्वमसिद्धं, यतो यद्यदन्वयव्यतिरेकानुविधायि तत्तत् कार्यं, यथा चक्षुराद्यन्वयव्यतिरेकानुविधायि रूपादि विज्ञानम्, आकाशान्वयव्यतिरेकानुविधायीचावगाहः, तथाहि—शुषिर रूपमाकाशं, तत्रैव चावगाहो, न तु तद्विपरीते पुद्गलादौ, अथैवमलोकाकाशेऽपि कथं नावगाहः ? उच्यते, स्यादेवं यदि कश्चिदवगाहिता भवेत्, तत्र तु धर्मास्तिकायस्य जीवादीनां चासत्त्वेन तस्यैवाभाव इति कस्यासौ समस्तु ? नन्वेवमपि न तत् सिद्धः, हेतोरसिद्धत्वात्, तदसिद्धश्चान्वयाभावत्, सति हि—तस्मिन् भवनमन्वयो, न च तत् सत्त्वसिद्धिरस्ति, अन्वयाभावे च व्यतिरेकस्याप्यसिद्धिरिति, ननु कथं न तत्सत्त्वसिद्धः ? अथ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भित्त्याद्यभाव एवाकाशमिति, एवं सत्याकाशाभाव एव भित्त्यादय इत्यपि किं न भवति ? अथ तेषां प्रमाणप्रतीतत्वात्. इहापि किं न प्रमाणप्रतीतिः ? तथाहि — वियति विहग इत्यादि, प्रतीत्यन्यथानुपपत्त्याऽनुमानतस्तत् सिद्धः नचेयं प्रतीतिरन्यथाऽपि संभवतीति न ततस्तत् सिद्धिरिति (वक्तुं) युक्तं एवं हि भित्त्यादिप्रतीतेरपि भित्त्याद्यभावेऽपि भावकल्पनया तेषामप्यभावप्रसक्तिः, अथ तत् प्रतीतेः प्रामाण्यनिश्चय इति नान्यथात्वकल्पना, एवं तर्हि वक्तव्यं—कुतोऽस्याः प्रमाणनिश्चयः ? किं प्रमाणान्तरानुग्रहात्, बाधकाभावाद् वा ? यदि प्रमाणान्तरानुग्रहात्, किं तत्र प्रमाणान्तरं ? य इहाबाधितप्रत्ययः स सर्वः प्रमाणं, यथा सुखादिप्रत्ययः बाधितप्रत्ययाश्चामी भित्त्यादिप्रत्यया इत्यनुमानमितिचेत् यद्येवमिहापि यो य इह प्रत्ययः स सर्वः सालम्बनो यथेह कुण्डे दधीति प्रत्ययः इह प्रत्ययश्चायम् इह विहग इति प्रत्ययः इत्यनुमानमस्त्येव, अथैवमाधारमात्रस्यैव सिद्धिः नत्वाकाशस्य कथं न तत् सिद्धिः ? यदेव ह्याधारमात्रं तदेवाकाशमिति वयं ब्रूमः, अथ बाधकाभावात्, ननु बाधकमपि विपरीत प्रत्ययोत्पत्तिरूपं, तदभावश्चोभयत्र समान इति न भित्त्याद्यभाव एवाकाशं किंतुशुषिर रूपमन्यदेव, ततस्तद्भावभावितत्त्वादवगाहस्य कथं न तत् कारणत्वसिद्धिराकाशस्य ? एवञ्च स्थितमेतद् — अवगाहेन कार्यरूपेण लक्ष्यमाणत्वादवगाहलक्षणं नभः. तथा वर्त्तन्ते— भवंति भावास्तेन तेन रूपेण तान् प्रतिप्रयोजकत्वं वर्त्तना सा लक्षणं — लिङ्गमस्येति वर्त्तना लक्षणः, कोऽसौ ? कालः, इदमुक्तं भवति—यदमी शीतवातातपादयः ऋतु विभागेन भवन्ति यच्च केचिच्छशधरकरनिकरा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नुकारिपारतीप्रसवाः अन्ये तु तुहिनशिलाशकलविशदकुन्दमालतीकुसुमवासवाहिनः अपरे च केशरतिलककुरुवकशिरीषाङ्कोल्लप्रसूनजृम्भमाण परागभाजः तदितेर च करिदशनसकलधवलमल्लिकाबहलपरिमल हारिणः परे च कदम्बकेतकरजःपूरपूरिताम्बराः अपरे तु सप्तच्छद कुसुमरजोधूलिधूसरितविश्वविश्वंभराः अविशिष्टविशिष्टवस्तवः प्रकाशन्ते क्रमेणैव भुवनभागांस्तदवश्यममीषां नैयत्यहेतुना केनापि भवितव्यं, स च काल इत्यलं प्रसंगेन, सर्वथा वर्त्तनया लक्ष्यमाणत्वादस्ति काल इति स्थितं, तथा 'जीवः' जन्तुरूपयोगो—मतिज्ञानादि लक्षणं—रूपं यस्यासौ उपयोगलक्षणो, मतिज्ञानादिको ह्युपयोगस्तद्धर्मः, स च स्वसंविदित एवेति, तदनुभवतो रूपाद्यनुभवादिव घटादिर्जीवो लक्ष्यत इति तल्लक्षणमुच्यते, प्रपञ्चितं चैतदिहैव प्रागन्यत्रचेति न पुनः प्रतन्यते, अत एव 'ज्ञानेन' विशेषग्राहिणा ' दर्शनेन च ' सामान्य विषयेण ' सुखेन च ' आह्लादरूपेण दुःखेन च—तद्विपरीतेन प्रक्रमाल्लक्ष्यत इति गम्यते, न हि ज्ञानादीन्यजीवेषु कदाचिदुपलभ्यन्त इतिकृत्वा । सम्प्रति विनेयानां दृढतरसंस्काराधनाय उक्तलक्षणमनूद्य लक्षणान्तरमाह—' ज्ञानं च ' उक्त रूपमेवं दर्शनं चैव चरित्रं च तपस्तथा ' वीर्य' वीर्यान्तरायक्षयोपशम समुत्थं सामर्थ्यलक्षणम् 'उपयोगश्च' अवहितत्वं, किमित्याह—' एतत ' ज्ञानादि जीवस्य लक्षणम्, एतेन हि जीवोऽनन्यसाधारणतया लक्ष्यत इति । इत्थं जीवलक्षणमभिधाय पुद्गलानां लक्षणमाह—'शब्दः' ध्वनिः 'अंधकारः' तिमिरम्, उभयत्रसूत्रत्वात् सुपोलुक्, ' उद्योतः' रत्नादिप्रकाशः 'प्रभा' चन्द्रादिदीधितिः 'छाया ' शैत्यगुणाः ' आतपः ' रविबिम्बजनित उष्णप्रकाशः इति शब्द आद्यर्थः, ततश्च सम्बन्धभेदादीनां परिग्रहः, व'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुच्चये, वर्णश्च नीलादिः रसश्च—तिक्तादिः गन्धश्च—सुरभ्यादिः स्पर्शश्च—शीतादिरेषां द्वन्द्वः, इति शब्देन चाद्यार्थेनैषां ग्रहणेऽपि पुनरुपादानं—सर्वत्रानुयायिताख्यापनार्थं, 'पुद्गलानां' स्कन्धादीनां 'तुः' पुनरर्थः लक्षणम्, एतैरेव तेषां लक्ष्यत्वात्, आह—पौद्गलिकत्वे शब्दादीनां पुद्गललक्षणत्वं युक्तं तच्च कथम्? उच्यते, शब्दस्तावन्मूर्त्तत्वात् पौद्गलिको, मूर्तिभावोऽस्य प्रतिघातविधायित्वादिभ्यः उक्तं हि—"प्रतिघात विधायित्वाल्लोष्टवन्मूर्त्तता ध्वनेः। द्वारवातानुपाताच्च, धूमवच्च परिस्फुटम्।१।।" अन्धकारोद्योत प्रभाणां तु पौद्गलिकत्वं चक्षुर्विज्ञानविषयत्वात, प्रयोगश्चात्र—यत्पौद्गलिकं न भवति तच्चक्षुर्विज्ञानविषयमपि न भवति, यथाऽऽत्मादयः, चक्षुर्विज्ञानविषयाश्चान्धकारादयः, अथालोकाभावोऽन्धकारं, तथा च निरुपाख्यत्वेन तस्या सत्त्वमुच्यते, न, सतः सर्वथा निरन्वयाभावस्याभावेनाभावरूपत्वेऽपि निरुपाख्यत्वासिद्धेः, तथाहि—घटस्य कपालाख्यपर्यायान्तरोत्पत्तिरेवाभावो न पुनरुच्छेदमात्रम्, एवमलोकस्याप्यन्धकाराख्यपर्यायान्तरोत्पत्तिरेवाभावो न तु तथाविधपरमाणुरूपतयाऽप्यभाव एव, इत्थं चैतत्, परिणामित्वाद्वस्तुनः, परिणामस्य च सत एव वस्तुनः पूर्वरूपपरित्यागेन रूपान्तरोत्पत्तिरूपत्वात्, उक्तं हि— 'परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम्। न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ।। १ ।।" एवं छायाऽऽतपयोरपि पौद्गलिकत्वं वस्तुत्वञ्च भावनीयं, तथा स्पर्शनग्राह्यत्वाच्चानयोः पौद्गलिकत्वं, तथाहि—छायाया शैत्यमातपस्य चौष्ण्यात्वं प्रतिप्राणि प्रतीतमेवेति, अतश्च यत् कैश्चिदुच्यते—शब्दोऽम्बरगुण इत्यादि, तदपास्तं भवति, उक्तञ्च—अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः। छायाऽऽतपस्तमः शब्दभावेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिणामिनः ॥ १ ॥,, इत्यादि, वर्णादीनां च पौद्गलिकत्वं सुप्रसिद्धमेवेति सूत्रचतुष्टयार्थः ॥ अनेन द्रव्यलक्षणमुक्तं, पर्यायलक्षणमाह—

**मूलः—एगत्तं च पुहुत्तं च, संखा संठाणमेव य।**

**संजोगा य विभागा य, पज्जवाणं तु लक्खणं ॥१३॥**

**टीकाः**—एकस्य भावः एकत्वं—भिन्नेष्वपि परमाण्वादिषु यदेकोऽयं घटादिरिति प्रतीतिहेतुः सामान्यपरिणतिरूपं, च शब्द उत्तरापेक्षया समुच्चये, पृथग्भावः पृथक्त्वम्—अयमस्मात्पृथगिति प्रत्ययोपनिबन्धनं, 'चः' सर्वत्र प्राग्वत्, संख्यानंसंख्या—यत एको द्वौ त्रय इत्यादिका प्रतीतिरुपजायते, संतिष्ठतेऽनेनाकारविशेषेण वस्त्विति संस्थानं—परिमण्डलोऽयमित्यादिबुद्धिनिबन्धनम्, एवेति पूरणे, 'संयोगाः' अयमंगुल्योः संयोग इत्यादि व्यपदेशहेतवः, 'विभागाश्च' अयमितो विभक्त इति बुद्धिहेतवः, उभयत्र सम्बन्धिभेदेन भेदमाश्रित्य बहुवचननिर्देशः, चशब्दोऽनुक्तनवपुराणत्वादिपर्यायोपलक्षकः, 'पर्यवाणाम्' उक्तनिरुक्तानां, 'तुः' पूरणे 'लक्षणम्' असाधारणरूपम्, अयमभिप्रायः—यः कश्चिदस्खलित प्रत्ययः स सर्वः सनिबन्धनो, यथा घटादिप्रत्ययः, अस्खलितप्रत्ययाश्चामी एकोऽयमित्यादिप्रत्ययाः ततोऽवश्यममीषां निबन्धनेन भवितव्यं, तच्च न द्रव्यमेव, तस्य सदाऽवस्थितत्वेन प्रतिनियत कालैकत्वादिप्रत्ययानुत्पत्तिप्रसंगात्, ततश्च यदमीषां कालनियमेनोत्पत्ति निबन्धनं न तत्पर्यवेभ्यस्तत्तत्परिणतिविशेषरूपेभ्योऽन्यत्, गुणानां तु लक्षणानभिधानं रूपादिरूपाणां तेषामतिप्रतीतत्वात्प्रायो विप्रतिपत्त्यविषयत्वाच्चेति सूत्रार्थः ॥

उत्तराध्ययन सू० मोक्षमार्ग गत्यध्ययन—२८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only